ततोऽवधीरितवचनो [1]भर्ता शङ्कितो देवीं पुनः पुनर्निर्बन्धुं प्रवृत्तः । यावद्देवी न कथयति, तावत्कुमार्या वसुलक्ष्म्या [2]आख्यातम् [3]आवुत्त! एषा मालविका' इति ।

कौमुदिका— (सस्मितम् ।) सरिसं खु बालभावस्स । अदो वरं कहेहि ।

सदृशं खलु[4] बालभावस्य । अतः परं कथय ।

वकुलावलिका— किं अण्णं, सम्पदं मालविआ सविसेसं भट्टिणो दंसणपहादो रक्खीअदि ।

किमन्यत्, साम्प्रतं मालविका सविशेषं भर्तुर्दर्शन-* पथाद्रक्ष्यते ।

कौमुदिका— हला अणुचिट्ठ अत्तणो णिओअं । अहं वि एदं अङ्गुलीअअं देवीए उवणइस्सं ।

बालभावस्य बालबुद्धेः । दर्शनपथात् दर्शनतः । नियोगः आज्ञा ।

* अपूर्वेयं दारिकेत्यारभ्य दर्शनपथाद्रक्ष्यत इत्यन्तेन वाक्यकदम्बेन गम्यमानो मालविकागोचरो राज्ञोऽभिलाषः, अत्र नाटके बीजमित्यनुसंधेयम् ।

1. भर्ता देवीं पुनरपि निर्बन्धुं; भर्ता पुनरपि अनुबन्धुं. 2. प्रियमाख्यातम् 3. आर्य! 4. खल्वेतत्.

सखि, अनुतिष्ठात्मनो नियोगम । अहमपि एतदङ्गुलीयकं देव्या उपनेष्यामि । [इति निष्क्रान्ता ।

वकुलावलिका— (परिक्रम्यावलोक्य च ।) एसो णट्टाअरिओ अज्जगणदासो संगीदसालादो दाणिं णिक्कमइ । जाव से अत्ताणं दंसेमि ।

[1]एष नाट्याचार्य आर्यगणदासः सङ्गीतशालात[2] इदानीं निष्क्रामति । [3]यावदस्यात्मानं दर्शयामि ।

[इति परिक्रामति ।

(प्रविश्य ।)

गणदासः— कामं खलु सर्वस्यापि कुलविद्या बहुमता । न पुनरस्माकं नाट्यं प्रति मिथ्यागौरवम् । कुतः,

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं[4]
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।

अनुतिष्ठ कुरु । उपनेष्यामि दास्यामि । संगीतशालातः निष्क्रामति नाटकशालाया निर्गच्छति । मिथ्यागौरवं असत्यवादः(?) ।

देवानामिति । मुनयः ऋषयः । इदं नाट्यम् । चाक्षुषं चक्षुर्ग्राह्यं चक्षुस्तृप्तिकरम् । कान्तं मनोहरम् । क्रतुं यज्ञम् । आमनन्ति । उमाकृतव्यतिकरे गौरीकृतसंपर्के अर्धनारीकृते । स्वाङ्गे स्वशरीरे । रुद्रेण । इदम् । द्विधा विभक्तं द्विविधं विभक्तम्, कैशिक्यारभटीभेदेन लास्यताण्डवभेदेन वेत्यर्थः । 'या श्लक्ष्णनेपथ्यविधानयुक्ता स्त्री संयुता स्याद्बहुनृत्तगीता । कामोपभोगप्रचुरोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति । प्रस्तावपातप्लुतलङ्घनानि च्छेद्यानि मायाकृतमिन्द्रजालम् । चित्राणि युद्धानि च यत्र नित्यं तामीदृशीमारभटीं वदन्ति ॥' त्रैगुण्यं सत्वरजस्तमोरूपाः

1. अये! नाट्या... 2. संगीतशालाया निर्गच्छति । 3. यावदस्यै आत्मानं. 4. चाक्षतं.

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्[1] ॥ ४ ॥

त्रयो गुणाः तदुद्भवम् । लोकचरितम् । नानारसं नानाविधरसयुक्तम् । दृश्यते । नाट्यम् । भिन्नरुचेः जनस्य विविधरसयुक्तस्य प्राणिनः, यद्वा नृत्तगीतवाद्यानभिज्ञस्यापि जनस्य । बहुधा बहुप्रकारेण । एकं समाराधनं मुख्यं वशीकरणम् ॥४॥

* देवानामित्यादि । मुनयः भरतादयः । इदं नाट्यम् । देवानां इन्द्रादीनाम् । क्रतुम् । आमनन्ति कथयन्ति । कीदृशम्, कान्तं पशुविशसनादिरहितमित्यर्थः । पुनः कीदृशम्, चाक्षुषं चक्षुरनुभाव्यम् । अत्र नाट्यस्य क्रतुत्वनिरूपणं चतुर्वेदसारनाट्यवेदविहितकर्मत्वादिति मन्तव्यम् । तथा च कुमारसंभवे—'कर्म यज्ञः फलं स्वर्गः' इति । तस्य चतुर्वेदसारत्वं भारतीये प्रतिपादितम् । 'सर्वशास्त्रार्थसंपन्नं सर्वशिल्पप्रदर्शनम् । नाट्यसंज्ञमिमं वेदं सेतिहासं करोम्यहम् ॥ एवं संकल्प्य भगवान्सर्वान्वेदाननुस्मरन् । नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥ जग्राह पाठ्यमृग्वेदात्सान्नः संगीतमेव च । यजुर्वेदादभिनयं रसानाथर्वणादपि ॥ वेदोपवेदसंबद्धो नाट्यवेदो महात्मना । एवं भगवता सृष्टो ब्रह्मणा ललितात्मना । उत्पाद्य नाट्यवेदं तु ब्रह्मोवाच सुरेश्वरम् ॥' इति । प्रकारान्तरेणापि अस्य क्रतुत्वं प्रतिपादितम् । 'प्रयोगं यश्च कुर्वीत प्रेक्षते वा विधानवान् । या गतिर्वेदविदुषां या गतिर्यज्ञयाजिनाम् । या गतिर्दानशीलानां तां गतिं प्राप्नुयान्नरः ॥' इति । पुनः कीदृशमिदं नाट्यम्, रुद्रेण । उमाकृतव्यतिकरे उमया पार्वत्या कृतः व्यतिकरः संबन्धः यस्य तस्मिन् । स्वाङ्गे आत्मदेहे । द्विधा द्विप्रकारेण लास्यताण्डवरूपेण । विभक्तं पृथक् कृतम् । तथा चोक्तं संगीतविद्याविनोदे । 'उद्दण्डताण्डवमुदञ्चितलास्यलीलां कर्तुं स्वयं युगपदेव समुत्सुकात्मा । यः कामिनीकलितकम्रतरार्धकायः सोऽयं विभाति विभुरादिनटः पुराणः ॥' इति । अत्र नाट्ये । त्रैगुण्योद्भवं त्रिगुणा एव सत्त्वरजस्तमांस्येव त्रैगुण्यम्, 'चतुर्वर्णादिभ्यः स्वार्थे ष्यञ्' इति ष्यञन्तम्, तस्मादुद्भवं उद्भूतम् । लोकचरितं लोकानां लोकस्थानां रामाद्यनुकार्याणां चरितं दुःखादुःखमिश्रात्मकम् ।

1. समाराधकम्.

वकुलावलिका— (उपसृत्य ।) अज्ज वन्दामि । आर्य! वन्दे ।

गणदासः— भद्रे! चिरं जीव ।

वकुलावलिका— अज्ज देवी पुच्छदि अवि उवदेसग्गहणे णादिकिलेसेदि वो सिस्सा मालविअत्ति ।

[1]आर्य! देवी पृच्छति 'अप्युपदेशग्रहणे नातिक्लेशयति वः शिष्या मालविका' इति ।

गणदासः— [2]विज्ञाप्यतां देवी, ''[3]परं निपुणा मेधाविनी च' इति । किं बहुना ।

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ॥ ५ ॥

नानारसं नाना बहुविधाः रसाः प्रीतयः यस्मात्तथोक्तम् । दृश्यते ज्ञायते, सामाजिकैरनुभूयत इत्यर्थः । लोकेऽनुकार्यस्य चरितं सुखदुःखमिश्रात्मकमपि नाट्येनाभिनीयमानं सत् सुखरूपेण प्रतीयत इति भावः । पुनः कीदृशम्, नाट्य नटप्रयोगः । एकमपि एकतरमपि । भिन्नरुचेः भिन्ना बहुविधाः रुचयः प्रीतयः यस्य तस्य । जनस्य । बहुधा बहुप्रकारेण, शृङ्गारहास्यादिरूपेण । समाराधनं संतर्पकम् । तथा चोक्तं भारतीये । 'त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् । धर्मो धर्मप्रवृत्तानां कामः कामोपसेविनाम् ॥ अर्थोपजीविनामर्थो धृतिरुद्विग्नचेतसाम् । नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् । लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् । एतद्रसेषु भावेषु सर्वकर्मक्रियासु च । सर्वोपदेशजननं नाट्यं खलु भविष्यति । न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला । नासौ योगो न तत्कर्म नाट्येऽस्मिन्यन्न दृश्यते ॥' इति ॥ ४ ॥

मेधाविनी बुद्धिमती ॥

यद्यदिति । भाविकं भावयुक्तम्, भावोऽभिप्रायः । अथवा सात्विकम् । अथवा स्वप्नसंदर्शननिमित्तभावसंबन्धि । 'साक्षात्स्वप्ने प्रियं दृष्ट्वा मदनानलपीडिता ।

1. आर्ये देवी. 2. विभाव्यतां देवी. 3. परमनिपुणा.

वकुलावलिका— (आत्मगतम ।) इरावदिं अदिक्कमन्दिं विअ पेक्खामि । (प्रकाशम ।) किदत्था दाणिं वो सिस्सा, जम्मिं गुरुअणो एव्वं तुस्सदि ।

इरावतीमतिक्रामन्तीमिव पश्यामि । कृतार्थेदानीं [1]वः शिष्या, यस्यां गुरुजन एवं तुष्यति ।

गणदासः— भद्रे! तद्विधानामसुलभत्वात्पृच्छामि, कुतो देव्यास्तत्पात्रमानीतम् ।

वकुलावलिका— अत्थि देवीए वण्णावरो भादा वीरसेणो णाम। सो भट्टिणा अन्दवालदुग्गे णम्मदाऊले ठाविदो। देण सिप्पाहिआरे इअं जोग्गा दारिएत्ति भइणीये उवाअणं पेसिदा ।

अस्ति [2]देव्या वर्णावरो भ्राता वीरसेनो नाम । स भर्त्रा अन्तपालदुर्गे [3]नर्मदाकूले स्थापितः । तेन शिल्पाधिकारे

करोति विविधान्भावांस्तद्वै भाविकमुच्यते ।' इति । प्रयोगविषये नामादिप्रयोगविषये । मया । तस्यै मालविकायै । यद्यत् भाविकमुपदिश्यते । बाला मालविका । तत्तद्विशेषकरणात् । मे । प्रत्युपदिशतीव । अतोऽत्यन्त समर्थेति संबन्धः ॥ ५ ॥

* यद्यदित्यादि । प्रयोगविषये अभिनेयार्थे । मया । तस्यै मालविकायै । यद्यत् । भाविक भाववत् । 'अत इनिठनौ' इति ठन् । नृत्यमित्यर्थः । यथोक्तम् । 'आङ्गिकाभिनयप्रायमल्पवाचिकसात्त्विकम् । भावानामास्पदं नित्यं पदार्थव्यञ्जनात्मकम् ॥' इति । उपदिश्यते बोध्यते । तत्तद्विशेषकरणात् तस्य तस्य भाविकस्य विशेषेण अतिशयेन करणात् निर्वर्तनात् । सा बाला । मे । प्रत्युपदिशतीव बोधयतीव । अनेनास्या नृत्ते प्रावीण्यातिशयो गम्यते ॥ ५ ॥

वर्णावरो नाम पितुः क्रमविवाहे अवरवर्णायां मातर्युत्पन्नः, वैश्यापुत्र इत्यर्थः । अन्तपालदुर्गे स्वस्य सामन्तनृपस्य च सीमाविभागस्थदुर्गे अन्तपालदुर्गम् ।

1. ते. 2. देव्या भ्राता. 3. मन्दाकिनीतीरे

इयं योग्या दारिकेति भगिन्यै उपायनं प्रेषिता ।

गणदासः— (स्वगतम् ।) [1]आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां संभावयामि । (प्रकाशम् ।) भद्रे! मयापि यशस्विना भवितव्यम् । पश्य,[2]

[3]पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ ६ ॥

वकुलावलिका— अज्ज कहिं दाणिं वो सिस्सा।
[4]आर्य! कुत्रेदानीं वः शिष्या ।

गणदासः— इदानीमेव पञ्चाङ्गाभिनयमुपदिश्य मया 'विश्रम्य-

शिल्प नाट्यादि । उपायन उपदा । ऊनवस्तुका निकृष्टाभिजनां, हीनवंशामिति यावत । यशस्विना कीर्तिमता ।

* अनूनवस्तुका अनून अनल्प विशिष्ट वस्तु वृत्त यस्यास्तथोक्ताम । संभावयामि मन्ये ।

पात्रविशेष इति । आधातुः प्रयोक्तुः, उपाध्यायस्य । पात्रविशेषे सत्पात्रे बुद्धिमति । न्यस्त प्रयोजितम् । शिल्प नाट्यादि । गुणान्तर श्रेष्ठगुण अधिकगुण वा । व्रजति । पयोदस्य मेघस्य । जलम् । समुद्रशुक्तौ । मुक्ताफलतां मौक्तिकताम् । व्रजतीव ॥ ६ ॥

पात्रविशेष इत्यादि । आधातुः उपदेष्टुः । शिल्प कलाविद्या । पात्र विशेषे । न्यस्त सत् । गुणान्तर गुणविशेषम् । व्रजति प्राप्नोति । अत्रोपमामाह-पयोदस्य मेघस्य । जलम् । समुद्रशुक्तौ । न्यस्त सत् । मुक्ताफलतां मौक्तिकत्वमिव ॥ ६ ॥

पञ्चाङ्गाभिनयः 'कराभ्यां चरणाभ्यां च शिरसा चाभिनीयते । यत्र

1. आकृतिप्रत्ययात्; आकृतिविनयप्रत्ययात्. 2. यतः. 3. पात्र विशेषन्यस्त 1. अथ किं । कुत्रे...

ताम्' इत्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति ।

वकुलावलिका— देण हि अणुजाणादु मं आआरिओ । जाव से अज्जस्स परिदोसणिवेअणेण उच्छाहं वड्ढेमि ।

तेन ह्यनुजानातु मामाचार्यः । यावदस्या आर्यस्य परितोषनिवेदनेनोत्साहं वर्धयामि ।

गणदासः— दृश्यतां सखी । अहमपि लब्धक्षणः स्वगृहं गच्छामि ।

[इति निष्क्रान्तौ ।

इति मिश्रविष्कम्भकः ।

(ततः प्रविशत्येकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वाय्यमानो राजा ।)

राजा— (अनुवाचितलेखममात्यमवलोक्य ।) वाहतक ! किं प्रतिपद्यते वैदर्भः ।

वर्त्तिवति विज्ञेयः पञ्चाङ्गाभिनयो हि सः ।' दीर्घिकावलोकनगवाक्षगता कमलाकरावलोकनार्थं वातायनगता । प्रवात प्रकृष्टवायुम् । परितोषनिवेदनं प्रियवार्ताकथनम् । उत्साहं उद्योगम् । लब्धक्षणः क्षणमात्रं स्थित्वा ।

* इदानीमित्यादि । पञ्चाङ्गाभिनयं पञ्च अङ्गानि यस्य तथोक्तं, प्रेरणमित्यर्थः, तस्य अभिनयः प्रयोगः । इदानीमेव अद्यैव । उपदिश्य शिक्षयित्वा । प्रवातः प्रकृष्टः वातः यस्मिन् देशे । प्रेरणस्य अङ्गपञ्चकमुक्त नृत्तरत्नाकरे । 'नृत्तं तथैव कैवारो घर्मरो वागडं तथा । गीत चेति समाख्यातं प्रेरणस्याङ्गपञ्चकम् । आभिस्त्वेतत्प्रयोक्तव्यं कैवारं वागडं विना ।' इति । अत्र पञ्चाङ्गरूपनृत्तान्तरोपक्रमकथनेन चलितकनृत्तं साकल्येन परिचितमिति सूच्यते । लब्धक्षणः लब्धः प्राप्तः क्षणः निर्व्यापारस्थितिर्विश्रामो येन तथोक्तः ।

अन्वासनं सेवनम् । अनुवाचितलेखं कृतलेखार्थवचनम् । प्रतिपद्यते इच्छति ।

* वाहतक इति अमात्यस्य नाम । वैदर्भः विदर्भराजः । किं प्रतिपद्यते

अमात्यः— देव! आत्मविनाशम्।

राजा— [1]लिखितं निर्देशमिदानीं [2]श्रोतुमिच्छामि।

अमात्यः—इदमिदानीमनेन प्रतिलिखितम्—"पूज्येनाहमादिष्टः 'भवतः पितृव्यपुत्रः कुमारो माधवसेनः प्रतिश्रुतसम्बन्धो [3]ममोपान्तिकमागच्छन्नन्तरा त्वदीयेनान्तपालेनावस्कद्य[4] गृहीतः। स त्वया मदपेक्षया सकलत्रसोदर्यो मोचयितव्यः' इति।

किं कार्यं मन्यते। सदेश सदिष्टार्थम्। अनेन वैदर्भेण। इदम्। प्रतिलिखितम्। पूज्येन पूजार्हेण त्वया, अग्निमित्रेणेत्यर्थः। अहं वैदर्भः। आदिष्टः आज्ञप्तः। तमेवार्थं विवृणोति—भवत इत्यादिना। भवतः तव। पितृव्यपुत्रः पितृभ्रातृसुतः। माधवसेन इति नाम। प्रतिश्रुतसंबन्धः प्रतिश्रुतः अङ्गीकृतः संबन्धः कन्याप्रदानरूपः येन तथोक्तः। ममोपान्तिक मत्समीपम्। आगच्छन् उपसर्पन्। अन्तरा। त्वदीयेन त्वत्सबन्धिना। अन्तपालेन सीमादुर्गरक्षकेण। अवस्कद्य पथि प्रहृत्य। गृहीतः निरुद्धः, बन्दीकृत इत्यर्थः। सः माधवसेनः। त्वया भवता। मदपेक्षया मय्यपेक्षया, अपेक्षा इच्छा, स्नेह इत्यर्थः, तया हेतुना। सकलत्रसोदर्यः भार्याभगिनीसहितः। 'वोपसर्जनस्य' इति सहशब्दस्य सादेशः। मोक्तव्यः विसर्जनीयः। इतिः समाप्तौ। एतावता वैदर्भेण अग्निमित्रप्रेरितपत्रिकार्थानुवादः कृत इत्यनुसंधेयम्।

आत्मविनाशं स्वविनाशम्। निर्देशः उपन्यासः। पूज्येनेत्यादि। पूज्येन अग्निमित्रेण। अहं वैदर्भः। आदिष्टः उक्तः। पितृव्यः पितृभ्राता। माधवसेनो वैदर्भस्य पितृव्यपुत्रः। प्रतिश्रुतसम्बन्धः संबन्धार्थं प्रतिश्रुत्य। ममोपान्तिकं मत्पार्श्वम्। अन्तरा मध्यमार्गे। त्वदीयेन वैदर्भसंबन्धिना। अवस्कद्य आक्रम्य। मदपेक्षया अस्मदनुसारेण। सकलत्रसोदर्यः सस्त्रीकसोदर्यः, सोदर्या सहजा। अन्तपालोऽपि वैदर्भसंबन्धी।

---

1. संदेशमिदानीं; निदेशमिदानीं; लिखितमिदानीम्. 2. श्रावयितुं... 3. ममोपान्तिकमुपसर्पन्। 4 अवस्कन्द्य (?)

[1]तन्न वो न विदितं यत्तुल्याभिजनेषु भूमिहरेषु राज्ञां प्रवृत्तिरीदृक्। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति । सोदर्या पुनरस्य ग्रहणविप्लवे विनष्टा । तदन्वेषणाय प्रयतिष्ये । [2]अथावश्यमेव माधवसेनः पूज्येन मोचयितव्यः, श्रूयतामभिसन्धिः ।

अत्र भवत इत्यारभ्य मोचयितव्य इत्यन्तमग्निमित्रवचनम्। तन्न वो न विदितमित्यादि वैदर्भस्योत्तरम्। तत्र च मध्यस्थः पूज्यो भवितुमर्हतीत्येतदन्तमग्निमित्रवचनस्य प्रत्याख्यानपरम्। सोदर्यादि प्रयतिष्य इत्यन्तं वैदर्भस्य स्वव्यापारोपन्यासः। अथावश्यमित्यादिना बन्धनात्सद्य इत्यन्तेन वैदर्भ एवाग्निमित्रस्याभिमतमाशङ्कते। एवं चाग्निमित्रश्च वैदर्भश्च उभौ परस्परसंघर्षिणौ। वैदर्भस्य पितृव्यपुत्रो माधवसेनो वैदर्भस्य वैमनस्यादग्निमित्रमेव गन्तुं प्रथममेव चारमुखेन सम्बन्धमुक्ता प्रतिश्रुतसम्बन्धिनस्तस्य समीपं सकलत्रसोदर्यमागच्छन्, वैदर्भसम्बन्धिनान्तपालेन अन्तरा अवस्कन्द्य गृहीत्वा वैदर्भनगरमानीय कारागृहे निक्षिप्तः। तं मोचयेति पत्रिकां बहुवृत्तान्तां प्रेषितवानग्निमित्रः। वैदर्भोऽपि पत्रिकामनुवाच्य, पूर्वमेव तव कारागृहे निक्षिप्तं मम सचिवं मुञ्चसि चेत्, तदा अहमपि माधवसेनं मोक्ष्या इति प्रत्युत्तरं पत्रिकायां लिखित्वा प्रेषितवान्। तां च समागतां पत्रिकामनुवाचितवतो मन्त्रिणो वृत्तान्तं श्रुत्वा क्रुद्धोऽग्निमित्रः सचिवमाह ।

वः युष्माकं । तन्न न विदितं विदितमेव । तुल्याभिजनेषु समानवंशेषु । पूज्यः अग्निमित्रः । मध्यस्थः उभयोः समः । विप्लवः व्यतिकरः । अन्वेषणं गवेषणम् । अभिसन्धिः अभिसन्धानम् ।

* इतः परं प्रत्युत्तररूपं वैदर्भवचनमुच्यते, तन्न वो विदितमित्यादि । तत् वक्ष्यमाणम् । वः युष्माकम् । विदितं न इत्यत्र काकुरनुसंधेया । तुल्याभिजनेषु समानवंशेषु, ज्ञातिष्वित्यर्थः । राज्ञाम् । प्रवृत्तिः वर्तनम् । ईदृक् एवंविधेति यत् तत् न वो विदितं इत्यनेन संबन्धः । अतः अस्मात्कारणात् । अत्र

---

1. तन्न वो विदितं यत्तुल्याभिजनेषु राज्ञां प्रवृत्तिरीदृक्; तन्न वो विदितं तुल्याभिजनेषु राज्ञां वृत्तम्; तन्न वो विदितं यत्तुल्याभिजनेषु भूमेरिव राज्ञां प्रवृत्तिः । 2. अथवावश्यं माधवसेनः पूज्येन मोचयितव्य इति यदि.

[1]मौर्यसचिवं विमुञ्चति यदि पूज्यः संयतं मम स्यालम् ।
मोक्ता [2]माधवसेनं ततोऽहमपि बन्धनात्सद्यः ॥ ७ ॥" इति ।

राजा—(सरोषम् ।) कथं कार्यविनिमयेन मयि व्यवहरत्यनात्मज्ञः । वाहतक, प्रकृत्यमित्रः प्रतिकूलचारी[3] च मे वैदर्भः । तद्यातव्यपक्षे स्थितस्य [4]पूर्वं सङ्कल्पितमुन्मूलनाय वीरसेनप्रमुखं दण्डचक्रमाज्ञापय ।

अस्मिन्नर्थे । पूज्यो भवान् । मध्यस्थः समः । भवितुम् । अर्हति । अस्य माधवसेनस्य । सोदर्या पुनः स्वसा पुनः । ग्रहणविप्लवे । विनष्टा तिरोहिता । तदन्वेषणाय तस्या गवेषणाय । प्रयतिष्ये । अथवेति पक्षान्तरे । मोचयितव्यो त्याजयितव्यः । अभिसंधिः निश्चयः ।

मौद्गलेति । पूज्यः अग्निमित्रः । संयतं निगलबन्धितम् । मौद्गलसचिवं मौर्यसचिवम् । स्वयं, मुञ्चति मोक्षयति यदि । अहमपि । तव स्यालं माधवसेनम् । बन्धनात् । मोक्ता मुञ्चामीत्यर्थः ।

कार्यविनिमयः कृत्यव्यतिरेकः । अनात्मज्ञः स्वानभिज्ञः । यातव्यपक्षे उद्रासनोच्चाटनपक्षे निधने । पूर्वसङ्कल्पितं प्रथममेवाज्ञापितम् । उन्मूलनाय समूलमेवोद्धर्तुम् । वीरसेनप्रमुखं वीरसेनप्रधानम् । दण्डचक्र सेनासमूहम् ।

* **मौर्यसचिवमित्यादि** । पूज्यो भवान् । संयतं त्वया निगलितम् । मम । स्यालं पत्नीभ्रातरम् । मौर्यसचिवं मौर्यसचिवनामानम् । विमुञ्चति यदि त्यजति चेत् । ततः तस्मात्कारणात् । मया । सद्यः सपदि । माधवसेनः । बन्धनात् । मोक्ता मुक्तो भवति । मुञ्चतेः कर्मणि लुट् ॥ ७ ॥

* इतिः लिखितार्थसमाप्तौ ।

* प्रकृत्यमित्रः स्वभावतः शत्रुः । अत्र प्रकृत्यमित्रत्वं विषयानन्तरत्वात् ।

---

1. मौद्गलसचिवं मुञ्चति ; आर्यसचिवं विमुञ्चति. 2. माधवसेनस्ततो मया बन्ध... 3. प्रतिकूलकारी मे. 4. पूर्वसङ्कल्पितसमुन्मूलनाय ; पूर्वसङ्कल्पितमुन्मूलनाय.

अमात्यः—यदाज्ञापयति देवः ।

राजा— अथवा किं भवान् मन्यते ।

अमात्यः— शास्त्रदृष्टमाह देवः । कुतः,

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढमूलत्वात् ।
नवसंरोहणशिथिलस्तरुरिव सुकरः समुद्धर्तुम् ॥ ८ ॥

राजा— तेन ह्यवितथं तन्त्रकारवचनम् । इदमेव [1]निमित्तमादाय [2]समुद्योज्यतां सेनापतिः ।

अमात्यः—तथा । [इति निष्क्रान्तः ।

(परिजनश्च यथाव्यापार राजानमभितः स्थितः ।)

(प्रविश्य ।)

विदूषकः—आणत्तोह्मि तत्तहोदा रण्णा । गोदम, चिन्तेहि दाव उवाअं, जह मे जइच्छादिट्ठपडिकिदी मालविआ पच्चक्खदंसणा होदित्ति । मए वि तं तह किदं । जाव से णिवेदेमि ।

अचिराधिष्ठितेति । अचिराधिष्ठितराज्यः आसन्नप्राप्तराज्यभारः । शत्रुः राजा । प्रकृतिषु अमात्यादिवर्गेषु । अरूढमूलत्वात् रूढमूलत्वाभावात्, अनालम्बनादित्यर्थः । समुद्धर्तुं समुन्मूलयितुम् । सुकरः सुखेन कर्तुं शक्यः । नवसंरोहणशिथिलः शिथिलसंरोहणः । तरुरिव । तदा अरूढमूलः अदृढप्राप्तमूलः । दृढवर्धितस्तु तरुः समुद्धर्तुं न शक्य इति भावः ।

तन्त्रकारो मन्त्री । निमित्तं शोभनशकुनम् । समुद्युज्यतां उद्योगं करोतु ।

तेन अरूढमूलत्वेन हेतुना । तन्त्रकारवचन अर्थशास्त्रकारवचनम् । अवितथ हि तथ्यमेव । भविष्यतीति शेषः । हिशब्दः अवधारणे । 'हि हेताववधारणे' इत्यमरः । इदमेव वैदर्भस्य कार्यविनिमयरूपमेव । वचनं वाक्यम् । निमित्तं हेतुम् । उपादाय अवलम्ब्य । समुद्योज्यतां प्रवर्त्यताम् ।

1. वचनं नि... 2 समुद्युज्यतां.

आज्ञप्तोऽस्मि तत्रभवता राज्ञा 'गौतम! चिन्तय तावदुपायम्, यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवति' इति। मयापि तत्तथा कृतम्। यावदस्मै निवेदयामि। (इति परिक्रामति।)

राजा—(विदूषकं दृष्ट्वा।) अयमपरः कार्यान्तरसचिवोऽस्मानुपस्थितः।

विदूषकः—(उपसृत्य।) वड्ढदु भवम्। वर्धतां भवान्।

राजा—(सशिरःकम्पम्।) इत आस्यताम्।

(विदूषक उपविष्टः।)

राजा—वयस्य! [1]कच्चिदुपेयोपायदर्शने व्यापृतं ते प्रज्ञाचक्षुः।

विदूषकः—पओअसिद्धिं पुच्छ। प्रयोगसिद्धिं पृच्छ।

राजा—कथमिव।

विदूषकः—(कर्णे।) एव्वं विअ। एवमिव।

यदृच्छादृष्टप्रतिकृतिः यादृच्छिक चित्रे दृष्टा। कार्यान्तरसचिवः राजकार्यव्यतिरिक्तकृत्यमन्त्री। उपेयं प्राप्यं मालविकेत्यर्थः।

* आज्ञप्त इत्यादि। अत्र गम्यमान राज्ञो मालविकादर्शनौत्सुक्यं आरम्भो नाम प्रथमावस्थेति मन्तव्यम्। अत्र बीजारम्भयोः समन्वयान्मुखसन्धिरित्यनुसंधेयम्।

* उपेयोपायदर्शने उपेयस्य साध्यस्य मालविकासाक्षाद्दर्शनस्य उपायदर्शने साधनज्ञाने। प्रज्ञाचक्षुः प्रतिभादृष्टिः। किंचित् ईषदपि। अपिः प्रश्ने। अत्र गम्यमानस्य मालविकाभिलाषस्य बीजस्य विन्यासादुपक्षेपो नाम सन्ध्यङ्गमुक्तं भवति।

* कर्णे एवमिव— एतद्वचनं नियतश्राव्यावान्तरभेदस्य गुह्यतरार्थस्य प्रयोगे कविना प्रयुक्तम्। 'कर्णे एवमिवेत्युक्ता ज्ञाप्यः पश्चात्प्रसङ्गतः' इति।

---

1. कच्चिदुपायदर्शने; अपि किंचिदुपयो...

राजा— साधु वयस्य! निपुणमुपक्रान्तम् । इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे [1]वयमाशंसामहे । कुतः,

[2]अर्थं सप्रतिबन्धं प्रभुरधिगन्तुं सहायवानेव ।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि ॥ ९ ॥

(नेपथ्ये ।)

अलमलं बहु विकत्थ्य । राज्ञः [3]समक्षमेवावयोरधरोत्तरव्यक्तिर्भविष्यति ।

राजा— सखे! त्वत्सुनीतिपादपस्य [4]कुसुममुद्भिन्नम् ।

विदूषकः— फलं वि दक्खिस्ससि । फलमपि [5]द्रक्ष्यसि ।

आशंसा प्रार्थना ।

अर्थमिति । सप्रतिबन्धं सविघ्नम् अर्थं प्रयोजनम् । सहायवान् साधनवानेव । अधिगन्तुं प्राप्तुं प्रभुः समर्थः । अथवा सहायवानेव प्रभुर्नायकः समर्थ इति । सचक्षुरपि सपाटवनेत्रोऽपि । दृश्यं दर्शनीयं वस्तु । तमसि अन्धकारे । दीपेन विना । न पश्यति नावलोकयति ।

नीतिपादपः विचारवृक्षः । उद्भिन्नं उद्भूतम् । प्रभोराज्ञा वैदर्भोन्मूलनम् ।

* इदानीमित्यादि । अस्मिन्नारम्भे मालविकासाक्षाद्दर्शनोद्योगे । दुरधिगमसिद्धौ दुर्लभसिद्धावपि । इदानीं त्वद्वचनश्रवणानन्तरम् ।

* **अर्थमित्यादि** । सप्रतिबन्धं प्रतिरोधसहितम् । अर्थं प्रयोजनम् । अधिगन्तुं लब्धुम् । सहायवानेव जनः । प्रभुः समर्थो भवति । इदानीमित्यादिना सहायवानेवेत्यन्तेन तस्य बीजस्य बहुलीकरणात् परिकर इति सन्ध्यङ्गमुक्तं भवति ।

* बहु विकत्थ्य आत्मश्लाघां कृत्वा । अलमलं इति प्रतिषेधे । 'अलखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः । फलमपि द्रक्ष्यसि—अत्र बीजस्य दृढीकरणात् परिन्यासो नाम सन्ध्यङ्गमुक्तं भवति ।

1 वयमाशाम्महे 2 सप्रतिबन्धं कार्यं. 3. समक्षमेवाधरोत्तमयोर्व्य... 4. पुष्पमु... 5. द्रक्ष्यते.

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी— देव! अमात्यो विज्ञापयति । 'अनुष्ठिता प्रभोराज्ञा' । एतौ पुनर्हरदत्तगणदासौ ।

उभावभिनयाचार्यौ [1]परस्परजयोद्यतौ ।
त्वां [2]द्रष्टुमिच्छतः साक्षाद्भावाविव [3]शरीरिणौ ॥ १० ॥

राजा— प्रवेशय तौ ।

कञ्चुकी— यदाज्ञापयति देवः ।

(इति निष्क्रम्य पुनस्ताभ्यां सह प्रविश्य ।)

इत इतो भवन्तौ ।

हरदत्तः—(राजानमवलोक्य ।) अहो दुरासदो राजमहिमा । तथाहि,

न च न परिचितो न [1]चाप्यरम्य-
श्चकितमुपैमि तथापि पार्श्वमस्य ।

उभाविति । अभिनयाचार्यौ नाट्योपाध्यायौ । परस्परजयोद्यतौ अन्योन्यजयमिच्छन्तौ । साक्षात् प्रत्यक्षमेव । अथवा साक्षाद्भावाविव सस्वरूपभावाविव । उभौ हरदत्तगणदासौ । त्वां द्रष्टुम् । इच्छतः आकाङ्क्षतः । विवादिनौ विवाद कुर्वन्तौ ।

दुरासदः आसादयितुमशक्यः । महिमा पराक्रमः ।

न च नेति । असौ राजा । न न परिचितश्च परिचित एव । अरम्योऽपि न रम्य एव । तथापि । अस्य । पार्श्वं समीपम् । चकितं सभयम् । उपैमि गच्छामि । सलिलनिधिरिव स एवायं प्रतिक्षणं मे नयनयोरभिनवो भवति ।

* **उभावित्यादि** । शरीरिणौ मूर्तौ । साक्षात् प्रत्यक्षौ । भावाविव नृत्याभिनेयार्थाविव ।

* **न च इत्यादि** । अयं राजा परिचितश्च नेति न किंतु परिचित एव ।

1. परस्परजयैषिणौ. 2. द्रष्टुमुद्यतौ 3 विवादिनौ. 4. चाप्यगम्यः.

सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ॥ ११ ॥

गणदासः— महत् खलु [1]पुरुषाकारमिदं ज्योतिः । तथा हि—

द्वारे नियुक्तपुरुषानुमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन् ।
तेजोभिरस्य विनिवर्तितदृष्टिपातै-
र्वाक्यादृते पुनरिव प्रतिवारितोऽस्मि ॥ १२ ॥

कञ्चुकी— एष देवः । उपसर्पतां भवन्तौ ।

उभौ— (उपसृत्य ।) विजयतां देवः ।

राजा— स्वागतं भवद्भ्याम् । (परिजन विलोक्य ।) आसने तावदत्रभवतोः ।

(उभौ परिजनोपनीतयोरासनयोरुपविष्टौ ।)

अरम्यः असौम्यश्च न किंतु रम्य एव । तथापि, चकितं सभयं यथा भवति तथा । अस्य । पार्श्वं समीपम् । उपैमि ।

पुरुषाकारं पुरुषस्वरूपम् । ज्योतिः राजमहिमा ।

द्वारे इति । द्वारे नियुक्तपुरुषानुमतप्रवेशः द्वारपालानुमतिकृतप्रवेशः । सिंहासनान्तिकचरेण पार्श्वस्थितावसराधिकारजनेन । सह सहितम् । उपसर्पन् । सङ्गतो वा समीपं गच्छन् । विनिवर्तितदृष्टिपातैः दृष्ट्युपघातकरैः । तेजोभिः पुनः । वाक्यात् ऋते वचनेन विना । प्रतिवारितोऽस्मि विनिवारित इव ।

* **द्वारे नियुक्तेत्यादि** । विनिवर्तितदृष्टिपातैः विनिवर्तितदृष्टिप्रसरैः । अस्य राज्ञः । तेजोभिः पुनः प्रभाविशेषैस्तु । वाक्यात् ऋते प्रतिषेधवाक्यं विना । वारितः निरुद्ध इवास्मि ।

1. पुरुषाधिकारं.

राजा— किमिदं शिष्योपदेशकाले युगपदाचार्ययोरुपस्थानम् ।

गणदासः— देव श्रूयताम् । मया [1]तीर्थादभिनयविद्या शिक्षिता । [2]दत्तप्रयोगश्चास्मि । देवेन देव्या च परिगृहीतः ।

राजा— [3]दृढं जाने । ततः किम् ।

गणदासः— सोऽहममुना हरदत्तेन प्रधानपुरुषसमक्षं [4]'अयं न मे पादरजसापि तुल्यः' इत्यधिक्षिप्तः ।

हरदत्तः— देव अयमेव मयि प्रथमं [5]परिवादकरः, अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरम्, इति । तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु । देव एव नौ विशेषज्ञः प्राश्निकः[6] ।

विदूषकः— समत्थं पडिण्णादं । समर्थं प्रतिज्ञातम् ।

गणदासः— प्रथमः कल्पः । अवहितो देवः श्रोतुमर्हति ।

शिष्योपदेशकालः गीतनृत्तोपदेशकालः । तीर्थात् उपाध्यायात् । अभिनयविद्या सङ्गीतविद्या । दत्तप्रयोगः कृतप्रयोगः । दत्तानुयोगः दत्तप्रश्नः । प्रधानपुरुषसमक्ष नियोगपुरुषाणां सन्निधौ । अधिक्षिप्तः न्यक्कृतः । परिवादरतः अपवादमुक्तवान् । शास्त्रे भरतशास्त्रे । प्रयोगे नाटकाभिनयसन्दर्शने । विशेषज्ञः हीनाधिकविशेषवित् । प्राश्निकः श्रोता, परीक्षितेत्यर्थः । प्रथमः कल्पः मुख्यः पक्षः ।

तीर्थान्मयेत्यादि । तीर्थात् गुरोः । अभिनयविद्या नाट्यविद्या । शिक्षिता अभ्यस्ता । दत्तप्रयोगश्चास्मि दत्तः शिष्येभ्यः प्रदिष्टः प्रयोगो येन तथोक्तः । प्रथमः कल्पः मुख्यः कल्पः ।

1. सुतीर्थाद .. 2. दृष्टप्रयोगोऽस्मि देव्या । देवेन च परिगृहीतः । ; दत्तप्रयोगो दत्तानुयोगश्चास्मि. 3. बाढ । जाने. 4. अयं मे पादरजसा तुल्यः. 5 परिवादरतः 6. प्राश्निकश्च.

राजा— तिष्ठतु[1] तावत् । पक्षपातमत्र देवी मन्यते । तत्तस्याः पण्डितकौशिक्या सहितायाः समक्षमेव न्याय्यो व्यवहारः ।

विदूषकः— सुट्ठु भवं भणाइ । सुष्ठु भवान् भणति ।

अचार्यौ— यद्देवाय रोचते ।

राजा— मौद्गल्य! अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाहूयतां देवी ।

कञ्चुकी— यदाज्ञापयति देवः ।

(इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविश्य ।)

इत इतो देवी[2] ।

देवी— (परिव्राजिकां विलोक्य ।) भअवदि हरदत्तस्स गणदासस्स अ संरम्भे कहं पेक्खसि ।

भगवति हरदत्तस्य गणदासस्य च संरम्भे[3] कथं पश्यसि ।

परिव्राजिका— अलं [4]स्वपक्षावसादशङ्कया । [5]न परिहीयते प्रतिद्वन्द्विनो गणदासः ।

देवी— जइ वि एव्वं, तह वि राअपरिग्गहो से पहाणत्तणं उवहरइ ।

यद्यप्येवम्, तथापि राजपरिग्रहोऽस्य प्रधानत्वमुपहरति ।

पण्डितकौशिकीति अन्तःपुराधिकारिणी काचित् । न्याय्यः प्राप्तः । प्रस्तावं उद्योगम् । परिव्राजिका संन्यासिनी । संरम्भे विवादे ।

* न्याय्यः युक्तः । व्यवहारो विवादः । कथं पश्यसि कथं मन्यसे । अनयोः कतरस्य पराजयं विचारयसीत्यर्थः । अलं स्वपक्षेत्यादि । परिव्राजिकायाः स्त्रीत्वात् प्राकृते प्राप्ते संस्कृताश्रयणं लिङ्गादिति मन्तव्यम् । 'देवद्विजनरेन्द्राणां लिङ्गिनां संस्कृतं वचः ।'

1. तिष्ठ तावत् । 2. भवती । 3. संरम्भ. 4. स्वपक्षपातश... 5. न च पराजीयते केनचित् गणदासः ।

परिव्राजिका— अयि, राज्ञीशब्दभाजनमात्मानमपि तावच्चिन्तयतु भवती। पश्य,

[1]**अतिमात्रभासुरत्वं पुष्यति भानोः परिग्रहादनलः।**
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः॥

विदूषकः— अविह अविह उवट्ठिदा पीठमद्दिअं पण्डिअकोसिअं पुरोकदुअ देवी।

[2]अविध! अविध! उपस्थिता पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य देवी।

राजा— पश्याम्येनाम्। यैषा

मङ्गलालंकृता भाति कौशिक्या यतिवेषया।

अतिमात्रेति। अनलः अग्निः। भानोः आदित्यस्य, परिग्रहात्, भानुतेजउपादानात्। अतिमात्रभास्वरत्वं अतिदीप्तिमत्त्वम्। पुष्यति संवर्धयति। चन्द्रोऽपि। निशापरिगृहीतः रात्रिं गतः। महिमान दीप्तिम्। अधिगच्छति अवाप्नोति।

पीठमर्दिकामिति। 'पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः। तस्यैवानुचरो भक्तः किञ्चिन्न्यूनश्च तद्गुणैः।' 'सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्। यथा च श्रीरामायणे सुग्रीववृत्तान्तः, यथा च श्रमणीवृत्तान्तः।'

मङ्गलेति। यतिरूपया सन्यासिरूपया। कौशिक्या सह। मङ्गलालङ्कृता कल्याणालङ्कारैरलंकृता, अथवा मङ्गलार्थं कल्याणार्थमलंकृता भूषिता। देवी भाति। त्रयी वेदः। विग्रहवत्या सशरीरया। अध्यात्मविद्यया पुराणादिज्ञानयोग्यविद्यया, सममिव।

* पीठमर्दो नाम कामपुरुषार्थसहायो नायकसमीपवर्ती पुरुषः। तदुक्तं—'पीठमर्दः समीपस्थः कार्यालोचनकोविदः।' इति। अत्र विदूषकः परिहासेन परिव्राजिकायां पण्डितकौशिक्यां तद्धर्ममारोपयतीति मन्तव्यम्।

* मङ्गलेति। मङ्गलं शोभनं यथा तथा अलकृता भूषिता। सैषा धारिणी।

---

1. अतिमात्रभास्वरत्वं पुष्यति भानुः परिग्रहादग्निः। 2. अयि भोः.

त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥ १४ ॥

परिव्राजिका—(उपसृत्य ।) विजयतां देवः ।

राजा— भगवति ! अभिवादये ।

परिव्राजिका—

महासारप्रसवयोः सदृशक्षमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम् ॥

देवी— जेदु अज्जउत्तो । जयत्वार्यपुत्रः ।

राजा—स्वागतं देव्यै । (परिव्राजिकां विलोक्य ।) भगवति ! क्रियतामासनपरिग्रहः ।

(सर्वे यथार्हमुपविशन्ति ।)

राजा—भगवति, अत्रभवतोर्हरदत्तगणदासयोः परस्परविज्ञानसंघर्षो जातः । तदत्र भगवत्या प्राश्निकपदमध्यासितव्यम् ।

यतेः परिव्राजिकस्य वेष इव वेषो वस्त्रादिधारणं यस्यास्तया । कौशिक्या । सभम् । भाति प्रकाशते । अत्रोपमामाह— विग्रहवत्या शरीरिण्या । अध्यात्मविद्यया सभम् । त्रयीव त्रिवेदीव । विग्रहवतीति, अत्रापि विभक्तिविपरिणामेन योजनीयम् ।

महासारेति । महासारप्रसवयोः अतिबलप्रभूतयोः । 'सारो बले स्थिरांशे च' अथवा महासाराणां प्रसवः उत्पत्तिस्थानमिति महासारप्रसवः । महाबलसुतानां धारिणी च, अतिस्थिरांशानां भूतधात्री भूमिश्च, उत्पत्तिस्थानमिति महासारप्रसवयोः । सदृशक्षमयोः समानतितिक्षयोः । धारिणीभूतधारिण्योः धारिणीदेव्याश्च भूतधारिण्याः भूम्याश्च । शरच्छतं संवत्सरशतम् । भर्ता नायको भव ।

प्राश्निकपदं व्यावहारिकपदम् ।

* **महासारेति** । महान् यः सारः वरः प्रसवः सन्तानः ययोस्तयोः । सदृशक्षमयोः सदृशी क्षमा सहत्वं ययोः ।

परिव्राजिका— (सस्मितम्।) अलमुपालम्भेन। पत्तने विद्यमानेऽपि ग्रामे रत्नपरीक्षा[1]।

राजा— मा मैवम्। पण्डितकौशिकी खलु भगवती। पक्षपातिनावनयोरहं च देवी च।

आचार्यौ— सम्यगाह देवः। मध्यस्था भगवती [2]गुणदोषौ नः परिच्छेत्तुमर्हति।

राजा— तेन हि [3]प्रस्तूयतां विवादः।

परिव्राजिका— देव! प्रयोगप्रधानं हि नाट्यशास्त्रम्। किमत्र वाग्व्यवहारेण।

राजा— कथं वा देवी मन्यते।

देवी— जइ मं पुच्छसि, एदाणं विवादो एव्व ण मे रुच्चइ।
यदि मां पृच्छसि, एतयोर्विवाद एव न मे रोचते।

गणदासः— [4]न मां देवी समानविद्यतः परिभवनीयमनुमन्तुमर्हति।

विदूषकः— होदु, देक्खामो उरब्भसंवादं। किं मुहा वेअणदाणेण।
[5]भवतु, द्रक्ष्याम [6]उरभ्रसंवादम[7]। किं मुधा वेतनदानेन।

देवी— णं कलहप्पिओसि। ननु कलहप्रियोऽसि।

विदूषकः— मा दाव। अण्णोण्णकलहिदाणं मत्तहत्थीणं एक्कदरस्सि अणिज्जिदे कुदो उवसमो।

पक्षपातिनौ स्वपक्षसहायौ। प्रक्रियतां आरभ्यताम्। उरभ्रसंपातं मेषयुद्धम्।

1. रत्नपरीक्षकाः। 2. नौ गुणदोषतः परिच्छेत्तुमर्हति। 3. प्रक्रियतां, 4. देवि, न मामभिनयविद्यातः परिभवनीय मन्तुमर्हसि। देवि, न मां समानविद्यतया परिहीनमवगन्तुमर्हसि। 5. देवि. 6. उदरभार... 7 ...संपातम्।

मा [1]तावत् । [2]अन्योन्यकलहितयोर्मत्तहस्तिनोरेकतरस्मिन्निर्जिते कुत उपशमः ।

राजा— ननु [3]स्वाङ्गसौष्ठवाभिनयमुभयोर्दृष्टवती भगवती ।

परिव्राजिका— [4]अथ किम् ।

राजा— तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम् ।

परिव्राजिका— तदेव वक्तुकामास्मि ।

[5]श्लिष्टा क्रिया कस्यचिदात्मसंस्था
संक्रान्तिरन्यस्य विशेषयुक्ता ।
यस्योभयं साधु स शिक्षकाणां
धुरि प्रतिष्ठापयितव्य एव ॥ १६ ॥

कलहितयोः कुपितयोः । उपशमः क्षमा । प्रत्याययितव्य विश्वासयितव्यम् । 'प्रत्ययोऽधीनशपथज्ञानावश्वासहेतुषु ।'

शिष्टेति । कस्यचित् एकस्य । आत्मसस्था हृदि स्थिता । शिष्टा क्रिया उत्तमप्रयोगः । अन्यस्यैकस्य । सक्रान्तिः उपदेशः । विशेषयुक्ता सोत्कर्षसुखावबोध्या । अथवा, कस्यचित् । शिष्टा क्रिया । हृदि स्थिता भवति । कस्यचिदन्यस्य । सक्रान्तिः उपदेशः । विशेषयुक्ता उत्कर्षसहिता सुखबोद्धव्या भवति । यस्य कस्यचित् उभयं आत्मसस्थान सक्रान्तिश्च । साधु सुबोध यथा सुकर वा । सः । शिक्षकाणां निपुणोपाध्यायानाम् । धुरि अग्रे । प्रतिष्ठापयितव्यः गणनीय इत्यर्थः ।

श्लिष्टेत्यादि । कस्यचित् पुरुषस्य । क्रिया शिक्षा, विद्याभ्यास इत्यर्थः । आत्मसस्था आत्मनिष्ठा सती । श्लिष्टा सगता रम्या, भवतीत्यर्थः । अन्यस्य पुरुषस्य । सक्रान्तिः शिष्येषु क्रियासंक्रमणम् । सक्रान्तिशब्दस्तु अन्तर्भावितण्यर्थः । विशेषयुक्ता अतिशयवती । यस्य पुरुषस्य । उभय आत्मसंस्थितिः

1. चण्डि. 2. अन्योन्यकलहप्रिययोर्मत्तहस्तिनोरिवै... 3. स्वाङ्गसौष्ठवमुभ ; स्वाङ्गसौष्ठवातिशयमुभ .. 4. किमावाभ्यां. 5. शिष्टा.

विदूषकः— सुदं भअवदीए वअणं अज्जेहिं । एसो पिण्डिदत्थो उवदेसदंसणेण णिण्णओत्ति ।

श्रुतं भगवत्या वचनमार्याभ्याम्[1] । एष पिण्डितार्थः, उपदेशदर्शनेन निर्णय इति ।

हरदत्तः— परमुचितं नः ।

गणदासः— [2]देवि ! एवं स्थितम् ।

देवी— जदा उण मन्दमेहा सिस्सा उवदेसं मलिणेदि, तदा आआरिअम्स दोसो णं ।

यदा पुनर्मन्दमेधा[3] शिष्योपदेशं मलिनयति, तदा आचार्यस्य दोषो नु[4] ।

राजा[5]— देवि ! एवमुपपद्यते ।

गणदासः— विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति ।

देवी—(स्वगतम् ।) कहं दाणिं । (गणदास विलोक्य, जनान्तिकम् ।) अलं अज्जउत्तस्स उच्चाहकालणं मणोरहं पूरिअ । (प्रकाश) विरम णिरत्थआदो आरम्भादो ।

परसक्रमण च । साधु रम्यम् । सः पुरुष एव । शिक्षकाणां उपदेशकानाम् । धुरि अग्रे । प्रतिष्ठापयितव्यः प्रतिष्ठां प्रापयितव्यः ।

पिण्डितार्थः मथितार्थः । मन्दमेधा अल्पबुद्धिः । मलिनयति याथार्थ्यं न जानाति । आचार्यदोषः उपाध्यायायामामर्थ्यम् । अद्रव्य अयोग्य द्रव्यम् । 'द्रव्य गुणानामाधारे भेषजे योग्यवित्तयोः' इति यादवः ।

श्रुतमिति । अत्र मालविकादर्शनसन्देहनिर्णयाद्युक्तिरिति सन्ध्यङ्गमुक्त भवति । नु प्रश्ने ।

1 आचार्याभ्यां. 2 देव, एव स्थितमेव । 3....मेधाविनी. 4. ननु. 5. **राजा**—देवि ! एवमापद्यते । विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघव प्रकाशयति ।

कथमिदानीम । अलमार्यपुत्रस्योत्साहकारणं मनोरथं पूरयित्वा । विरम निरर्थकादारम्भात् ।

विदूषकः— सुट्ठु होदी भणादि । भो गणदास ! सङ्गीदावदेसेण सरस्सईउवाअणेमादआइ खादमाणस्स किं दे सुलहणिग्गहेण विवादेण ।

[1]सुष्ठु भवती भणति । भो गणदास ! संगीतोपदेशेन सरस्वत्युपायनमोदकानि खादतः किं ते सुलभनिग्रहेण विवादेन ।

गणदासः— सत्यमयमेवार्थो देवीवचनस्य । श्रूयतामवसरप्राप्तमिदम् ।

लब्धास्पदोऽस्मीति विवादभीरो-
स्तितिक्षमाणस्य परेण निन्दाम् ।
यस्यागमः केवलजीविकैव[2]
तं ज्ञानपण्यं वणिजं वदन्ति ॥ १७ ॥

देवी— अइरोवणीदा दे सिस्सा । ता अवरिणिट्ठिदस्स उवदेसस्स अण्णाअं पदंसणम् ।

मनोरथं अभिलाषम् । निरर्थकात् आरम्भात अप्रयोजनोद्योगात् । उपायनमोदकानि उपहारार्थानि मोदकानि । खादतः भक्षयमाणस्य । अवसरप्राप्तं कालोचितम् ।

लब्धेति । लब्धास्पदोऽस्मीति लब्धप्रतिष्ठोऽस्मीति कृतकृत्योऽस्मीति । विवादभीरोः तर्कभीतस्य । परेण । निन्दां अवमानम् । तितिक्षमाणस्य यस्य पुरुषस्य । आगमः शास्त्रम् । केवलजीविकैव जीवनार्थमात्रमेव । तम् । ज्ञानपण्यं ज्ञानविक्रेयम् । पण्यं विक्रेयं द्रव्यम् । वणिजं नैगमम् । वदन्ति ।

1. संगीतोपदेशमारभ्य सर... 2. जीविकायै.

अचिरोपनीता ते शिष्या । तदपरिनिष्ठितस्योपदेशस्याऽन्याय्यं प्रदर्शनम्[1] ।

गणदासः— अत एव मे निर्बन्धः ।

देवी— तेण हि दुवे वि भअवदीए उवदेस दंसेह ।
तेन हि द्वावपि भगवत्या उपदेशं दर्शयतम ।

परिव्राजिका— देवि! नैतन्न्याय्यम् । सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय ।

देवी— [2](आत्मगतम ।) मुद्धे कि मं जग्गदिं वि सुत्तं विअ करेसि ।
(इति सासूय परावर्तते ।)
मुग्धे! किं मां जाग्रतीमपि सुप्तामिव करोषि ।
(राजा देवी परिव्राजिकायै दर्शयति ।)

परिव्राजिका— (विलोक्य)

अनिमित्तमिन्दुवदने किमत्रभवतः पराङ्मुखी भवसि ।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः ॥ १८ ॥

विदूषकः— णं करणादो एव्व । अत्तणो पक्खो रक्खिवदव्वोत्ति ।
(गणदास विलोक्य ।) दिट्ठिआ कोवव्वाएण देवीए परित्तादो भवं । सुसिक्खिदो वि सव्वो उवदेसदंसणे ण णिउणो होदि ।

अपरिनिष्ठितस्य अप्रतिष्ठितस्य । अन्याय्य न प्राप्तम् । निर्णयाभ्युपगमः व्यवहारनिर्णयः ।

अनिमित्तमिति । हे इन्दुवदने चन्द्रमुखि । अत्र भवतः अस्य राज्ञः । किम्, पराङ्मुखी परावृत्तवदना । भवसि । कुटुम्बिन्यः स्त्रियः । भर्तृषु नायकेषु । प्रभवन्त्यः प्रभूभवन्त्योऽपि । कारणकोपा कोपकारणकुपिताः ।

1. प्रकाशनम्. 2. (जनान्तिक) मूढे परिव्राजिके!

ननु [1]कारणादेव, आत्मनः पक्षो रक्षितव्य इति । दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान । सुशिक्षितोऽपि सर्व [2]उपदेशदर्शने न निपुणो भवति ।

गणदासः— देवि! श्रूयताम् । एवं जनो गृह्णाति । तदिदानीं

विवादे दर्शयिष्यन्तं[3] क्रियासंक्रान्तिमात्मनः ।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया ॥ १९ ॥

(आसनादुत्तिष्ठति ।)

देवी — (स्वगतम् ।) का गई । (प्रकाशम् ।) पहवदि आआरिओ सिम्सअणस्स ।

का गतिः । [4]प्रभवत्याचार्यः शिष्यजनस्य ।

गणदासः— चिरमपदे शङ्कितोऽस्मि । (राजानमवलोक्य ।) अनुज्ञातं देव्या । तदाज्ञापयतु देवः । [5]कस्मिन्नभिनेयवस्तुन्युपदेशं दर्शयिष्यामि ।

राजा— यदादिशति भगवती ।

परित्रातः रक्षितः ।

विवाद इति । विवादे अन्योन्यकलहे । आत्मनः मम । क्रियासंक्रान्ति प्रयोगशिक्षाम् । दर्शयिष्यन्त प्रयोगदर्शन करिष्यन्तम् । माम् । अनुजानासि न यदि अनुज्ञां न करिष्यसि यदि । त्वया । अहम् । परित्यक्तोऽस्मि परिमुक्तोऽस्मि ।

* नन्वित्यादि । अत्र देवीकोपेन विच्छेदे प्राप्ते विदूषककृतप्रोत्साहन उत्तराङ्कोपयोगित्वेन अविच्छेदकारणत्वाद्विन्दुरित्यनुसन्धेयम् ।

अपदे अस्थाने । उपदेशवस्तुनि नाट्यप्रयोगे ।

---

1 सकारणमेव. 2. उपदेशे न निष्णातो भवति. 3. दर्शयिष्यामि. 4. प्रभवत्वार्यः. 5. कतमस्मिन्नुपदेशवस्तुनि प्रयोग दर्श...

परिव्राजिका— किमपि देव्या मनसि वर्तते । तच्छङ्कितास्मि ।

देवी— भण विस्सद्धम् । णं पहविस्सं अत्तणो परिअणस्स ।
भण विस्रब्धम् । ननु प्रभविष्याम्यात्मनः परिजनस्य ।

राजा— मम चेति ब्रूहि ।

देवी— भअवदि भण दाणिं । भगवति ! भणेदानीम् ।

परिव्राजिका— चतुष्पदोद्भवं [1]चलितं दुष्प्रयोजमुदाहरन्ति । तत्रै-
[2]कार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्रभ-
वतोरुपदेशान्तरम्[3] ।

उभौ— यदाज्ञापयति भगवती ।

विदूषकः— देण हि दुवे वि वग्गा पेक्खाघरए सङ्गीदरअणं कदुअ अत्तहोदो दूदं पेसअन्तु । अहवा मिअङ्कसद्दो एव्व णो उट्ठावइस्सदि ।

तेन हि [4]द्वावपि वर्गौ प्रेक्षागृहे संगीतरचनां [5]कृत्वात्र-
भवतो दूतं [6]प्रेषयताम् । अथवा मृदङ्गशब्द एव न उत्थापयिष्यति ।

हरदत्तः— तथा । (इत्युत्तिष्ठति ।)

(गणदासो देवीं विलोकयति ।)

चतुष्पदोद्भवं चतुर्विधाभिनयोद्भूतम्, अथवा चतुर्भिः पदैः सम्पन्नम् । चलितं नाम नाट्यम् । एकार्थसङ्गतं एकस्थानसङ्गतम् । उपदेशान्तरं सामर्थ्यातिशयम् । प्रेक्षागृहे नाटकशालायाम् । अत्र भवन्त इति, राजा धारिणी परिव्राजिका चोच्यन्ते ।

---

1. छलितमुदाहरन्ति. 2. ...संगतमुभयोः. 3. उपदेशतारतम्यम्. 4 द्वयेऽपि वर्ग्याः । 5. कृत्वात्रभवतो दूतान्प्रेषयन्तु । 6. प्रेषयतम्

देवी— ण खु विअअपच्चत्थिणी अहं अज्जस्स । विअई होहि ।

न [1]खलु विजयप्रत्यर्थिन्यहमार्यस्य । विजयी भव ।

(उभौ प्रस्थितौ ।)

परिव्राजिका— इतस्तावदाचार्यौ ।

उभौ— (परिवृत्य ।) इमौ स्वः ।

परिव्राजिका— निर्णयाधिकारे ब्रवीमि । सर्वाङ्गसौष्ठवाभिव्यक्तये [2]विरलनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु ।

आचार्यौ— नेदमावयोरुपदेश्यम् । (इति निष्क्रान्तौ ।)

देवी— (राजानमवलोक्य ।) जइ राअकज्जेसु वि ईरिसी उवाअणिउणदा अज्जउत्तस्स तदा सोहणं हवे ।

यदि [3]राजकार्येष्वपीदृश्युपायनिपुणतार्यपुत्रस्य, तदा शोभनं भवेत् ।

राजा— देवि!

अलमन्यथा गृहीत्वा
न खलु मनस्विनि मया प्रयुक्तमिदम् ।

सर्वाङ्गसौष्ठवाभिव्यक्तये सर्वाङ्गसौन्दर्यदर्शनाय । विगतनैपथ्ययोः त्यक्तालङ्कारयोः । पात्रयोः मालविकेरावल्योः पात्रयोः । प्रवेशः गृहप्रवेशः ।

अलमिति । अन्यथा गृहीत्वा छलोक्त्या । अलम् । हे मनस्विनि । इदं नाटकदर्शनम् । मया । न प्रयुक्तं नोक्तम् । तथाहि । समानविद्याः अन्योन्यसदृशनाटकविद्याः । प्रायः अत्यर्थम् । परस्परयशःपुरोभागा हि अन्योन्यं यशसि दोषदर्शिनः, साभ्यसूया इत्यर्थः ।

* सर्वाङ्गेत्यादि । अत्र गुणवत्त्वस्य गम्यमानत्वाद्विलोभन नाम सन्ध्यङ्गमुक्तं भवति । यदि इत्यादि । अत्र गूढार्थोद्भेदनाद्भेदो नाम सन्ध्यङ्गमुक्तम् ।

1. विजयप्रत्यर्थिनी साहमार्यस्य. 2. विगतनैपथ्ययोः. 3. राजकार्येषु एवं निपुणता ततः शोभन.

प्रायः समानविद्याः
परस्परयशःपुरोभागाः ॥ २० ॥

(नेपथ्ये मृदङ्गशब्दः । सर्वे कर्णं ददति ।)

परिव्राजिका— हन्त, प्रवृत्तं संगीतकम् । तथा ह्येषा,

जीमूतस्तनितविशङ्किभिर्मयूरै-
रुद्ग्रीवैरनुरसितस्य पुष्करस्य ।

सङ्गीत गानाद्यारम्भः ॥

जीमूतेति । जीमूतस्तनितविशङ्किभिः, जीमूतस्तनित मेघघोषः । 'स्तनित गर्जितं मेघनिर्घोषो रसितानि च ।' मेघघोष इति शङ्कितैः । उद्ग्रीवैः ऊर्ध्वमुद्धृतगलैः । 'कण्ठो गलोऽथ ग्रीवायाम् ।' मयूरैः बर्हिभिः । अनुरसितस्य पश्चात्सहशब्दितस्य । पुष्करस्य वाद्यभाण्डमुखस्य । 'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।' उपहितमध्यमस्वरेति पदच्छेदः । उपहितमध्यमस्वरा मध्यमस्वरसहिता । 'निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्च' उक्ता उत्थिता । मायूरी मार्जना मार्जनाविशेषः । 'मायूरीचार्धमायूरी तथा मायूरवी ततः । तिस्रस्तु मार्जनाः प्रोक्ताः' मार्जनेति वादनाय वाद्यभाण्डमुखेषु अङ्गुलीव्यापारः । एवंभूता निर्ह्रादिनी शब्दवती । 'स्याननिर्घोषनिर्ह्राद' इत्यमरः । मनांसि । मदयति ।

* **जीमूतस्तनितेत्यादि** । जीमूतस्तनितविशङ्किभिः जीमूतस्य स्तनित गर्जितं विशङ्कन्त इति विशङ्किनः तैः । उद्ग्रीवैः उत्कण्ठैः । मयूरैः । अनुरसितस्य अनुध्वनितस्य । पुष्करस्य वाद्यभाण्डमुखस्य । मायूरी मयूरप्रिया । मार्जना । मनांसि । मदयति हर्षयति । कीदृशी मार्जना । उपहितमध्यमस्वरोत्था उपहितः संयोजितः मध्यमस्वरः मध्यमसंचितस्वरः तस्मादुत्तिष्ठति उदेतीति तथोक्ता । निर्ह्रादिनी अतिशयितनिनादा । मार्जना पुष्करवादनाविशेषः । तथा चोक्तं भारतीये । 'षोडशाक्षरसंपन्नं चतुर्मार्गं तथैव च । द्विलेपनं षट्करणं त्रियति त्रिलयं तथा । त्रिगतं त्रिप्रचारं च त्रिसंयोगं त्रिपाणिकम् । दशार्धपाणिप्रहतं त्रिप्रहारं त्रिमार्जनम् । एभिरङ्गैस्तु संपन्नं वाद्यं पुष्करजं भवेत् ॥' तत्र 'मायूरी चार्धमा-

[1]निर्हादिन्युपहितमध्यमस्वरोत्था
मायूरी मदयति मार्जना मनांसि ॥ २१ ॥

राजा— देवि ! [2]सामाजिका भवामः ।

देवी — (स्वगतम्) अहो अविणयो अज्जउत्तस्स ।
अहो, अविनय आर्यपुत्रस्य ।
(सर्वे उत्तिष्ठन्ति ।)

विदूषकः — (अपवार्य ।) भो वयस्स धीरं गच्छ । मा तत्तहोदी धारिणी विसंवादइस्सदि ।
भो वयस्य ! धीरं गच्छ । मा तत्रभवती धारिणी विसंवादयिष्यति ।

राजा—
धैर्यावलम्बिनमपि
त्वरयति मां मुरजवाद्यरागोऽयम्[3] ।

यूरी तथा कार्मारवीति च । तिस्रस्तु मार्जना ज्ञेयाः पुष्करेषु स्वराश्रयाः ॥ गान्धारो वामके कार्यः षडजो दक्षिणपुष्करे । मध्यमश्चोर्ध्वके कार्यो मायूर्यास्तु स्वरास्त्वमी ॥ वामके पुष्करे षटज ऋषभो दक्षिणे तथा । धैवतश्चोर्ध्वके चार्धमायूर्या निर्दिशेद्बुधः । ऋषभः पुष्करे वामे षडजो दक्षिणपुष्करे । पञ्चमश्चोर्ध्वके कार्यः कार्मारव्याः स्वरा अमी ॥' इति ।

सामवायिकाः सभासदः । विसवादयिष्यति, विसवादः अनुकरण तव मनोरथस्य मालविकायाम ।

धैर्येति । अय मुरजवाद्यरागः मृदङ्गघोषश्रवणाभिलाषः । धैर्यावलम्बिन कृतधैर्यमपि । माम । त्वरयति द्रष्टु गच्छेति त्वरयति । सिद्धिपथ अवतरतः मोक्षमार्ग गच्छतः । स्वमनोरथस्य स्वाभिलाषस्य । शब्द इव ।

1 निर्णादिन्यु .. 2. सामवायिकाः 3. नादोऽयम् ।

अवतरतः सिद्धिपथं[1]
शब्दः स्वमनोरथस्येव ॥ २२ ॥

[इति निष्क्रान्ताः सर्वे ।

इति प्रथमोऽङ्कः ।

* **धैर्यावलम्बिनमिति** । अयं मुरजवाद्यरागः मुरजवाद्यस्य रञ्जकत्वम् । धैर्यावलम्बिनमपि । माम् । त्वरयति संभ्रमयति । सिद्धिपथं सिद्धिमार्गम् । अवतरतः । स्वमनोरथस्य आत्मवाञ्छितस्य । शब्द इव ध्वनिरिव ॥

* अत्र बीजस्य पुनरावर्तनात्समाधानं नाम सन्ध्यङ्गमुक्तम् । अत्रैव सुखागमनस्य गम्यमानत्वात् प्राप्तिर्नाम सन्ध्यङ्गमुक्तं भवति । अत्रोपक्षेपादिषु सन्ध्यङ्गेषु कतिचिदेव कविनोक्तानि नेतराणि, तथापि न दोषः । 'न्यूनमप्यत्र यैः कैश्चिदङ्गैर्नाट्यं न दुष्यति । यद्युपात्तेषु संपत्तिराराधयति तद्विदः ।' इति वचनात् । अत्र नृत्तदर्शनानिश्चयान्ते प्रथमाङ्कार्थे समाप्तेऽपि तमसमाप्यैव उत्तराङ्कादौ विष्कम्भादिप्रतिपाद्यमानायाः सगीतरचनाया अत्रैव निपातनादङ्कावतरणं नाम अर्थोपक्षेपकमुक्तं भवति । तथा चोक्तम्— अङ्कावतारस्त्वङ्कान्ते पात्रेणाङ्कस्य सूचनात्' इति ।

1. पदं.



द्वितीयोऽङ्कः ॥



(ततः प्रविशति सङ्गीतरचनायां कृतायामासनस्थः सवयस्यो राजा धारिणी परिव्राजिका विभवतश्च परिवारः ।)

राजा— भगवति! अत्रभवतोराचार्ययोः कतरस्य प्रथममुपदेशं द्रक्ष्यामः ।

परिव्राजिका— ननु समानेऽपि ज्ञानवृद्धभावे [1]वयोवृद्धत्वाद्गणदासः पुरस्कारमर्हति ।

राजा— तेन हि मौद्गल्य, एवमत्रभवतोरावेद्य स्वनियोगमशून्यं कुरु ।

कञ्चुकी— यदाज्ञापयति देवः । [इति निष्क्रान्तः ।

(प्रविश्य ।)

गणदासः— देव! शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदा[2] ।

ज्ञानवृद्धः प्रज्ञया वृद्धः । पुरस्कारं प्रथमदर्शनसंमानम् । प्रथमभावित्वं च कृत्रिमविधानम् । लयमध्येत्यादि । चतुष्पदा चतुर्भिः पदैः निबद्धा । तद्योगरूढम् ।

* भगवति, अत्रभवतोरित्यादिना गणदासः पुरस्कारमर्हति इत्यन्तेन राज्ञा उपायेन मालविकादर्शनप्रवर्तनं प्रयत्नो नाम द्वितीयावस्थेति मन्तव्यम् । अत्र बिन्दुप्रयत्नयोः समन्वयात् प्रतिमुखसन्धिरित्यनुसन्धेयम् ।

* देव शर्मिष्ठाया इत्यादि । शर्मिष्ठा नाम वृषपर्वणो राक्षसराजस्य दुहिता । तस्याः कृतिः काव्यम् । लयमध्या लयेन तालकालेन मध्या मध्यलययुक्ता । चतुष्पदा चत्वारि पदानि यस्याः सा ।

---

1. वयोऽधिकत्वा... 2. चतुष्पदास्ति.

तस्याश्चतुर्थवस्तुकं[1] प्रयोगमेकमनाः श्रोतुमर्हति देवः ।

राजा— आचार्यबहुमानादवहितोऽस्मि ।

(निष्क्रान्तौ गणदास ।)

राजा— (जनान्तिकम् ।) वयस्य !

[2]नेपथ्यगृहगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करणीम्[3] ॥ १ ॥

विदूषकः— (अपवार्य ।) भो उवट्ठिदं णअणमहु । सण्णिहिअक्खिअ अ । ता अप्पमत्तो दाणिं पेक्खदु भवम् ।

चतुर्थवस्तुक चतुर्थरूपकम् । 'प्रबन्धो रूपक वस्तु निबन्धः स्यादथ त्रयम् ।'

नेपथ्येति । नैपथ्य यवनिकान्तर्गृहमभ्यम् । नेपथ्यगृहगतायाः । तस्याः । दर्शनसमुत्सुक अवलोकनसाभिलाषम । मे चक्षु. । अधीरतया अदृढत्वेन । राजा इति गौरवमुज्झित्वा, तिरस्करणी यवनिकाम् । सहर्तुम् । व्यवसितमिव उद्योगितमिव ॥ १ ॥

* तस्याः कृतेः सबन्धिन', चतुर्थस्य तुरीयस्य वस्तुन प्रबन्धस्य । प्रयोग अभिनयम् । एकमनाः अवहितः मन । श्रोतुम अर्हति ॥ अत्र शृङ्गाररसत्वात् लयमध्येत्युक्तम् । तथाचोक्त भारतीये, 'शृङ्गारहास्ययोर्मध्यलयः, करुणे विलम्बितः, वीररौद्राद्भुतबीभत्सभयानकेषु द्रुतः' इति ।

* **नेपथ्येति** । नेपथ्यपरिगतायाः यवनिकान्तरितायाः । तस्याः मालविकायाः । दर्शनसमुत्सुक अवलोकनोत्कण्ठितम् । मे चक्षुः । अधीरतया तरलतया । तिरस्करिणी यवनिकाम् । सहर्तुं अपनेतुम् । व्यवसितमिव उद्युक्तमिव । अत्र इष्टार्थविषयेच्छया विलासो नाम सन्ध्यङ्गमुक्तम् ।

---

1. चतुर्थवस्तुनः प्रयोग ; चतुष्पदवस्तुकप्रयोग ; तस्यास्तु छलिकप्रयोग.
2 नेपथ्यपरिगतायाः... 3. तिरस्करिणीम्.

उपस्थितं नयनमधु । [1]संनिहितमक्षिकं च । तदप्रमत्त इदानीं प्रेक्षतां भवान् ।

ततः प्रविशत्याचार्यप्रत्यवेक्ष्यमाणाङ्गसौष्ठवा[2] मालविका ।)

विदूषकः— ([3]जनान्तिकम् ।) पेक्खदु भवं । ण खु से पडिच्छन्दादो परिहीअदि महुरदा ।

प्रेक्षतां भवान । न ख्वस्या: प्रतिच्छन्दात् परिहीयते मधुरता ।

राजा— (जनान्तिकम् ।) वयस्य !

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् ।

असन्निहितमाक्षिक मक्षिकारहितम् । सौष्ठवाङ्गं शोभनाङ्गम् । प्रतिच्छन्दात् चित्रप्रतिकृतेः ।

* ततः प्रविशतीत्यादि । 'आचार्यावेक्ष्यमाणङ्गसौष्ठवा आचार्येण अवेक्ष्यमाण अङ्गानां सौष्ठव यस्याः सा तथोक्ता । सौष्ठव नाम अङ्गानां शोभन अवस्थानविशेषः । यथोक्तम् । 'अनुवर्नाचचलतामङ्गानां समपादताम् । कटिकूपरशीर्षांसकण्ठानां समरूपताम् । रम्यां प्रतीकविश्रान्तिमुरसश्च समुन्नतिम् । अभ्यासोपहितां प्राहुः सौष्ठवं नृत्यवेदिनः ॥'

* पश्यतु भवानिति । अत्र अपवार्येत्येतत् नियतश्राव्यार्थभेदस्य अपवारितस्य विवक्षितत्वे कविना प्राक् प्रयुक्तमिति मन्तव्यम् । यथोक्तं वसन्तराजीये अर्थस्त्वेकेन विज्ञेयो नियतश्राव्य इष्यते । द्विविधः स परिज्ञेयो जनान्तश्चापवारितः ।' अत्र 'परैरलक्ष्यव्यापारं कथितोऽर्थोऽपवारितः । उक्ता प्रागपवार्येति पश्चादेनं प्रयोजयेत् ।' इति ।

चित्रगतायामिति । अस्या मालविकायाम् । चित्रगतायां सत्याम् । मे हृदयं मनः । कान्तिविसंवादशङ्कि प्रतिकृतिशोभा तस्या मालविकायाः रूपलावण्यशोभासदृशी वा, असदृशी वेति सन्देहयुक्तम् । येन चित्रकारिणा । इयम् ।

---

1. असंनिहितमाक्षिकञ्च । 2. ...णसौष्ठवाङ्गं 3. अपवार्य ।

संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥ २ ॥

गणदासः— वत्से! मुक्तसाध्वसा [1]सत्त्वस्था भव।

राजा— (आत्मगतम्।) अहो [2]सर्वास्ववस्थास्वनवद्यता रूपस्य।

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।

आलिखिता चित्रे लिखिता। त चित्रकारिणम्। सम्प्रति इदानीम्। शिथिलसमाधि यथोक्तं लिखितुमसमर्थं इति। मन्ये। समाधिः अधिष्ठानसामर्थ्यम्, शिथिलं गलितम् ॥ २ ॥

* **चित्रगतायामित्यादि**। मे। हृदय मन.। चित्रगताया आलेख्यगतायाम्। अस्यां मालविकायाम्। कान्तिविसवादशङ्कि कान्तेः शोभाया विसवाद विपर्यास शङ्कित इति तथोक्तम्। सम्प्रति इदानीम्। साक्षाद्दर्शनवेलायामित्यर्थः। इय मालविका। येन चित्रकारेण। आलिखिता। त चित्रकारम्। शिथिलसमाधि शिथिलप्रयत्नम्। मन्ये जानामि ॥ २ ॥

मुक्तसाध्वसा त्यक्तजाड्या, त्यक्तभया वा। सत्त्वस्था स्वभावस्थिता। यद्वा धीरा भव।

मुक्तसाध्वसा परित्यक्तभया, समाकम्परहितेत्यर्थ.। सत्त्वस्था सत्त्वगुणयुक्ता, अविकृता भवेत्यर्थः। यथोक्त 'चित्तस्याविकृतिः सत्त्व विकृतेः कारणं सति' इति। अत्र विकृतिकारण नायकसन्निधि.। अहो इत्याश्चर्ये। सर्वस्थानानवद्यता सर्वेषु स्थानेषु सर्वावयवेषु अनवद्यता निर्दोषता रमणीयतेत्यर्थः ॥

दीर्घाक्षमिति। वदन मुखम्। दीर्घाक्ष कर्णान्तायतलोचनम्। शरदिन्दुकान्ति शरच्चन्द्रकोमलम्, मधुर वा। बाहू भुजौ। असयोः स्कन्धयोः। नतौ नमितौ। उरः वक्षः। निबिडोन्नतस्तनं तुङ्गपीनस्तनत्वात् संक्षिप्त संक्षेपितम्। स्तनयोरवकाशमात्रमेव, शेषः किमपि नास्त्येवेत्यर्थः। पार्श्वे उरःपार्श्वे। प्रमृष्टे श्लक्ष्णीकृते इव। मध्यः अवलग्नः। प्राणिमितः मुष्टिमात्रम्, पाण्यवलम्बनमात्र

1. सत्त्वमस्था 2 सर्वस्थानानवद्यता रूपस्य, तथा हि।

मध्यः पाणिमितो नितम्बि[1] जघनं पादावरालांगुली
छन्दो नर्तयितुर्यथैव मनसि[2] श्लिष्टं तथास्या वपुः ॥

मालविका— (उपवहनं[3] कृत्वा चतुष्पद वस्तु गायति)

दुल्लहो पिओ तस्सिं भव हिअअ णिरासं
अम्हो अपङ्गओ मे पप्फुरइ किंवि वामओ।
एसो सो चिरदिट्ठो कहं उवणइदव्वो
णाह मं पराहीणं तुइ गणअ सतिण्हम् ॥ ४ ॥

मेव । जघन पुरोभाग । नितम्बः पश्चाद्भागः, मांसलनितम्बमित्यर्थः । पादौ चरणौ । अरालाङ्गुली कुञ्चिताङ्गुली । नर्तयितुः नृत्ताचार्यस्य । मनसि । यथैव । छन्दः आशयव्यापारः । अथवा स्वाभिमतम् । अस्या मालविकायाः । एवं भूत वपुः । तथैव । श्लिष्टम् सक्तम, व्यापारितमित्यर्थः ॥ ३ ॥

* दीर्घाक्षमित्यादि । वदन मुखम् । दीर्घाक्ष दीर्घे आयते अक्षिणी लोचने यस्य तत्तथोक्तम् । शरदिन्दुकान्ति शरदिन्दोः शरच्चन्द्रस्य कान्तिरिव कान्तिर्यस्य तत्तथोक्तम् । बाहू भुजौ । असयोः स्कन्धयोः । नतौ नम्रौ । मध्यः अवलग्नं । पाणिमितः पाणिना हस्तेन मितः परिमितः । जघनम् । नितम्बि नितम्बातिशय-युक्तम् । पादौ चरणौ । अरालाङ्गुली अराला आकुञ्चिता अङ्गुलयः ययोस्तौ तथोक्तौ । अस्याः मालविकायाः । वपुः शरीरम् । नर्तयितुः नृत्ताचार्यस्य । छन्दः अभिप्रायः । यथा यादृशः । तथा तेन प्रकारेण । श्लिष्टं संगतम् । अनेन नर्तक्या नृत्तारम्भोचितावस्थानविशेषः उक्तः । तथा चोक्तं वसन्तराजीये— 'अङ्गस्य चतुरस्रत्वं समपादौ लताकरौ । आरम्भे सर्वनृत्तानामेतत्सामान्यमिष्यते ॥' इति ।

उपवहनं कृत्वा 'उपोह्यते स्वरो यस्मात्तत्तूपवहनं स्मृतम ।' चतुष्पदं वस्तु चतुष्पदरूपं पद्यम् ।

* उपगानं रागलप्तिम् । कृत्वा । चतुष्पदवस्तु चतुष्पदमङ्गक प्रबन्धम । गायति । वस्त्विति प्रबन्धः । 'प्रबन्धो रूपकं वस्तु निबन्धस्याभिधा त्रयम ।' इत्युक्तत्वात् ।

1. अमितं च, नतं च. 2. मनसः, मनसा. 3. उपगानं

[[1]इति यथारसमभिनयति ।

दुर्लभः प्रियस्तस्मिन् भव हृदय निराशम्
अहो अपाङ्गको मे [2]प्रस्फुरति किमपि वामकः ।
एष स चिरदृष्टः कथमुपनेतव्यः[3]
नाथ मां पराधीनां त्वयि गणय सतृष्णाम् ॥

दुर्लभ इति । दुर्लभः लब्धुमशक्यः प्रियः नायकः । तस्मिन् प्रिये । निराशं निर्गताभिलाषम् । भव । अहो अह्नो इति वा आश्चर्ये । मे । अपाङ्गः कटाक्षः । प्रस्फुरति स्पन्दते । चिरदृष्टः चिरकालदृष्टः । स एषः । कथमुपनेतव्यः । हे नाथ । माम् । पराधीनां परवशां । त्वयि । सतृष्णां साभिलाषाम् । गणय विचारय ॥ ४ ॥

* ततः गानानन्तरम् । यथारसं रसानुकूलम् । अभिनयति । अत्र रसस्तु अयोगविप्रलम्भशृङ्गारः । 'अप्राप्तिर्विप्रलम्भः स्यादूनोर्जातामिलाषयोः । विप्रलम्भस्य भेदाः स्युरयोगो विरहस्ततः । प्रवासः शापकरुणमानसाश्चेति षण्मताः ।' तत्र 'संप्राप्तेः प्रागभावो यस्तमयोगं प्रचक्षते' इति । अत्र चतुष्पद्यां क्रमेण पादचतुष्टये निर्वेदः सविस्मयो हर्षः चिन्ता दैन्यं चेति भावास्तत्तदनुभावैर्मुखरागादिभिः सम्यक् प्रदर्शिता इत्यनुसंधेयम् । तेषां लक्षणमुक्तं वसन्तराजीये— 'इष्टार्थविरहव्याधिनिन्दापदवमाननैः । दारिद्र्यताडनाक्षेपपरवृद्धयवलोकनैः । निष्फलत्वमतिर्नृणां निर्वेदो भावितादिषु ।' अत्र इष्टार्थविरहजनितो निर्वेदः । 'अन्तर्हर्षोद्गमध्यानविश्वासस्खलमाननैः । दैन्यगद्गदवैस्वर्यैरभिनेयो भवेदयम् ।' 'हर्षो मनःसमुल्लासो गुरुदेवमहीभुजाम् । प्रसादात्प्रियसङ्गाच्च भवेदिष्टार्थलाभतः ।' अत्र इष्टार्थलाभजनितो हर्षः । अपाङ्गस्फुरणस्य इष्टार्थलाभहेतुत्वात् । 'मुखनेत्रप्रसन्नत्वप्रियोक्तिपुलकोद्गमैः । दानत्यागपरीरम्भैरभिनेयो भवेदयम् ।' 'इष्टालाभादिष्टनाशादनिष्टाप्तेश्च दैन्यतः । चित्तस्यैकाग्रता चिन्ता...' अत्र चिन्ता इष्टालाभजनिता । '... स्मरणं चानुपस्मृतिः । संतापोच्छ्वासनिश्वासा मान्द्यमिन्द्रियकर्मणाम् । अधोमुखत्वमित्याद्यैरभिनेया भवेदियम् ।' अनोजस्त्वं तु मनसो दैन्यमित्यभिधीयते । मनःसंतापदारिद्र्यचिन्तौत्सुक्यादिभिर्भवेत् ।' अत्र औत्सुक्य-

1. ततो 2. स्फुरति 3. कथं पुनर्द्रष्टव्यः ।

विदूषकः— (जनान्तिकम् । भो वयस्स चउप्पदवत्थुअं दुवारीकदुअं तुह उवक्खित्तो विअ अप्पा तत्तहोदीए ।

भो वयस्य [1]चतुष्पदवस्तुकं द्वारीकृत्य त्वय्युपक्षिप्त इवात्मा[2] तत्रभवत्या ।

राजा— (जनान्तिकम् ।) सखे, एवमावयोर्हृदयम् । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति गेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणीसंनिकर्षा-
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ ५ ॥

(मालविका गीतान्ते निष्क्रमितुमिच्छति ।)

जनित दैन्यम् । 'अङ्गानामपि शैथिल्य देहसंस्कारवर्जनम् । आश्रित च शिरस्त म्मिन्ननुभावाः प्रकीर्तिताः ।' इति ।

उपक्षिप्त इव न्यस्त इव ।

जनमिति । इम जनं माम् । अनुरक्तम् अनुरागयुक्तम् । विद्धि जानीहि । गेये गानपद्ये । स्वाङ्गनिर्देशपूर्वं स्वावयवविक्षेपपूर्वम् . निरूपणपूर्वं वा । नाथेति वचनम् । अभिनयन्त्या अभिनयं कुर्वत्या । धारिणीसंनिकर्षात् देवीसमक्षात् । प्रणयगतिं याच्ञोपायम । अदृष्ट्वा । 'प्रणयः स्यात्परिचये याच्ञायां सौहृदेऽपि च ।' सुकुमारप्रार्थनाव्याज उत्तमवस्तुसुवाञ्छाव्याजम् । अहं उक्त इव ॥ ५ ॥

* **जनमिममिति** । नाथ स्वामिन् । जनमिम मामित्यर्थः । अनुरक्तं स्निग्धम् । त्वयीति शेषः । विद्धि जानीहि । इति एवंविधे । गेये गीत । वचनं णाह मं पराहीणं इत्यादि वाक्यम् । स्वाङ्गनिर्देशपूर्वं यथा तथा अभिनयन्त्या हस्तादिभिः प्रकाशयन्त्या अनया मालविकया । धारिणीसंनिकर्षाद्धेतोः । प्रणयगतिं मम स्नेहप्रवृत्तिम् । अदृष्ट्वा । अनुभावानामप्रकाशनादिति शेषः । सुकुमारप्रार्थनाव्याजं सुकुमारा मृदुला, सुकरेत्यर्थः, सा चासौ प्रार्थना च तस्या व्याजो यस्मिन् कर्मणि तथोक्तम् । अहम् । उक्त इव उदित इव ॥ ५ ॥

1. चतुर्थवस्तुकम 2, त्वय्युपस्थापित आत्मा

विदूषकः— भोदि. चिट्ठ। किंवि वो विसुमरिदो कमभेदो। तं दाव पुच्छिस्सम्।

भवति, तिष्ठ। [1]किमपि वो विस्मृतः क्रमभेदः। तं तावत्प्रक्ष्यामि।

गणदासः— वत्से! स्थीयताम्। उपदेशविशुद्धा[2] यास्यसि।

(मालविका निवृत्य स्थिता।

राजा— (आत्मगतम्।) अहो सर्वास्ववस्थासु चारुता शोभान्तरं पुष्यति। तथा हि।

वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयम्।

उपदेशविशुद्धा अङ्गीकृतलास्या। शोभान्तरम्। अतिशयशोभाम्॥

वाममिति। सधिस्तिमितवलय मणिबन्धसंधौ स्थगितकटकम्, निःशब्दकङ्कणमिति वा। वाम हस्तम्। नितम्बे श्रोण्याम्। न्यस्य वक्राकारमनोहर निधाय। श्यामाविटपसदृश प्रियङ्गुशाखासदृशम्। फलिनी गोल्लगिरिका श्यामा कान्ता प्रियङ्गुका' इति बाहटः। द्वितीय दक्षिणहस्तम्। स्रस्तमुक्त श्लथत्यक्तं प्रसारितम्। कृत्वा। पादाङ्गुष्ठालुलितकुसुमे नटनोपचारार्थं रङ्गविक्षिप्त कुसुम पादाङ्गुष्ठालुलित यस्मिन् तस्मिन्। कुट्टिमे रत्नशिलापट्टे निबद्धे। 'कुट्टिमोऽस्त्री निबद्धा भूः इत्यमरः। पातिताक्ष दत्तलोचन यथा तथा। ऋज्वायतार्धे स्थितिविशेषे ऋज्वायतार्धशरीरम्। अस्याः। स्थित स्थितिः। नृत्तात्। अतितरां अतिशयेन। कान्त मनोहरम्॥ ६॥

* **वाममिति**। सधिस्तिमितवलय सधौ मणिबन्धे स्तिमितः निश्चलः वलयः कङ्कणं यस्य तथोक्तः तम्। वाम सव्यम्। हस्त नितम्बे न्यस्य निधाय। श्यामाविटपसदृशं फलिनीशाखासनिभं द्वितीयं दक्षिणं हस्तम्। स्रस्तमुक्तं स्रस्तं शिथिलं यथा

---

1. भवति, तिष्ठ किंचित। वो विस्मृतः कर्मभेदः। 2. विशुद्धौ

पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्तादस्याः स्थितमतितरां कान्तमृज्वायतार्धम् ॥

देवी— णं गोदमवअणं वि अज्जो हिअए करेदि ।
ननु गौतमवचनमप्यार्यो हृदये करोति ।

गणदासः— देवि! मा मैवम् । देवप्रत्ययात्संभाव्यते सूक्ष्मदर्शिता गौतमस्य । पश्य ।

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥

(विदूषक विलोक्य ।) शृणुमो विवक्षितमार्यस्य ।

विदूषकः— (गणदासं विलोक्य ।) सक्खिणिं दाव पुच्छ । पच्चा जो मए कमभेदो लक्खिदो तं भणिस्सं ।

भवति तथा मुक्तं विसृष्टं लम्बितमित्यर्थः । कृत्वा विधाय । पादाङ्गुष्ठालुलितकुसुमे पादाङ्गुष्ठेन आलुलित आकृष्टं कुसुम यस्य तस्मिन् । कुट्टिमे स्फटिकादिखचितस्थले । पातिते व्यापारिते अक्षिणी यस्मिन् कर्मणि तथोक्तम् । ऋज्वायतार्धं ऋजु अवक्रं आयत दीर्घं अर्धं शरीरस्यार्धभागः यस्मिंस्तत् । अस्याः स्थित अवस्थानम् । नृत्तात् नर्तनात् । अतितरां अत्यर्थं । कान्त मनोहरं । भवति । अत्र वाक्यस्य विशेषवत्त्वात् पुष्ट नाम संध्यङ्गमुक्तं भवति ॥ ६ ॥

सूक्ष्मदर्शिता सूक्ष्मार्थज्ञता ॥

मन्दोऽपीति । विपश्चितः ससर्गेण पण्डितस्य सहवासेन । मन्दोऽपि अज्ञोऽपि । अमन्दतां बुद्धिमत्ताम् । एति भजते इण् गतौ । पङ्कच्छिदः कर्दमहरस्य । फलस्य कतकबीजस्य । 'कतकस्य फलं कांस्यं ज्ञेयं वारिप्रसादनम्' निकषेण घर्षणेन । आविलं कलुषितम् । पयः जलमिव ॥ ७ ॥

* **मन्दोऽपीति** । अत्र वाक्यस्योपपत्तिमत्त्वादुपन्यासो नाम सन्ध्यङ्गमुक्तं भवति ॥

[1]साक्षिणीं तावत्पृच्छ । पश्चाद्यो मया क्रमभेदो लक्षितः, तं भणिष्यामि ।

गणदासः— भगवति. [2]यथादृष्टमभिधीयतां गुणो वा दोषो वा ।

परिव्राजिका— [3]यथादर्शनं सर्वमनवद्यम् । कुतः ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।

अङ्गैरिति । अन्तर्निहितवचनैः प्रयोगेषु वचनव्यवहारैरभिनीयत एव । वचनपूर्वकत्वादन्तर्निहितवचनैरित्युक्तम् । अङ्गैः प्रतीकैः । अर्थः वचनार्थः । सम्यक् उक्तप्रकारः । सूचितः दर्शितः । पादन्यासः पादविक्षेपः । लय अपाङ्गविक्षेपादिकम् । अनुगतः अनुकरोति । रसेषु शृङ्गारादिषु । तन्मयत्वं तत्स्वरूपत्वम् । शाखायोनिः शाखाः अङ्गुलय अङ्गुलिभ्यः समुद्भवः शाखायोनिः । 'पञ्चशाखः शयः पाणिः' इत्यमरः । मृदुः मृदुशब्देन सौम्याभिनय इति विवक्षितम् । अभिनयः प्रसारणाकुञ्चनादिर्विस्तारादिः । तद्विकल्पानुवृत्तौ भावभेदानुवृत्तौ । भावः । अभिप्रायः । भावम् । नुदति प्रेरयति । विषयात् अनुभावात् । रागबन्धश्च रागः । स एव भरतशास्त्रेषु यो रागबन्धो दृश्यते, स रागबन्ध एव ॥ ८ ॥

अङ्गैरिति । अन्तर्निहितवचनैः अन्तर्निहितानि अभ्यन्तरस्थापितानि वचनानि पदानि यैस्तैः अङ्गैः हस्तादिभिः । अत्र अभ्यासपाटवादङ्गानां स्वत एव अन्तर्निहितवचनत्व उत्प्रेक्षितमिति मन्तव्यम् अर्थो गीतार्थः । सम्यक् सांधु । सूचितः प्रकाशितः । पादन्यासः पादविन्यासः । लयं अनुगतः अनुसृतः । लयो नाम तालमानम् । 'तालान्तरालवर्ती यः कालोऽसौ लय ईरितः' इत्युक्तत्वात् । अत्र पादन्यासस्य स्वतो लयानुसरण अभ्यासपाटवादेवेति मन्तव्यम् । रसेषु रसविषयेषु । तन्मयत्वं तादात्म्यं रसात्मता । भवतीत्यर्थः । अत्र रसशब्देन उपचारात् परिपोषातिशयवन्तो भावाः कथ्यन्ते । प्रकृतरसस्यैकत्वेन रसेष्विति बहुवचनानुपपत्तिप्रसङ्गात् । अभिनयः प्रयोगः । यथोक्तं— 'प्रयोगो यस्तु

1. कौशिकीं 2 यथादर्शनम... 3 यथाशास्त्रं

शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं [1]नुदति विषयाद्रागबन्धः स एव ॥८॥

गणदासः— देवः कथं मन्यते ।

राजा— गणदास! स्वपक्षे शिथिलाभिमाना वयं संवृत्ताः ।

गणदासः—अद्य नर्तयितास्मि ।

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः ।
श्यामायते न [2]युष्मासु यः काञ्चनमिवाग्निषु ॥ ९ ॥

देवी— दिट्ठिआ परिक्खआराहणेण अहिअं वड्ढइ अज्जो ।
दिष्ट्या परीक्षकाराधनेनाधिकं वर्धत आर्यः ।

नाट्यादेर्भवेदभिनयो हि सः' इति । शाखायोनिः शाखा योनिः प्रभवः यस्य तथोक्तः सन् । मृदुः सुकुमारः । शाखा नाम नृत्तहस्तानां मानप्रचारः । यथोक्तम्— 'शाखा तु नृत्तहस्तानां या मात्रा चित्रनर्तने' इति । तद्विकल्पानुवृत्तौ तस्य अभिनयस्य विकल्पो भेदः तस्य अनुवृत्तिः अनुस्मृतिः तस्याम् । भावः अभिनीयमानो निर्वेदादिः । विषयात् आश्रयात, प्रकृतात् स्थायिन इत्यर्थः । भावं पूर्वाभिनीतं संचारिणम् । नुदति अपाकरोति । रागबन्धः रञ्जकत्वयोगः । स एव पूर्वं यादृशस्तादृश एवेत्यर्थः ॥

उपदेशमिति । उपदेशिनः उपदेशकर्तारः । सन्तः विद्वांसः । तम् । शुद्धं निर्मलम् । उपदेशम् । विदुः । अग्निषु गुहाग्निषु । काञ्चनं सुवर्णमिव । युष्मासु त्वादृशेषु । यः । उपदेशः । न श्यामायते न कलुषीभवति । तं शुद्धं विदुः । 'तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः । हेम्नः संलक्ष्यते शुद्धिरदौ हि श्यामिकापि वा ।' इति चोक्तम् ॥ ९ ॥

* उपदेशमिति । उपदेशिनः शिक्षकस्य । युष्मासु युष्मादृशेषु, विवेकिष्वित्यर्थः । न श्यामायते न मलिनीभवति । लोहितादित्वात् क्यष् । 'वा क्यषः' इति आत्मनेपदम् ॥ ९ ॥

1. तुदति. 2 विद्वत्सु.

गणदासः— देवीपरिग्रहश्च[1] मे वृद्धिहेतुः । (विदूषकं विलोक्य ।) गौतम! वदेदानीं यत्ते मनसि वर्तते ।

विदूषकः— पुडमोवदेसदंसणे पुडमं बम्हणस्स पूआ कादव्वा। सा णं वो विसुमरिदा ।

प्रथमोपदेशदर्शने प्रथमं ब्राह्मणस्य पूजा कर्तव्या[2] । सा ननु वो विस्मृता ।

परिव्राजिका— अहो प्रयोगाभ्यन्तरः प्रश्नः ।

विदूषकः— अइ पण्डितंमण्णे किं अण्णं । मोदअखण्डणे वि असमत्था तुमं किं जाणासि । पसण्णचन्दपादसरिसेहिं केसपासेहिं एदाणं भीसिआसि ।

अयि पण्डितंमन्ये! किमन्यत् । मोदकखण्डनेऽपि असमर्था किं जानासि । प्रसन्नचन्द्रपादसदृशैः केशपाशैरेतान् भीषयसे ।

(सर्वे प्रहसिताः । मालविका च मन्दस्मितं करोति ।)

राजा— (आत्मगतम् ।) उपात्तसारश्चक्षुषा मे स्वविषयः । यदनेन,

स्मयमानमायताक्ष्याः
किंचिदभिव्यक्तदशनशोभि मुखम् ।

अभ्यन्तरः मध्यः । उपात्तसारः गृहीतसारः । विषयः अभिलाषः ।

* प्रथमोपदेशदर्शनेत्यादि । अत्र परिहासस्य गम्यमानत्वान्नर्मेति संध्यङ्गमुक्तं भवति ।

स्मयमानमिति । स्मयमानं समन्दस्मितम् । किंचिदभिव्यक्तदशनशोभि ईषद्दृष्टदन्ताभिमुख्यम् । आयताक्ष्याः विशालाक्ष्याः । मुखम् । असमग्रलक्ष्यकेसरं

---

1. देवीपरिग्रह एव. 2 एष्टव्या.

असमग्रलक्ष्यकेसर-
मुच्छ्वसदिव पङ्कजं दृष्टम् ॥ १० ॥

गणदासः— महाब्राह्मण! [1]न खलु नेपथ्यसंगीतकमिदम्। अन्यथा कथं त्वामर्चनीयं[2] नार्चयिष्यामः ।

विदूषकः— मए णाम मुद्धचादएण विअ सुक्खघणगज्जिदे अन्दरिक्खे जलपाणं इच्छिदम् ।

मया नाम [3]मुग्धचातकेनेव शुष्कघनगर्जितेऽन्तरिक्षे जलपानमिष्टम्[4] ।

परिव्राजिका— एवमेव ।

विदूषकः— भअवदि! पण्डितपरितोसप्पच्चआ णं मूढा जादी। जइ भअवदीए सोहणं भणिदं, तदो इमं से परितोसिअं पयच्छम्मि ।

[5]भगवति! पण्डितपरितोषप्रत्यया ननु मूढा जातिः । [6]यदि भगवत्या शोभनं भणितम्, तत इदमस्यै पारितोषिकं प्रयच्छामि । (इति राज्ञो हस्तात्कटकमाकर्षति ।)

देवी— चिट्ठ चिट्ठ। गुणन्दरं अआणन्दो किंति तुमं आहरणं देसि।

असंपूर्णदृष्टकिञ्जल्कम् । 'रजः परागः किञ्जल्कः केसर परिकीर्तितः'। उच्छ्वसत् विकसत् । पङ्कजमिव दृष्टम् ॥ १० ॥

नेपथ्यसंगीतक यवनिकान्तःसङ्गीतम्। दक्षिणीय दक्षिणार्हम्। 'दक्षिणीयो दक्षिणार्हः।' शुष्कघनगर्जितं शरन्मेघगर्जितम्। पारितोषिकं सभावना ।

1. न खलु नेपथ्यसवनमिदम्; न खलु प्रथमं नेपथ्यप्रदर्शनमिदम्. 2. दक्षिणीयम्. 3. मुधा चातकेनेव; मुग्धचातकेन. 4. इष्यते; (ईप्स्यते) अथवा पण्डितपरितोष... 5. तेन हि पण्डित... 6. यतोऽत्रभवत्या

[1]तिष्ठ तिष्ठ। गुणान्तरमजानन्किमिति[2] त्वमाभरणं ददासि।

विदूषकः— परकेरअं ति कदुअ। परकीयमिति कृत्वा।

देवी— (आचार्यं विलोक्य।) अज्ज गणदास! णं दंसिदोवदेसा वो सिस्सा।

आर्य गणदास! ननु [3]दर्शितोपदेशा वः शिष्या।

गणदासः— वत्से! प्रतिष्ठस्वेदानीम्।

(मालविका आचार्येण सह निष्क्रान्ता।)

विदूषकः— (राजानं विलोक्य, जनान्तिकम्।) एत्तिओ मे महविहवो भवन्दं सेविदुम्।

एतावानेव मे मतिविभवो भवन्तं सेवितुम्।

राजा— (जनान्तिकं) अलमलं परिच्छेदेन। अद्य हि,

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करणम्[4]॥

---

* आर्य गणदासेत्यादि। अनेन मालविकानिर्गमहेतुना देवीवचनेन राज्ञो हितनिरोधात् निरोधो नाम संध्यङ्गमुक्तं भवति।

गुणान्तरं गुणविशेषम्। विभवः सामर्थ्यम्।

भाग्येति। अक्ष्णोः। भाग्यास्तमयं भागधेयविनाशमिव। हृदयस्य चेतसः। महोत्सवावसानं महैश्वर्यविनाशं महाभिलाषान्तमिव। धृतेः धैर्यस्य। द्वारपिधानं मार्गनिरोधमिव च। तस्याः तिरस्करणं मालविकायास्तिरोभूतिम्। मन्ये॥

* **भाग्यास्तमयमिति**। तस्याः मालविकायाः। तिरस्करणं तिरोधानम्। अक्ष्णोः। भाग्यास्तमयमिव भाग्यस्य भागधेयस्य अस्तमयमिव नाशमिव। हृद-

---

1. तिष्ठ तावत् 2. किंनिमित्तं 3. नाट्याभिनयं दर्शितवती. 4. तस्यास्तिरस्करिणीम्।

विदूषकः— साहु तुमं दरिद्दो आदुरो विअ वेज्जेण उवणिज्जमाणं ओसहं इच्छसि ।

[1]साधु त्वं दरिद्र आतुर इव वैद्येनोपनीयमानमौषधमिच्छसि ।

(प्रविश्य ।)

हरदत्तः— देव! मदीयमिदानीं उपदेशमवलोकयितुं क्रियतां प्रसादः ।

राजा— (आत्मगतम् ।) अवसितो मे दर्शनार्थः । (दाक्षिण्यमवलम्ब्य, प्रकाशम् ।) हरदत्त ननु पर्युत्सुका एव वयम् ।

हरदत्तः— अनुगृहीतोऽस्मि ।

(नेपथ्ये ।)

वैतालिकः— विजयतां देवः । उपारूढो मध्याह्नः[2] । तथा हि.

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।

यस्य मनसः । महोत्सवावसानामिव महोत्सवस्य अवसान अन्तमिव । धृतेः प्रीतेः । द्वारपिधानमिव द्वारस्य प्रवेशमार्गस्य पिधानमिव निरोधमिव । मन्ये भावयामि । अत्र अरतेर्गम्यमानत्वाद्विधुन नाम मध्यङ्गमुक्तं भवति ॥ ११ ॥

उपनीयमानं प्राप्यमाणम्, आनीयमान वा । दाक्षिण्यं माध्यस्थ्यम् ।

पत्रच्छायास्विति । मध्याह्नातपासहनं वदति । हंसाः । दीर्घिकापद्मिनीनां पत्रच्छायासु कमलाकरसरोजदलच्छायासु । मुकुलितनयनाः संमीलितलोचनाः सन्तः । (संश्रयन्ते ।) अत्यर्थतापात् अतिमात्रदुःसहातपतापात् । सौधानि राजसदनानि । 'सौधोऽस्त्री राजसदनम्' इत्यमरः । वलभिपरिचयद्वेषिपारावतानि गोपानसीनिवासासहनकलरवाणि भवन्ति । 'गोपानसी तु वलभिः' 'पारावतः

---

1 दरिद्र इवातुरो वैद्येन दीयमान .. 2. उपारूढो मध्यमह्नःसविता.

बिन्दूत्क्षेपान्पिपासुः [1]परिपतति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥

विदूषकः— अविह अविह । ब्रह्मणस्स भोअणवेला संवुत्ता । अत्तहोदो वि । उइदवेलादिक्कमे चिकिस्सआ दोसं उदाहरन्दि । हरदत्त ! किं दाणिं भणसि ।

अविध अविध । ब्राह्मणस्य भोजनवेला [2]संवृत्ता ; अत्र-भवतोऽपि । [3]उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति । हरदत्त ! किमिदानीं भणसि ।

हरदत्तः— नास्ति मे वचनस्यान्यस्यावकाशोऽत्र ।

राजा— (हरदत्तमवलोक्य ।) तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः । विश्राम्यतु भवान् ।

हरदत्तः— यदाज्ञापयति देवः । इति निष्क्रान्तः ।

देवी— णिव्वत्तेदु अज्जउत्तो मज्जणविहिम् ।
निर्वर्तयत्वार्यपुत्रो [4]मज्जनविधिम ।

विदूषकः— होदि । विसेसेण भोअणं तुवरावेदु ।
भवति ! विशेषेण भोजनं त्वरयतु ।

कलरवः' इत्यमर. । शिखी मयूरः । बिन्दूत्क्षेपान् जलपृषतान् । पिपासुः पातु-मिच्छुः । भ्रान्तिमत् भ्रमणयुतम् । वारियन्त्र उद्घाटनं घटीयन्त्रम् । परिपतति समाश्रयति । समग्रः संपूर्णः । त्वम् । नृपगुणैः क्षत्रियतेजोभिरिव । सप्तसप्तिः आदित्यः । सर्वैः उस्रैः किरणैः । दीप्यते ॥ १२ ॥

---

1. परिसरति. 2. अतिक्रामति. 3. स्नानभोजनवेलातिक्रमे. 4. मध्याह्नविधिम ।

परिव्राजिका— (उत्थाय ।) स्वस्ति भवते ।

(इति सपरिजनया देव्या सह निष्क्रान्ता ।)

विदूषकः— भो ण केवलं रूवे, सिप्पे वि अद्दुदीया मालविआ ।

भोः न केवलं रूपे, शिल्पेऽप्यद्वितीया मालविका ।

राजा— वयस्य !

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता ।

परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः ॥

किं बहुना, चिन्तयितव्योऽस्मि ते ।

विदूषकः— भवदा वि अहं । दिढं खु विवणिकन्दू विअ उअरब्भन्दरं डज्झइ ।

भवताप्यहम । दृढं खलु विपणिकन्दुरिवोदराभ्यन्तरं दह्यते ।

राजा— एवमेव भवान् सुहृदर्थे त्वरताम् ।

विदूषकः— गहीदक्खणोह्मि । किन्दु मेहावलीरुद्धजोह्मा विअ पराहीणदंसणा तत्तहोदी मालविआ । भवं वि सूणोवरिअरो

अव्याजेति । अव्याजसुन्दरीं अनलङ्काररमणीयाम् । तां मालविकाम् । ललितेन मनोहरेण । विज्ञानेन शिल्पविज्ञानसामर्थ्येन । योजयता प्रापयता । विधात्रा ब्रह्मणा । कामस्य । बाणः । विषदिग्धः विषाक्तशल्यः । परिकल्पितः कृतः ॥ १३ ॥

अव्याजेति । ललितेन सुभगेन । विज्ञानेन सङ्गीतकलापरिज्ञानेन ।

विपणिकन्दुः पण्यवीथिकाभर्जनशरावम् ।

विपणिकन्दुर्नाम पण्यवीथिकायां व्रीहिपचनपात्रम् । कन्दुर्ना स्वेदनी स्त्रियां' इत्यमरसिंहः । एवमेव इत्थमेव, यथा भवान् भोजनरूपे स्वकार्ये त्वरते तथा । सुहृदर्थे मदर्थे मालविकापुनर्दर्शने । त्वरताम् । अत्र दग्धनष्टस्य बीजस्य अनुसरणात परिसर्पो नाम सन्ध्यङ्गमुक्तं भवति ।

गद्धो विअ आमिसलोलुवो भीरुओ अ। ता अणादुरो भविअ कज्जसिद्धिं पत्थयन्दो मे रुच्चइ।

गृहीतक्षणोऽस्मि। किं तु मेघावलीरुद्धज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका। भवानपि सूनोपरिचरो गृध्र इव आमिषलोलुपो भीरुकश्च। तस्मादनातुरो भूत्वा कार्यसिद्धिं प्रार्थयमानो मे रोचसे।

राजा— सखे कथमनातुरो भविष्यामि। यदा,

सर्वान्तःपुरवनिताव्यापारं प्रति निवृत्तहृदयस्य।
सा वामलोचना मे स्नेहस्यैकायनीभूता॥ १४॥

[इति निष्क्रान्ताः सर्वे।

इति द्वितीयोऽङ्कः॥

गृहीतक्षणोऽस्मि 'कालविशेषऽवसरे व्यापारे पारतन्त्र्ये च। मध्ये तथोत्सवे च क्षणशब्दः कथ्यते षट्सु।' गृहीतव्यापारो वा। 'सूना स्यात् घातुकस्थानम्' वध्यस्थलम्। अनातुर अव्याकुलः।

सर्वेति। सर्वान्तःपुरवनिताव्यापार सर्वासा अन्तःपुरवनितानां राजमहिषीणां व्यापारं अवलोकनालापनाश्लेषाधरग्रहणकरग्रहणादिकम्। प्रति उद्दिश्य। निवृत्तहृदयस्य त्यक्तमनसः मे। सा वामलोचना। मालविका। स्नेहस्य प्रेम्णः। 'प्रेम स्नेहोऽथ' एकायनीभूता एकपात्रभूता। सर्वाभ्य इयमेव स्नेहवती बभूवेति संबन्धः॥ १४॥

* गृहीतक्षणोऽस्मीत्यादि। अत्र सान्त्वस्य गम्यमानत्वात् पर्युपासनं नाम संध्यङ्गमुक्तं भवति।

* सर्वेति। स्नेहस्य प्रेम्णः। एकायनीभूता एकं केवलं अयनं स्थानं तद्भूता। अत्राङ्के मालविकानिष्क्रमणेन कथाविच्छेदे सति सर्वान्तःपुरेत्यादिना गम्यमानो राज्ञोऽभिलाषातिशयः उत्तराङ्ककथाहेतुत्वात् बिन्दुरित्यङ्कसंज्ञेयम्॥

तृतीयोऽङ्कः ॥

(ततः प्रविशति परिव्राजिकायाः परिचारिका ।)

परिचारिका— आणत्तम्हि भअवदीए । उवाअणत्थं बीजपूरअं गेण्हिअ आअच्छत्ति । ता जाव पमदवणपालिअं महुअरिअं अण्णेसामि । (परिक्रम्य अवलोक्य च ।) एसा तवणीआसोअं ओलोअन्ती चिट्ठइ । जाव णं उवसप्पे ।

आज्ञाप्तास्मि भगवत्या । [1]'उपायनार्थं बीजपूरकं गृहीत्वा आगच्छ' इति । तद्यावत् प्रमदवनपालिकां मधुकरिकाम् अन्विष्यामि । एषा तपनीयाशोकम् [2]अवलोकयन्ती तिष्ठति । यावदेनामुपसर्पामि[3] ।

(ततः प्रविशत्युद्यानपालिका ।)

परभृतिका— (उपसृत्य ।) महुअरिए अवि सुहो दे उज्जाणव्वाधारो ।

मधुकरिके ! अपि सुखस्ते उद्यानव्यापारः ।

मधुकरिका— अम्मो परहुदिआ । सहि साअदं दे ।

अहो परभृतिका[4] । सखि ! स्वागतं ते ।

परिव्राजिकायाः सन्यासिन्याः । उपायनार्थं सभाजनार्थम् । बीजपूरं मातुलुङ्गफलम् । 'बीजपूरो मातुलुङ्गः' तपनीयाशोकः रक्ताशोकः ।

* कविरिदानीं अङ्कान्तरमारभमाणः कथासंघटनार्थं प्रथमं प्रवेशकं नाम अर्थोपक्षेपकं प्रस्तौति—ततः प्रविशतीत्यादिना ।

1. यथा समाभृतिके. 2. अन्वेषयन्ती. 3. समावयामि. 4 समाभृतिका.

परभृतिका— हळा भअवदी आणवेदि अरित्तपाणिणा अम्हारिसजणेण तत्तहोदी देवी दख्खिदव्वो । ता बीजपूरएण सुस्सूसिदुं इच्छाम्मित्ति ।

हला भगवत्याज्ञापयति 'अरिक्तपाणिनास्मादृशजनेन [1]तत्रभवती देवी द्रष्टव्या। तस्माद्बीजपूरकेण शुश्रूषितुमिच्छामि' इति ।

मधुकरिका— णं सण्णिहिदं * एव्व बीजपूरअं । कहेहि दाव अण्णोण्णसङ्घरिसिदाणं णट्टाअरिआणं उवदेसं दख्खिअ कदरो भअवदीए पसंसिदो ।

ननु संनिहितमेव बीजपूरकम् । कथय, [2]तावदन्योन्यसङ्घर्षितयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः ।

परभृतिका— दुवे वि किल आआमिणो पओअणिउणा अ । किन्दु सिस्सागुणविसेसेण उण्णमिदो गणदासो ।

द्वावपि किलागमिनौ प्रयोगनिपुणौ च । किं तु शिष्यागुणविशेषेण उन्नमितो[3] गणदासः ।

मधुकरिका— अह मालविआगदं कोलीणं कहं सुणीअदि ।

अथ मालविकागतं कौलीनं कथं श्रूयते ।

अरिक्तपाणिना अशून्यहस्तेन । अर्थपतिः राजा । आगमिनौ भरतशास्त्रज्ञौ । प्रयोगनिपुणौ लास्यप्रयोगसमर्थौ । उन्नमितः उत्कर्षितः । कौलीनं लोकापवादः ।

* कौलीनं लोकवार्ता ।

---

1. अत्रभवान्; अर्थपतिः 2. द्वयोरपि संगीतोपदेशनिमित्तमन्योन्यसंघर्षितयोः नृत्ताचार्ययोः... 3. उन्नमितोपदेशः,

परभृतिका— बलिअं खु साहिलासो भट्टा तस्सिं । केवलं देवीए धारिणीए चित्तं रक्खन्दो अत्तणो पहुत्तणं ण दंसेदि । मालविआ वि इमेसु दिअहेसु अणुहूदमुत्ता विअ मालदीमाला मिलायमाणा लक्खियदि । अदो वरं ण आणे । विसज्जेहि मम् ।

[1]बलवत्किल साभिलाषो भर्ता तस्याम् । [2]केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं[3] न दर्शयति । [4]मालविकाप्येषु दिवसेषु अनुभूतमुक्तेव मालतीमाला म्लायमाना लक्ष्यते । अतः परं न जाने । विसर्जय माम् ।

मधुकरिका— एदं साहावलम्बि बीजपूरअं गेह्ण ।

एतच्छाखावलम्बि बीजपूरकं गृहाण[5] ।

परभृतिका— (नाट्येन गृहीत्वा ।) हला तुमं वि इदो वरं पेसलअरं साहुअणसुस्सूसाए फलं पाविदा होहि ।

हला, त्वमपि इतः परं पेशलतरं साधुजनशुश्रूषायाः फलं [6]प्रापिता भव ।

(इति प्रस्थिता ।)

मधुकरिका— सहि, समं एव्व गच्छह्म । अहं वि इमस्स चिरा-

अनुभूय मुक्ता शिरसि परिमलार्थं धृता मुक्ता । म्लायमाना ताम्यन्ती । 'सुमना मालती जातिः' ।

---

1 दृढं किल. 2. किं तु केवलं. 7. अभिलाष 4. मालविकाप्यमूनि दिवसानि अनुभूयमुक्तेव मालतीमाला म्लायमाना लक्ष्यते, देव्या रक्ष्यते च । 5. गृहीत्वा गच्छ. 6. अनुभवसि.

अमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहदणिमित्तं देवीए विण्णवेमि ।

सखि, सममेव गच्छावः । अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै विज्ञापयामि ।

परभृतिका— जुज्जइ । अहिआरो खु तुह ।

युज्यते । अधिकारः खलु तव ।

[इति निष्क्रान्ते ।

प्रवेशकः ॥

(ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ।)

राजा— (आत्मान विलोक्य ।)

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति ।

चिरायमाण अनेककालीनम् । दोहलनिमित्तम् 'अशोकश्चरणाहत्या' इति पुष्पार्थम् ।

शरीरमिति । दयितालिङ्गनसुखे मालविकालिङ्गनसुखे । असति सति अघटिते सति । शरीरं अङ्गम् । क्षामं स्यात् । सा । क्षणमपि क्षणमात्रमपि । न दृश्यत इति । चक्षुः । सास्र अश्रुसहितम् । भवेत् । हृदय । त्वम् । तया सारङ्गाक्ष्या हरिणलोचनया मालविकया । कदाचित् सकृत् किञ्चिदपि । न विरहित न विश्लेषितम् । असि । हे हृदय । निर्वाणे सुखे । प्रसक्ते प्रघटिते । परितापम् । व्रजसि किं किमर्थं भजसि ॥ १ ॥

* कामयमानावस्थः कामयमानानां कामिनां अवस्था दशा यस्य स तथोक्तः ।

* **शरीरमिति** । दयितालिङ्गनसुखे प्रियापरिष्वङ्गसुखे । असति अविद्यमाने । शरीरं वपुः । क्षामं कृशम् । स्यात् भवेत् । क्षणमपि क्षणमात्रमपि ।

तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय परितापं वहसि[1] किम् ॥ १ ॥

विदूषकः— अलं भवदो धीरदं उज्झिअ परिदेविदेण । दिट्ठा मए तत्तहोदीए मालविआए पिअसही वउलावलिआ । सुणाविदा अ मए जं भवदा सन्दिट्ठम् ।

अलं भवतो धीरतामुज्झित्वा परिदेवितेन । दृष्टा मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका । श्राविता च मया यद्भवता संदिष्टम ।

राजा— ततः किमुक्तवती ।

विदूषकः— विण्णवेहि भट्टारं । अणुगहीदह्मि इमिणा णिओएण । किन्दु सा तवस्सिणी देवीए अहिअदरं रक्खिअमाणा णाअरक्खिदो विअ मणी ण सुहं समासादइदव्वा भविस्सदि । तह वि घटइस्संति ।

विज्ञापय भर्तारम् । 'अनुगृहीतास्मि अनेन नियोगेन । किं तु सा तपस्विनी देव्या अधिकतरं रक्ष्यमाणा नागरक्षित

सा मालविका । न दृश्यत इति न लक्ष्यत इति । चक्षुः । साश्रु सबाष्पम् । स्यात् । हे हृदय हे चित्त । सारङ्गाक्ष्या हरिणनेत्रया । तया मालविकया । कदाचित् जातुचित् । विरहित वियुक्तम् । नासि न भवसि । अतः कारणात्, निर्वाणे सुखे । प्रसक्ते प्रस्तुते सति । किं किमर्थं । परितापं संतापम् । व्रजसि प्राप्नोषि ॥ १ ॥

* तपस्विनीति । अत्र तपस्विनीति करुणापात्रमुच्यते 'तपस्विनी करुणापात्रम्' इति हलायुधेनोक्तत्वात् । अत्र प्राप्तिसंभावनया प्राप्त्याशा नाम तृतीयावस्था सूचिता । अनया प्राप्त्याशया बिन्दोः समन्वयाद्गर्भसंधिरिति मन्तव्यम् ।

1. व्रजसि ; भजसि.

इव [1]मणिर्न सुखं समासादयितव्या भविष्यति; तथापि घटयिष्यामि' इति ।

राजा— भगवन् सङ्कल्पयोने! प्रतिबन्धवत्स्वपि विषयेष्वभिनिवेश्य[2] तथा प्रहरसि, यथा जनोऽयं कालान्तरक्षमो न भवति । (सविस्मय)

क्व रुजा हृदयप्रमाथिनी क्व च ते विश्वसनीयमायुधम् ।
मृदु तीक्ष्णतरं यदुच्यते तदिदं मन्मथ दृश्यते त्वयि ॥ २ ॥

विदूषकः— णं भणामि तस्सिं साहणिज्जे कज्जे किदो मए उवाओवरुखेवो । ता पज्जवत्थावेदु भवं अत्ताणं ।

ननु भणामि तस्मिन साधनीये कार्ये कृतो मयोपायोपक्षेपः । तत्पर्यवस्थापयतु भवानात्मानम ।

राजा— अथेमं दिवसशेषमुचितव्यापारविमुखेन चेतसा क्व नु खलु यापयामि[3] ।

कालान्तरक्षमो भवति चिरञ्जीवी भवति । सङ्कल्पयोनिः कामः । प्रतिबन्धवत्सु विघ्नवत्सु । विषयेषु रुग्यादिभोगेषु । अभिनिवेशी अभिलाषी ।

क्वेति । हृदयप्रमाथिनी चित्तसंक्षोभकारिणी । रुजा व्याधिः । क्व । विश्वसनीय विश्वस्तम् । आयुध क्व । मृदु लोके सुकुमारं वस्तु । तीक्ष्णतर अत्यन्ततीक्ष्णम् । इति यदुच्यते । तदिदं मन्मथ त्वयि दृश्यत इत्यर्थः ॥ २ ॥

साधनीये कर्तव्ये । उपक्षेपः प्रवेशः । उचितव्यापारः, राजकार्योपयोगि ।

* ननु भणामीति । अत्र उपक्षेपः कृत इत्यनेन कतिपयोपायकल्पनाया गम्यमानत्वादभूताहरणं नाम सन्ध्यङ्गमुक्तं भवति ।

1. निधिः. 2 अभिनिवेशी. 3. गमयामि

विदूषकः— णं भवं अज्ज पुडमं वसन्दोदारसूअआइ रत्तासोअकारेआइ उवाअण पेसिअ णववसन्दूसवावदेसेण इरावदीए णिउणिआमुहेण पत्थिदो । इच्छम्मि अज्जउत्तेण सह डोलाहिरोहणं अणुहोदुंति । भवदा वि से पडिण्णादं । ता पमदवणं एव्व गच्छम्ह ।

ननु भवानद्य प्रथमं वसन्तावतारसूचकानि[1] रक्ताशोक-[2]कोरकाण्युपायनं प्रेष्य नववसन्तोत्सवापदेशेन[3] इरावत्या निपुणिकामुखेन प्रार्थितः 'इच्छाम्यार्यपुत्रेण सह डोलाधिरोहणमनुभवितुम्' इति । भवताप्यस्यै प्रतिज्ञातम । तत्प्रमदवनमेव गच्छावः ।

राजा— न क्षममिदम् ।

विदूषकः— कहं विअ । कथमिव ।

राजा— वयस्य, निसर्गनिपुणाः स्त्रियः । कथं मामन्यसंक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति । अतः पश्यामि ।

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः ।

रक्ताशोककुरवकाणि तपनीयाशोककुसुमानि च, कुरवककुसुमानि च । नववसन्तः वसन्तोद्गमः । अपदेशः व्याजम् । 'लक्षमाचक्षते व्याजमपदेशपदं बुधाः ।' याचितः प्रार्थितः । 'डोला प्रेङ्खादिका स्त्रियाम् ।' उपलालयन्तं प्रसादयन्तम । न लक्षयिष्यति न ज्ञास्यति ।

उचित इति । अस्यास्तावत् प्रणयः विहन्तु उचितः, आर्यपुत्रेण सह डोलाधिरोहणमनुभवितुमिच्छामीति पूर्वोक्ता याच्ञां विहन्तु वरम् । खण्डनहे-

1 वसन्तप्रथमावतारसुभगानि. 2. कुरवकाणि 3 नववसन्तावतारापदेशेन

उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिकोऽपि भावशून्यः ॥ ३ ॥

विदूषकः— णारुहदि भवं सव्वं अन्देउरपडिट्ठिदं दक्खिण्णं एक्कपदे पिट्ठदो कादुं ।

[1]नार्हति भवान सर्वमन्तःपुरप्रतिष्ठितं[2] दाक्षिण्यमेकपदे पृष्ठतः कर्तुम ।

राजा— (विचिन्त्य ।) तेन हि प्रमदवनमार्गमादेशय ।

तवः विश्लेषकारणानि । बहवः अनेके अनेकविधा वा । दृष्टाः । हि यस्मात् । उपचारेण सर्वं परिहियतामिति चेदत आह— उपचारविधिरिति । मनस्विनीनां निपुणानां मानवतीनां वा । भर्तृभिः क्रियमाणः, उपचारविधिः । पूर्वाभ्यधिकोऽपि, भावशून्यश्चेत् उपचारविधिर्न उपचारत्वेन न परिणत इत्यर्थः । अथवा, पूर्वाभ्यधिकोऽपि उपचारविधिः भावशून्यतया क्रियमाणो मनस्विनीविषये न तु वरमिति । वरमिति पूर्वेण सबन्धः । बहवः खण्डनहेतवः विश्लेषकारणानि दृष्टानि यत्तत्तस्मात् । उचितः प्रणयः प्राप्तः स्नेहः । विहन्तु हातुम् । वरं सुकरम् । अथवा श्रेष्ठम् । मनस्विनीनाम् । उपचारविधिः उपचारविशेषः । पूर्वाभ्यधिकोऽपि पूर्वस्मादत्यन्तमधिकोऽपि । भावशून्यो न क्रियाशून्यो न (?)॥ ३ ॥

* **उचितेति** । प्रणयः इरावत्याः प्रणयः प्रार्थना । विहन्तुं प्रतिषेद्धुम् । वरं मनाक् प्रियम् । अयं पक्षः किंचित्साधुरित्यर्थः । हि यस्मात्कारणात् । खण्डनहेतवः ईर्ष्याकोपकारणानि । बहवः अनेके । दृष्टा. । खण्डनहेतुदर्शनेऽपि उपचारविशेषैः प्रलोभ्यतामित्यत आह—उपचारेति । भावशून्यः प्रेमरहितः । उपचारविधिः इष्टाचरणम् । पूर्वाभ्यधिकोऽपि पूर्वस्मादुपचारविधेरतिशयितोऽपि । मनस्विनीनां तु प्रशस्तमनसां पुनः, विवेकवतीनामित्यर्थः । उपचारविधिर्न भवति किंतु अपचारविधिरित्यर्थः ॥ ३ ॥

पृष्ठतः कर्तुं पश्चात्कर्तुम् ।

---

1. किमु नार्हति. 2. अन्तःपुरपरिचितं.

विदूषकः— इदो इदो भवं । इत इतो भवान ।

(उभौ परिक्रामतः ।)

विदूषकः— णं एदं पमदवणं पवणचळिदाहिं पल्लवंगुलीहिं तुवरावेदि विअ भवन्दं । ता पविसदु भवं ।

[1]नन्वेतत्प्रमदवनं पवनचलिताभिः पल्लवाङ्गुलीभिस्त्वरतीव भवन्तम । तत्प्रविशतु भवान ।

राजा— (स्पर्शसुखं रूपयित्वा ।) अभिजातः खलु वसन्तः । सखे! पश्य ।

आमत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ४ ॥

विदूषकः— एहि । पविस णिव्वुदिलाहाय ।

एहि । प्रविश निर्वृतिलाभाय ।

आमत्तानामिति । आमत्तानां ईषन्मत्तानाम् । 'आडीषदर्थोऽभिव्याप्तौ' कोकिलानां परभृतानाम् । श्रवणसुभगैः श्रुतिसुखैः । कूजितैः शब्दैः । सानुक्रोशं सानुग्रहम् । मनसिजरुजः कामव्यथायाः । सह्यताम् । पृच्छतेव स्थितेन । माधवेन वसन्तेन । चूतप्रसवसुरभिः सहकारकुसुमगन्धिः । दक्षिणो मारुतः दक्षिणदिग्भवो वायुः । अङ्गे देहे । सान्द्रस्पर्शः श्लक्ष्णस्पर्शः । करतलः । व्यापृत इव संपृक्त इव, सचारित इव ॥ ४ ॥

निर्वृतिलाभाय सुखप्राप्तये ।

---

1. वसन्तः किल पवनदरचालिभिः पल्लवाङ्गुलीभिः त्वरयति भवन्त 'प्रमदवनं प्रविशतु' इति ।

(उभौ प्रविशतः ।)

विदूषकः— भो वअस्स अवहाणेण दिट्ठिं देहि । एदं खु भवन्द विलोहइदुकामाए पमदवणलच्छीए जुवइवेसलज्जइदुअं वसंदकुसुमणेवच्छं गहीदम् ।

भो वयस्य ! अवधानेन दृष्टिं देहि । एतत्खलु [1]भवन्तं विलोभयितुकामया प्रमदवनलक्ष्म्या युवतिवेषलज्जायितृकं[2] वसन्तकुसुमनेपथ्यं गृहीतम् ।

राजा— ननु विस्मयादवलोकयामि ।

रक्ताशोकरुचा विशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरवकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रियापि तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥ ५ ॥

अवधानेन तावत् दृष्टिं देहि सावधानं विलोकय । लज्जापयितृकं लज्जाकरम् । वसन्तकुसुममेव नेपथ्यं अलङ्कारः । गृहीतं प्राप्तम् ।

रक्तेति । योषितां वधूनाम् । बिम्बाधरालक्तकः बिम्ब श्रेष्ठवाचि अधर बिम्बस्यालक्तकः जपारसः यावकरसः । 'पद्मोद्भवः कुसुम्भस्तु यावकोऽलक्तकः स्मृतः ।' रक्ताशोकरुचा अशोकपुष्पशोभया । विशेषितगुणः अतीव रक्तगुणः शोणगुणो भवति । किंच, श्यामावदातारुणं श्यामं हरितं अवदातं सितं अरुणं रक्तम् । कुरवकं कुरवककुसुमम् । प्रत्याख्यातविशेषकं विशेषकशब्देनात्र पत्रलेखोच्यते 'पत्रकाणि विशेषकम् ' । लग्नद्विरेफाञ्जनैः सक्तभ्रमराञ्जनैः तिलकैः । तिलकक्रिया तिलककर्म आक्रान्ता । इयं माधवी श्रीः । योषितां, मुखप्रसाधनविधौ मुखालङ्कारकर्मणि । सावज्ञेव सावमतिरिव ॥ ५ ॥

रक्ताशोकेति । बिम्बाधरे बिम्बमिव अधरस्तस्मिन् । 'विशेषणं विशेष्येण बहुलम्' इति समासः । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्यपवादस्तु कवि

---

1. भवन्तमिव विलोकितुकामया मधुलक्ष्म्या 2 लज्जापयितृकं.

(उभौ उद्यानशोभां निरूपयतः ।)

(ततः प्रविशति पर्युत्सुका मालविका ।)

मालविका— अविण्णादहिअअं भट्टारं अहिलसन्दी अत्तणो वि दाव लज्जेमि । कुदो विहवो सिणिद्धसहिअणस्स इमं उत्तन्दं आआस्खिदुं । ण आणे अप्पडीआरगुरुअं वेअणं केत्तिअं कालं मअणो मं णइस्सदि । (कतिचित्पदानि गत्वा ।) कहिं णु खु पत्थिदम्हि (विचिन्त्य ।) आः सन्दिट्ठम्हि देवीए । जह मालविए गोदमचावलादो डोलापरिभ्भट्ठाए सरुजा मह चलणा । तुमं दाव तवणीआसोअस्स दोहदं णिव्वट्टेहि । जइ सो पञ्चरत्तभ्भन्दरे कुसुमं दंसेदि तदो अहं तुह (अन्तरा निश्वस्य ।) अहिलासपूरइत्तअं पसादं दाइस्सं ति । ता जाव णिओअभूमिं पुडमं गदा होमि । जाव अणुपदं मह चलणालङ्कारहत्थाए वउलावलिआए आअन्दव्वं । परिदेविस्सं दाव विस्सद्धं मुहुत्तअं ।

अविज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोऽपि तावल्लज्जे ।

भिरत्र प्रायेण नाङ्गीकृतः । अलक्तकः लाक्षा । रक्ताशोकरुचा रक्ताशोककुसुमकान्त्या । विशेषितगुणः विशेषितः अतिशयितः गुणः रागः यस्य सः तथोक्तः । श्यामावदातारुण श्यामं च अवदातं च अरुणं च तथोक्तम् । 'वर्णो वर्णेन' इति कर्मधारयसमासः । कुरवकं कुरवकपुष्पम् । प्रत्याख्यातविशेषकं प्रत्याख्यात तिरस्कृतं विशेषकं पत्रभङ्गो येन तथोक्तम् । लग्नद्विरेफाञ्जनैः लग्नः सक्तः द्विरेफः भ्रमर एव अञ्जनं येषु तैः । तिलकैः तिलककुसुमैः । तिलकक्रियापि तिलकस्य ललाटिकायाः क्रिया । आक्रान्ता उल्लङ्घिता, परिभूतेत्यर्थः । माधवी मधुसंबन्धिनी । श्रीः शोभा । योषितां स्त्रीणाम् । मुखप्रसाधनविधौ मुखालंकारकरणे । सावज्ञैव अवमानसहितैव, अवमाननां कृतवतीवेत्यर्थः ॥ ५ ॥

कुतो विभवः स्निग्धसखीजनस्येमं वृत्तान्तमाख्यातुम् । न जाने अप्रतीकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यति । कुत्र नु खलु प्रस्थितास्मि । आः! संदिष्टास्मि देव्या । [1]यथा 'मालविके! गौतमचापलात् डोलापरिभ्रष्टायाः सरुजौ मम चरणौ । त्वं तावत्तपनीयाशोकस्य दोहदं निर्वर्तय । यदि स पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततस्तव अभिलाषपूरयितृकं प्रसादं दास्यामि' इति । तद्यावन्नियोगभूमिं प्रथमं गता भवामि । यावदनुपदं मम चरणालङ्कारहस्तया वकुलावलिकया आगन्तव्यम्, परिदेवयिष्ये तावत विस्रब्धं मुहूर्तकम । (इति परिक्रामति ।)

विदूषकः— (दृष्ट्वा ।) ही ही इअं खु शीहुपाणुव्वेजिअस्स मच्छण्डिआ उवणदा ।

ही ही, इयं खलु शीधुपानोद्वेजितस्य मत्स्यण्डिका उपनता ।

राजा— अये किमेतत् ।

पञ्चरात्राभ्यन्तरे पञ्चरात्रमध्ये । अभिलाषपूरयितृक प्रियसम्मानदायकम । प्रसाद परितोषम् । नियोगभूमिं तपनीयाशोकसमीपम् । प्रथम पूर्वम् । अनुपद अनन्तर पश्चात् । चरणालङ्कारः यावकनूपुरादि । परिदेविष्यामि विरहासहना एकान्तास्थिता प्रलपिष्यामि । मत्स्यण्डिका खण्डशर्करा ।

* आः स्मृतौ । प्रथम गता भवामि 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । मत्स्यण्डिका नाम शर्करा विशेषः ।

---

1. 'मालविके! गौतमचापल्यात् डोलायाः परिभ्रष्टाहम् । तस्मान्न शक्नोमि चरणौ चलयितुम् । त्वं तावद्गत्वा तपनीयाशोकस्य दोहलं निर्वर्तय । यद्यसौ पञ्चरात्राभ्यन्तरं कुसुम दर्शयेत् ततोऽहं अभिलाषदापयितृपद दास्यामि' इति ।

विदूषकः— एसा खु णादिपज्जत्तवेसा पज्जूसुआ विअ एआइणी मालविआ अदूरे वट्टइ ।

एषा खलु नातिपर्याप्तवेषा पर्युत्सुकेव[1] एकाकिनी मालविका अदूरे वर्तते ।

राजा— (सहर्षम् ।) कथं मालविका ।

विदूषकः— अह इं । अथ किम ।

राजा— शक्यमिदानीमात्मानमवलम्बितुम्[2] ।

[3]तदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम विक्लबम् ।
तरुवृतं पथिकस्य पिपासतः
सलिलमारसितादिव सारसात् ॥ ६ ॥

अथ क्व तत्रभवती ।

विदूषकः— एषा णं तरुराजिमज्झादो णिक्कन्दा इदो एव्व परिवट्टन्दी दीसइ ।

उत्सुकवर्णा उत्सुकप्रकारा उत्सुकवेषा वा । जीवितं प्राणः ।

त्वदिति । विक्लबं विवशितम् । मम । तत् हृदयम् । प्रियां मालविकाम् । समीपगताम् आसन्नप्राप्ताम् । उपलभ्य श्रुत्वा । उच्छ्वसित प्रसन्नम् । जलार्थिनः जलपानेच्छोः । पथिकस्य पान्थस्य । तरुवृतां तरुच्छन्नाम् । सरितं कासारम् । आरसितात् शब्दितात् । सारसात् सारसपक्षिणः । आसन्नं जलमिति उपलभ्येव ।

* त्वदिति । अत्र संचिन्त्यमानार्थस्य प्राप्तेः क्रमो नाम सन्ध्यङ्गमुक्तं भवति ॥ ६ ॥

---

1. उत्सुकवर्णेव. 2. जीवितमवलम्बितुम्.
3. तरुवृतां पथिकस्य जलार्थिनः सरितमुद्रमितादिव सारसात् ॥

एषा ननु तरुराजिमध्यान्निष्क्रान्ता इत एव [1]परिवर्तमाना दृश्यते ।

राजा— वयस्य! पश्याम्योनाम् ।

[2]**विपुलं नितम्बबिम्बे मध्ये क्षामं समुन्नतं कुचयोः ।**
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ ७ ॥

सखे, पूर्वस्मादवस्थान्तरमुपारूढा तत्रभवती । तथा हि ।

शरकाण्डपाण्डुगण्डस्थलेयमाभाति[3] परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥ ८ ॥

विदूषकः— एसा वि भवं विअ मअणवाहिणा परामिट्ठा भविस्सदि ।

एषापि भवानिव मदनव्याधिना परामृष्टा भविष्यति ।

राजा— सौहार्दमेवं पश्यति ।

तरुराजिमध्यात् वृक्षसमूहान्तरात् ।

विपुलमिति । नितम्बबिम्बे श्रोण्याम् । विपुलं विशालम् । 'विशङ्कट पृथु बृहत् विशालं विपुलं महत्' इत्यमरः । मध्ये अवलग्ने । क्षामं कृशम् । कुचयोः स्तनयोः समुन्नतम् । नयनयोः लोचनयोः । अत्यायत अतिविस्तृतम् । मम । एतज्जीवितमेव । आयाति आगच्छति ॥ ७ ॥

अवस्थान्तर शोभान्तरम् ।

शरेति । शरकाण्डपाण्डुगण्डस्थला शरकाण्ड शरवणदण्डः गण्डयोः स्थल शरकाण्डवत् पाण्डु धवलं गण्डस्थल यस्याः सा पाण्डुकपोलेत्यर्थः । परिमिताभरणा अल्पाभरणभूषिता । इयं मालविका । आयाति । कथमिव, माधवपरिणतपत्रा वसन्तागमनजीर्णपर्णा । कतिपयकुसुमा अल्पप्रसूना । कुन्दलता इव ॥ ८ ॥

1. परिपतति. 2. पृथुलं. 3. ...स्थलीयमाभाति.

मालविका— अअं सो सुउमारदोहदावेक्खी अगहीद कुसुमणेवच्छो उक्कण्ठिदए मए अणुकरीदि असोओ । जाव से पच्छाअसीदले सिलापट्टए णिसण्णा अत्ताणं विणोदेमि ।

अयं स सुकुमारदोहदापेक्षी अगृहीतकुसुमनेपथ्य [1]उत्कण्ठिताया ममानुकरोत्यशोकः । यावदस्य प्रच्छायशीतले शिलापट्टके निषण्णात्मानं विनोदयामि ।

विदूषकः— सुदं होदा उक्कण्ठिदम्हित्ति तत्तहोदीए मन्तिदं ।

श्रुतं भवता उत्कण्ठिताम्मीति[2] तत्रभवत्या मन्त्रितम ।

राजा— नैतावता भवन्तं प्रसन्नतर्कं मन्ये । कुतः ।

वोढा कुरवकरजसां किसलयपुटभेदशीकरानुगतः ।
अनिमित्तामुत्कण्ठामपि जनयति मलयवातोऽयम् ॥ ९ ॥

(मालविका उपविष्टा ।)

राजा— वयस्य ! इतस्तावदावां लतान्तरितौ भवावः ।

विदूषकः— इरावदिं वि अदूरे समत्थेमि ।

इरावतीमिवादूरे समर्थये ।

परामृष्टा स्पर्शिता । सौहार्दं सुहृद्भावः । उत्कण्ठिताया ममानुकरोति अशोकः उत्कण्ठितां मामनुकरोति । प्रसन्नतर्कतां स्पष्टविचारताम् ।

वोढेति । कुरवकरजसां कुरवकपुष्पपरागान् । "परागः सुमनोरजः ।" कर्मणि षष्ठी । वोढा वहन् । किसलयपुटभेदशीकरानुगतः प्रवालमुकुलविकासनमकरन्दशीकरसहितः । मलयवातः । मनसः चेतसः । अनिमित्तोत्कण्ठां प्रियाविरहरहितस्यापि उत्कण्ठां औत्सुक्यम् । जनयति ॥ ९ ॥

1. उत्कण्ठितां माम्. 2. उत्कण्ठितामिति 3. अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः.

राजा— न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते[1] मतङ्गजः ।

(इति विलोकयन्स्थितः ।)

मालविका— हिअअ णिरवलम्बादो मणोरहादो विरम । किं मं आआसेसि ।

हृदय निरवलम्बान्मनोरथाद्विरम । [2]किं मामायासयसि ।

(विदूषकः राजानमवेक्षते ।)

राजा— आत्मगत ।) प्रिये ! पश्य वामतां स्नेहस्य ।

औत्सुक्यहेतुं विवृणोषि न त्वं
तत्त्वावबोधैकरसो न तर्कः ।
तथापि रम्भोरु करोमि लक्ष्य-
मात्मानमेषां परिदेवितानाम् ॥ १० ॥

विदूषकः— सम्पदं भवदो णिस्संसअं भविस्सदि । एसा अप्पिद मअणसन्देसा विवित्ते णं वउलावलिआ उवट्ठिदा ।

सांप्रतं भवतो निःसंशयं भविष्यति । एषार्पितमदन-संदेशा विविक्ते ननु वकुलावलिकोपस्थिता ।

मतङ्गजः मत्तगजः । कमलिनीं सरितम् । ग्राहं नक्रम् । नापेक्षते हि न गणयति । चिराय किमायास्य आयासं कृत्वा किं प्रयोजनम् ।

औत्सुक्येति । प्रिये । त्वम् । औत्सुक्यहेतु विचाराभिलाषकारणम् । न विवृणोषि न प्रकाशयसि । तर्कः विचारः । तत्त्वावबोधैकरसः तत्त्वं तथ्यम् अवबोधः ज्ञानं सत्यज्ञाने एकरसः मुख्यरसः । न अभिलाषार्थमिति न ज्ञायत एव । हे रम्भोरु । तथापि, एषां परिदेवितानां विलापानाम् आत्मानम् । लक्ष्यं करोमि विलापपात्रमहं भवामि । 'विलापः परिदेवनम्' ॥ १० ॥

1. ग्राहमपेक्षते. 2. चिराय किमायास्य.

राजा— अपि स्मरेदस्मदभ्यर्थनाम् ।

विदूषकः— किं दाणिं एसा दासीए सुदा तुह गुरुअं सन्देशं विसुमरिस्सदि । अहं वि दाव दाणिं एदं ण विसुमरेमि ।

किमिदानीमेषा दास्याःसुता तव गुरुकं सन्देशं विस्मरिष्यति । अहमपि तावदिदानीमेतं न विस्मरामि ।

(प्रविश्य चरणालङ्कारहस्ता वकुलावलिका ।)

वकुलावलिका— अवि सुहं सहीए । अपि सुखं सख्याः ।

मालविका— अम्हो वउलावलिआ । सहि साअदं दे । उवविस ।

अहो, वकुलावलिका । सखि! स्वागतं ते । उपविश ।

वकुलावलिका— (उपविश्य ।) हला तुमं दाव दाणिं देवीए जोग्गदाए णिउत्ता । ता एक्कं दे चलणं उवणेहि । जाव सालत्तअं सणेउरं करेमि ।

हला, त्वं तावदिदानीं देव्या योग्यतया नियुक्ता । तदेकं ते चरणमुपनय यावत्सालक्तकं सनूपुरं करोमि ।

मालविका— (स्वगतम् ।) हिअअ अलं सुहिददाए अयं विहवो उवट्ठिदो त्ति । कहं दाणिं अत्ताणं मोचएअम् । अहवा एदं एव्व मे मिच्चुमण्डणं भविस्सदि ।

हृदय, अलं सुखिततया अयं विभव उपस्थित इति । कथमिदानीमात्मानं मोचयेयम् । अथवा एतदेव मे मृत्युमण्डनं भविष्यति ।

अभ्यर्थिनां प्रार्थनाम् । अपिः प्रश्ने । मृत्युमण्डनं शवालङ्कारः ।

वकुलावलिका— किं विआरेसि । उम्सुआ खु एदस्स तवणी-आसोअस्स कुसुमुग्गमे देवी ।

किं विचारयसि । उत्सुका खल्वेतस्य तपनीयाशोकस्य कुसुमोद्गमे देवी ।

राजा— कथमशोकदोहदनिमित्तोऽयमारम्भः ।

विदूषकः— किंणु खु ण आणासि अकालणादो देवी इमं अन्देउरणेवच्छेण ण संजोअइस्सदित्ति ।

किं नु खलु न जानासि अकारणादेवी इमां अन्तःपुरनेपथ्येन न संयोजयिष्यतीति ।

मालविका— (पादमुपहरन्ती ।) हला मरिसेहि दाणिं ।

हला मर्षयेदानीम् ।

वकुलावलिका— अइ सरीरं सि मे । (नाट्येन चरणालङ्कारमारभते)

अयि शरीरमसि मे ।

राजा—

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य रागरेखाम् ।
प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोभवद्रुमस्य ॥ ११ ॥

उत्सुका अभिलाषवती । अन्तःपुरनैपथ्य देवीनूपुराभरणम् ।

चरणेति । हे वयस्य । प्रियायाः । चरणान्तनिवेशितां पादाग्रप्रयुक्ताम् । सरसां सद्रवां "रसो रागे द्रवे" रागरेखां लाक्षारसशोणरेखाम् । हरदग्धस्य ईश्वरनयनाग्निदाहितस्य । मनोभव एव द्रुमः तस्य कामवृक्षस्य । प्रथमां पूर्वमुत्पन्नाम् । पल्लवप्रसूतिं किसलयाङ्कुरमिव । पश्येति सम्बन्धः । उपक्षिप्तः दत्तः ।

विदूषकः— चलणाणुरुवो खु तत्तहोदीए अहिआरो उवक्खित्तो ।

चरणानुरूपः खलु तत्रभवत्या [1]अधिकार उपक्षिप्तः ।

राजा— सम्यगभिहितं भवता ।

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दोहदापेक्षया वा
[2]प्रणिहितशिरसं वा कान्तमार्द्रापराधम् ॥ १२ ॥

विदूषकः— पारइस्ससि तत्तहोदीए अवरद्धुं ।

पारयिष्यसि तत्रभवत्या अपराद्धुम् ।

राजा— प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य ।

(ततः प्रविशति युक्तमदा इरावती चेटी च ।)

इरावती— हञ्जे णिउणिए सुणामि बहुसो मदो किल इत्थिआजणस्स विसेसमण्डणं ति । अवि सच्चो अअं लोअवादो ।

हञ्जे निपुणिके ! श्रृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्योऽयं लोकवादः ।

नवेति । बाला । नवकिसलयरागेण प्रत्यग्रप्रवालशोभितेन । स्फुरितनखरुचा विलसन्नखकान्तियुक्तेन । अनेन । अग्रपादेन पादाग्रेण । हन्तु प्रहर्तुम् । द्वौ । अर्हति प्राप्ता भवति । अकुसुमित अपुष्पतम् अशोक च । दोहलापेक्षया दोहदप्राप्तये । आर्द्रापराध प्रत्यग्रापराधम् । प्रणिहितशिरस पादतले निहितशिरसम् । कान्त नायक च । द्वौ हन्तुमर्हतीति ॥ १२ ॥

1. अलंकार 2 प्रणमितशिरस 3. प्रहरिष्यति तत्रभवती त्वामपराद्धम् .

निपुणिका— पुडमं लोअवादो एव्व । अज्ज उण सच्चो संवुत्तो
प्रथमं लोकवाद एव । [1]अद्य पुनः सत्यः संवृत्तः ।

इरावती— अलं मइ सिणेहेण । कुदो दाणिं अवगदं डोलाघरं पुडमं गदो भट्टेत्ति ।

[2]अलं मयि स्नेहेन । कुत [3]इदानीमवगतं डोलागृहं प्रथमं गतो भर्तेति ।

निपुणिका— भट्टिणीए अखण्डिदादो पणआदो ।
भट्ट्रिन्या अखण्डितात्प्रणयात् ।

इरावती— अलं सेवाए । मज्झत्थदं गाह्मिए भणाहि ।
अलं सेवया । मध्यस्थतां गृहीत्वा भण ।

निपुणिका—वसन्दोवाअणलोलुवेण अज्जगोदमेण कहिदं । तुवरदु भट्टिणी ।

[4]वसन्तोपायनलोलुपेनार्यगौतमेन कथितम् । त्वरतां भट्टिनी ।

इरावती— (अवस्थासदृशं परिक्रम्य ।) हञ्जे, मएण मिलाअमाणं मं अज्जउत्तदंसणे हिअअं तुवरावेदि । चलणा उण मग्गे ण प्पसरन्दि ।

हञ्जे, मदेन म्लायमानां मामार्यपुत्रदर्शने हृदयं त्वरयति । चरणौ पुनर्मार्गे न प्रसरतः ।

लोकवादः जनवादः । अवगत ज्ञातम् । वसन्तवादनलोलुपेन वसन्तावतारे क्रियमाणे स्वस्तिवादेन स्वस्तिवादनदक्षिणाहूतेन मोदकलाभे लोलुपेनित्यर्थः ।

1 इदानीं सत्य संवृत्तम् . 2 संकीर्तनशंसिना स्नेहेनालम् . 3 इदमवगत 4 वसन्तवादनलोलुपेन 5 क्रम्यन्त

निपुणिका— णं सम्पत्तह्म डोलाघरअं ।

ननु संप्राप्ते स्वो डोलागृहम् ।

इरावती— णिउणीए ण एत्थ अज्जउत्तो दीसइ ।

निपुणिके ! नात्रार्यपुत्रो दृश्यते ।

निपुणिका— ओलोएदु भट्टिणी । परिहासणिमित्तं कहिंवि गूढेण भट्टिणा होदव्वं । अम्हे वि इम पिअंङ्गुलदापरिक्खित्तं असोअसिलापट्टअं पविसह्म ।

अवलोकयतु भट्टिनी । परिहासनिमित्तं [1]कुत्रापि गूढेन भर्त्रा भवितव्यम् । [2]आवामपीमं प्रियङ्गुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः ।

(इरावती तथा करोति ।)

निपुणिका— (परिक्रम्य विलोक्य ।) ओलोएदु भट्टिणी । चूदङ्कुरं विइण्णन्दीणं अह्माणं पिपीलिआहिं दंसिदं ।

अवलोकयतु भट्टिनी । चूताङ्कुरं विचिन्वन्त्योरावयोः पिपीलिकाभिर्दष्टम् ।

इरावती— किं विअ एदं । किमिवैतत् ।

निपुणिका— एसा वउलावलिआ असोअपाअवच्छाआए मालविआए चलणालङ्कारं णिव्वट्टेदि ।

एषा वकुलावलिका अशोकवृक्षच्छायायां मालविकायाश्चरणालङ्कारं निर्वर्तयति ।

गुल्मे द्रुमसमूहे । पिपीलिकाभिर्दष्ट राजान मार्गमाणयोरावयोर्मालविकादर्शन पिपीलिकादंशनसमीमल्यर्थः ।

---

1. कस्मिन्नपि गुल्मे अदृष्टेन 2. तस्मादिद

इरावती— (शङ्कां रूपयित्वा।) अभूमी इअं मालविअ ए। किं तक्केसि।

अभूमिरियं मालविकायाः। [1]किं तर्कयसि।

निपुणिका— तक्केमि डोलापरिभ्भट्ठाए सलुजचलणाए असोअदोहदाहिआरे णिउत्ता मालविएत्ति। अण्णहा कहं देवी सअं धारिदं णेउरजुअलं परिअणस्स अणुजाणिस्सदि।

तर्कयामि डोलापरिभ्रष्टया सरुजचरणया देव्या अशोकदोहदाधिकारे नियुक्ता मालविकेति। अन्यथा कथं देवी स्वयं धारितं नूपुरयुगलं परिजनस्यानुज्ञास्यति।

इरावती— महदी खु से सम्भावणा।

महती खल्वस्याः सम्भावना।

निपुणिका— किं उण ण अण्णेसीअदि भट्टा।

किंपुनर्नान्विष्यते भर्ता।

इरावती— हंजे मे चलणा अण्णदो ण प्पवट्टन्दि। मणो वि किं वि विआरेदि। आसङ्किदस्स दाव अन्तं गमिस्सं। (मालविकां निर्वर्ण्य आत्मगतम्।) ठाणे खु कादरं मे हिअअं।

हञ्जे, मे चरणावन्यतो न प्रवर्तेते। मनोऽपि किमपि विकारयति। आशङ्कितस्य तावदन्तं गमिष्यामि। स्थाने खलु कातरं मे हृदयम्।

वकुलावलिका— (चरण दर्शयन्ती) हला, मालविए अवि रोअदि दे अअं चलणराअरेहाविण्णासो।

1. कथमत्र.

हला मालविके! अपि रोचते तेऽयं चरणरागरेखा-विन्यासः ।

मालविका— अत्तणो चलणगदोत्ति लज्जेमि णं पसंसिदुं । कहेहि केण पसाहणकलाए अहिविणीदासि ।

आत्मनश्चरणगत इति लज्जे एनं प्रशंसितुम् । कथय केन [1]प्रसाधनकलायामभिविनीतासि ।

वकुलावलिका— एत्थ खु भट्टिणो सिस्सम्हि ।

[2]अत्र खलु भर्तुः शिष्याम्हि ।

विदूषकः— तुवरेहि दाणिं गुरुदक्खिणाए ।

त्वरस्वेदानीं गुरुदक्षिणायै ।

मालविका— दिट्ठिआ ण गव्विदासि ।

दिष्ट्या न गर्वितासि ।

वकुलावलिका— उवदेसाणुरूवे चलणे लम्भिअ दाणिं गव्विदा भविस्सं । (स्वगतम् ।) हन्त सिद्धं मे दौत्यम् । (प्रकाशम् । राग विलोक्य) सहि एक्कस्स दे चलणस्स अवसिदो राअणिरूवेवो । केवलं मुहमारुदो लम्भइदव्वो । अहवा पवादो एव्व अअं पदेसो ।

उपदेशानुरूपे चरणे लब्ध्वा इदानीं गर्विता भविष्यामि । हन्त! सिद्धं मे दौत्यम् । सखि! एकस्य ते चरणस्यावसितो

अभिविनीता शिक्षिता ।

1. शिल्पेन साधनकलायां. 2. अत्राहं.

[1]रागनिक्षेपः । केवलं मुखमारुतो [2]लम्भयितव्यः । अथवा [3]प्रवात एवायं प्रदेशः ।

राजा— सखे, पश्य पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन वीजयितुम्[4] ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ १३ ॥

विदूषकः— कुदो दे अणुसओ । चिरं भवदा एदं कमेण अणुहोदव्वं ।

कुतस्तेऽनुशयः । चिरं भवतैतत्क्रमेणानुभवितव्यम् ।

वकुवलिका— महि अरुणसदपत्तं विअ सोहदि दे चलण सव्वहा भट्टिणो अङ्कपरिवट्टिणी होहि ।

सखि, अरुणशतपत्रमिव शोभते ते चरणम् । सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।

(इरावती निपुणिकामुखमवेक्षते ।)

राजा— ममेयमाशी ।

मालविका— हला अवअणीअं मन्थेसि ।

हला, अवचनीयं मन्त्रयसे ।

उपलभयितव्य प्राप्यः ।

आर्द्रेति । अस्या मालविकाया. । आर्द्रालक्तक द्रवालक्तकम् । 'यावकोऽलक्तकः स्मृत.' । चरण पादम् । मुखमारुतेन मुखवायुना । वीजयत शोषणार्थं फूत्कारवायु कुर्वतः । मे मम । प्रथमतर. श्रेष्ठतरः । सेवावकाशः सेवावसरः । प्रतिपन्न प्राप्तः ॥ १३ ॥

अरुणशतपत्र रक्तोत्पलमिव ।

---

1 रागविक्षेपः. 2. उपलम्भयितव्यः 3. प्रवातमेवैतत् स्थानम्. 4. शोषयतः

वकुलावलिका— मन्तिदव्वं एव्व मए मन्तिदं ।
मन्त्रयितव्यमेव मया मन्त्रितम् ।

मालविका— पिआ खु अहं तुह । प्रिया खल्वहं तव ।

वकुलावलिका— ण केवलं मह । न केवलं मम ।

मालविका— कस्स वा अण्णस्स । कस्य वान्यस्य ।

वकुलावलिका— गुणेसु अहिणिवेसिणो भट्टिणो वि ।
गुणेष्वभिनिवेशिनो भर्तुरपि ।

मालविका— अलीअं मन्तेसि । एदं एव्व मइ णत्थि ।
अलीकं मन्त्रयसे । एतदेव मयि नास्ति ।

वकुलावलिका— सच्च तुइ णत्थि । भट्टिणो किसेसु सुन्दरपण्डुरेसु अङ्गेसु दीसइ ।
[1]सत्यं त्वयि नास्ति । भर्तुः कृशेषु [2]सुन्दरपाण्डुरेष्वङ्गेषु दृश्यते ।

निपुणिका— पुडमगणिदं विअ हदासाए उत्तरं ।
[3]प्रथमगणितमिव हताशाया उत्तरम् ।

वकुलावलिका— अणुराओ अणुराएण परिक्खिदव्वोत्ति सुअणवअणं पमाणीकरेहि ।
अनुरागोऽनुरागेण परीक्षितव्य[4] इति सुजनवचनं प्रमाणीकुरु ।

अभिनिवेश अभिलाषः । अलीक असत्यम् । दरपाण्डरेषु ईषत्पाण्डरेषु । प्रतीष्टव्यः वाञ्छितव्यः ।

1. सर्व. 2. दरपाण्डुरेषु. 3. प्रथमं भणितमिव ; प्रथम प्रगुणितमेव 4. प्रत्येष्टव्यः; प्रतीष्टव्यः.

मालविका— किं अत्तणो छन्देण मन्तेसि ।
किमात्मनश्छन्देन मन्त्रयसे ।

वकुलावलिका— णहि णहि । भट्टिणो खु एदाइ पणअ मिदु-आइ बिम्बन्दरिदाइ अक्खराइ ।
नहि नहि । भर्तुः खल्वेतानि प्रणयमृदुकानि[1] बिम्बा-न्तरितान्यक्षराणि ।

मालविका— हला देविं चिन्तिअ ण मे हिअअं विस्ससदि ।
हला । देवीं चिन्तयित्वा न मे [2]हृदयं विश्वसिति ।

वकुलावलिका— मुद्धे भमरसम्बाधोत्ति वसन्दोदारसव्वस्सभूदो किं ण चूदपसवो ओदंसणिज्जो ।
मुग्धे ! [3]भ्रमरसम्बाध इति वसन्तावतारसर्वस्वभूतः किं न चूतप्रसवोऽवतंसनीयः ।

मालविका— तुमं दाव दुज्जादे मह अच्चन्दसहाइणी होहि ।
त्वं तावद्दुर्जाते ममात्यन्तसहायिनी भव ।

वकुलावलिका— विमद्दसुरही वउलावलिआ खु अहं ।
विमर्दसुरभिर्वकुलावलिका खल्वहम् ।

राजा— साधु, वकुलावलिके ! साधु ।

बिम्बान्तरितानि मच्छरीरसंक्रान्तानीत्यर्थः । बिम्ब देहः । दुर्जाते व्यसने प्राप्ते । दुर्जातबन्धुरयमृक्षहरीश्वरः'

1. प्रणयमृदूनि. 2 हृदयस्य प्रभविष्ये. 3. भ्रमरबाधो भविष्यतीति वसन्तावसरसर्वस्वं किं न चूतप्रसवो अवतंसयितव्यः.

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनां दूत्यधीनाः ॥ १४ ॥

इरावती— हञ्जे पेक्ख पेक्ख । कारिदा एव्व एदस्सिं वउलावलिआए पदं मालविआए ।

हञ्जे! पश्य पश्य । [1]कारितैवैतस्मिन् वकुलावलिकया पदं मालविका ।

निपुणिका— भट्टिणि णिव्विआरस्स वि ऊसुअदाजणओ उवदेसो ।

भट्टिनि! निर्विकारस्याप्युत्सुकताजनक उपदेशः ।

इरावती— ठाणे सङ्किदं मे हिअअं । गहिदत्था अणन्तरं चिन्तइस्सं ।

स्थाने शङ्कितं मे हृदयम् । गृहीतार्थानन्तरं चिन्तयिष्यामि ।

भावेति । "अलीकं मन्त्रयसे, एतदेव मयि नास्ति" इत्यादिना मालविकाभावो ज्ञातः । तदनन्तरं प्रस्तुतं वकुलावलिका वाक्यम् 'अनुरागोऽनुरागेण प्रतीष्टव्यः' इत्यादिना तस्य प्रत्याख्यानं 'किमात्मनच्छन्देन' इत्यादिना । तस्य 'भर्तुः खल्वेतानि' इत्यादि युक्तोत्तरं तद्वता तेन वाक्येन । स्वे निदेशे स्थापिता मालविकेति यत्, तेन, कामिनां प्राणाः दूत्यधीना इति यदुच्यते, तत् स्थाने युक्तमित्यर्थः ।

एतत् पदं एष व्यवसायः । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इति । निर्विकारस्य हीनशक्तेः । विचारक्षमाः परस्मै यत् किञ्चित् कार्यमादिशन्तीत्यर्थः ।

1. कारितमेव वकुलावलिकया मालविकाया एतत् पदं.

वकुलावलिका— एसो दुदीओ वि समत्तपडिअम्मा दे चलणो । जाव दुवे वि सणेउरे करोमि । (नाट्येन नूपुरयुगलमामुच्य ।) हला उट्ठेहि अणुचिट्ठ देवीए असोअविआसइत्तअं णिओअं । (उभे उत्तिष्ठतः ।)

एष द्वितीयोऽपि समाप्तपरिकर्मा[1] ते चरणः । यावद्वावपि सनूपुरौ करोमि । हला उत्तिष्ठ । अनुतिष्ठ देव्या अशोकविकासयितृकं नियोगम् ।

निपुणिका— सुदं देवीए णिओओत्ति दाणिं ।

श्रुतं देव्या नियोग इतीदानीम् ।

वकुलावलिका— एसो उहारूढराओ उवभोअक्खमो पुरदो दे देसइ ।

एष [2]उपारूढराग उपभोगक्षमः पुरतस्ते [3]दृश्यते ।

मालविका— (सहर्षम् ।) किं भट्टा । किं भर्ता ।

वकुलावलिका— (सस्मितम् ।) ण दाव भट्टा । एसो असोअसाहावलग्बी पल्लवगुच्छो । ओदंसेहि दाव णं ।

न तावद्भर्ता । एषोऽशोकशाखावलम्बी पल्लवगुच्छः । अवतंसय तावदेनम् ।

विदूषकः— अवि सुदं भवदा । अपि श्रुतं भवता ।

राजा— सखे! पर्याप्तमेतावता कामिनाम् ।

उपरूढरागः गृहीतस्नेहः । उपभोगक्षमः संभोगक्षमः ।

1. प्रतिकर्मा 2. उपोढरागः. 3. वर्तते.

अनातुरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः ॥ १५ ॥

(मालविका रचितपल्लवावतंसा सलीलमशोकाय पादं प्रहिणोति ।)

राजा— वयस्य! पश्य ।

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ १६ ॥

अनातुरेति । अनातुरः अनुत्कण्ठितः विरहाभिलाषी च । अनातुरोत्कण्ठितयोः अपरक्तानुरक्तयोः प्रसिध्यता सिद्धिं प्राप्नुवता । समागमेन सयोगेन सपर्केणापि । मां प्रति अस्मानुद्दिश्य । रतिर्न प्रीतिर्नास्त्येव । एष समागमो मह्यं रोचते । किंतु, समनुरागयोः अन्योन्यमुत्कण्ठितयोः । पश्चात्तदलाभात्, परस्परप्राप्तिनिराशयोः अन्योन्यसमागमनिरभिलाषयोः तयोः । शरीरनाशोऽपि वरं मरणमपि श्रेष्ठं हितमित्यर्थः ॥ १५ ॥

आदायेति । अस्मात् अशोकात् । कर्णकिसलयं कर्णपूरम् । आदाय गृहीत्वेयं मालविका, अत्र अशोके । चरणं पादम् । अर्पयति । उभयोः सदृशविनिमयात् अशोकचरणयोरसादृश्यत्वात् । आत्मानं वञ्चितं मन्ये ॥ १६ ॥

* अनातुरेति । अनातुरोत्कण्ठितयोः अनातुरः अनार्तः कामोत्कण्ठारहित इत्यर्थः । प्रसिध्यता सभवता । समागमेनापि सपर्केणापि । मां प्रति मां अनु । मत्पक्ष इत्यर्थः । रतिः शृङ्गारः न भवति एकानुरागस्य रसाभासत्वात् । तथा चोक्तम्— "एकत्रैवानुरागश्च बहुमक्तिश्च योषितः । अनौचित्यप्रवृत्तत्वाच्छृङ्गाराभास इष्यते ॥" इति ॥ १५ ॥

* आदायेति । कर्णकिसलयं कर्णपूरार्थकिसलयम् । अत्र कर्णशब्देन कर्णपूरो लक्ष्यते ॥ १६ ॥

बकुलावलिका— हला णत्थि दे दोसो णिग्गुणो अअं असोओ जइ कुसुमुब्भेदमन्थरो भवे जो ईरिसं चरणसक्कारं लहेइ ।

हला, नास्ति ते दोषः । निर्गुणोऽयमशोकः यदि कुसुमोद्भेदमन्थरो भवेद्य ईदृशं चरणसत्कारं लभते ।

राजा—

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन संभावितः ।
अशोक यदि सद्य एव [1]कुसुमैर्न संपत्स्यसे
वृथा वहसि दोहदं ललितकामिसाधारणम् ॥

सखे! वचनावसरपूर्वं प्रवेष्टुमिच्छामि ।

विदूषकः— एहि णं परिहासइस्सं ।

एनेनां परिहासयिष्यामि ।

(उभौ प्रवेश कुरुतः ।)

निपुणिका— भट्टिणि भट्टा एत्थ एव्व पविसइ ।

कुसुमोद्भेदमन्थरः कुसुमदर्शनमन्दः । योऽयमशोकः ईदृशं चरणसत्कारं लभते, स यदि कुसुमोद्भेदमन्थरो भवेत् नैष ते दोषः । अयमशोको निर्गुणः विरस इत्यर्थः ।

अनेनेति । तनुमध्यया कृशोदर्या । मुखरनूपुराराविणा वाचालमञ्जीरशब्दसहितेन । नवाम्बुरुहकोमलेन सद्योविकसितसरोजवन्मनोहरेण । अनेन चरणेन । संभावितः स्पृष्टः । त्वम् । अशोक । सद्यः झटित्येव मुकुलैः कुसुमैः । न संपत्स्यसे न जनिष्यते यदि । ललितकामिसाधारणं शृङ्गारविलासियुवसमुदायं साधारणम् । दोहलं आर्तवसूनम् , दोहलवृक्ष इति प्रसिद्धिम् । वृथा वहसि निरर्थकं वहसि ।

1. मुकुलैः.

भट्टिनि ! भर्ता अत्रैव प्रविशति ।

इरावती— इदं मह पुडमं चिन्तिदं हिअएण ।

इदं मम [1]प्रथमं चिन्तितं हृदयेन ।

विदूषकः— (उपसृत्य ।) होदि जुत्तं णाम अत्तहोदो पिअवअ-स्सो अअं वामपादेण ताडिदुं ।

भवति ! युक्तं नामात्रभवतः प्रियवयस्योऽयं[2] वामपादेन ताडयितुम् ।

उभे— (ससम्भ्रमम् ।) अह्मो भट्टा । अहो भर्ता ।

विदूषकः— वउलावलिए तुए गहिदत्थाए ईरिसं अविणअं करन्दी किं सही ण णिवारिदा ।

वकुलावलिके ! त्वया गृहीतार्थया [3]ईदृशमविनयं कुर्वती [4]किं सखी न निवारिता ।

(मालविका भय रूपयति ।)

निपुणिका— भट्टिणि पेक्ख किं पवुत्तं अज्जगोदमेण ।

भट्टिनि ! पश्य किं [5]प्रवृत्तमार्यगौतमेन ।

इरावती— कहं बह्मबन्धू अण्णहा जीविस्सदि ।

कथं ब्रह्मबन्धुरन्यथा जीविष्यति ।

वकुलावलिका— अज्ज एसा देवीए णिओअं अणुचिट्ठदि । एदस्सिं अदिक्कमे परवदी इअं । पसीददु भट्टा ।

1. प्रथमचिन्तित. 2. अयमशोकः. 3. अत्रभवतीदृश 4. कस्मान्न वारिता 5. प्रयुक्त.

आर्य! एषा देव्या नियोगमनुतिष्ठति। एतस्मिन्नतिक्रमे परवतीयम्। प्रसीदतु भर्ता।

(आत्मना सममेनां प्रणिपातयति।)

राजा— यद्येवमनपराद्धासि। उत्तिष्ठ भद्रे। (हस्ते गृहीत्वोत्थापयति।)

विदूषकः— जुज्जइ। देवी एत्थ माणइदव्वा।
युज्यते देव्यत्र मानयितव्या।

राजा— (विहस्य।)

किसलयमृदोर्विलासिनि कठिने निहितस्य पादपस्कन्धे।
चरणस्य न ते बाधा संप्रति वामस्य वामोरु॥ १८॥

(मालविका लज्जां नाटयति।)

इरावती— (सासूयम्।) अहो अविणीदहिअओ खु अज्जउत्तो।
अहो! अविनीतहृदयः खल्वार्यपुत्रः।

मालविका— वउलावलिए एहि अणुट्ठिदं अत्तणो णिओअं देवीए णिवेदेह्म।

वकुलावलिके! एहि। अनुष्ठितमात्मनो नियोगं देव्यै निवेदयावः।

वकुलावलिका— तेण हि विण्णवेहि भट्टारं विसज्जेहि मं ति।
तेन हि विज्ञापय भर्तारं 'विसर्जय माम्' इति।

किसलयेति। हे विलासिनि। कठिने पादपस्कन्धे कठिने विटपे। निहितस्य। किसलयमृदोः। ते। वामस्य चरणस्य वामपादस्य। वामोरु। संप्रति बाधा व्यसनं न नह्यपि॥ १८॥

* किसलयेति। अत्र प्रियोक्त्या संग्रहो नाम सन्ध्यङ्गमुक्तं भवति॥

राजा— भद्रे! यास्यसि । मम तावदुपपन्नावसरमर्थित्वं श्रूयताम् ।

वकुलावलिका— अवहिदा सुणाहि । आणवेदु भट्टा ।

अवहिता शृणु । आज्ञापयतु भर्ता ।

राजा—

धृतिपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्प्रभृति ।
स्पर्शामृतेन पूरय दोहदमस्याप्यनन्यरुचेः ॥ १९ ॥

इरावती— (सहसोपसृत्य ।) पूरेहि पूरेहि । असोओ कुसुमं दंसेदि ण वा । अअं उण पुप्फइ फलइ अ ।

पूरय पूरय । अशोकः कुसुमं दर्शयति न वा । अयं पुनः पुष्प्यति फलति च ।

(सर्वे इरावतीं दृष्ट्वा सभ्रान्ता. ।)

राजा— (अपवार्य ।) वयस्य! का प्रतिपत्तिरत्र ।

विदूषकः— किं अण्णं जङ्घाबलं एव्व ।

किमन्यत् । [1]जङ्घाबलमेव ।

धृतीति । अयमपि जनः अहमपि । चिरात्प्रभृति अनेककालमारभ्य । तादृश तत्सदृशम् । धृतिपुष्पं प्रियसूनम् । न बध्नाति अयमशोक इव चिरकालेनापि न बध्नातीत्यर्थः । अनन्यरुचेः अन्यासु नरुचेः अनन्याभिलाषिणः । अस्य मम । दोहलं वाञ्छाम् । स्पर्शामृतेन आलिङ्गनादिस्पर्शरसेन ॥ १९ ॥

जङ्घावलम्बनमेव जङ्घामवलम्ब्य पादवन्दनमेव । जङ्घाबलमिति पाठे भावनमेवेत्यर्थः ।

* पूरयेत्यादि । अत्र सरब्धवचनात् तोटक नाम सन्ध्यङ्गमुक्तं भवति । वयस्येत्यादि । अत्र भीतेर्गम्यमानत्वादुद्भेदो नाम सन्ध्यङ्गमुक्तं भवति ।

1. जङ्घावलम्बनमेव.

इरावती— वउलावलिए साहु तुए उवक्कन्दं । मालविए तुमं दाव करेहि सफलपत्थणं अज्जउत्तं ।

वकुलावलिके ! साधु त्वयोपक्रान्तम् । मालविके ! त्वं तावत् कुरु सफलप्रार्थनमार्यपुत्रम् ।

उभौ— प्रसीददु भट्टिणी । का वअं भट्टिणो पणअपरिग्गहस्स ।

प्रसीदतु भट्टिनी । [1]का वयं भर्तुः प्रणयपरिग्रहस्य ।

(इति निष्क्रान्ते ।)

इरावती— अहो अविस्ससणीआ पुरिसा । मए खु अत्तणो वञ्चणा वाहजणगीदिरत्ताए हरिणीए विअ असङ्किदाए ण विण्णादा ।

अहो ! अविश्वसनीयाः पुरुषाः । मया खल्वात्मनो [2]वञ्चना व्याधजनगीतिरक्तया हरिण्येवाशङ्कितया न [3]विज्ञाता ।

विदूषकः— (जनान्तिकम् ।) पडिजोएहि किं वि दाणिं । किंअण्णं कम्मगहीदेएण कुम्भीलएण सन्धिच्छेअणं सिक्खिदोह्मि त्ति वत्तव्वं होइ ।

[4]प्रतियोजय किमपीदानीम् । किमन्यत् कर्मगृहीतेन[5] कुम्भीलकेन सन्धिच्छेदनं शिक्षितोऽस्मीति वक्तव्यं भवति ।

किमपि प्रतियोजय मृषोद्यं यत्किञ्चिद्भणेत्यर्थः । कुम्भीलकेन चोरेण तेन पुनरहं न चौर्यं करोमि, कुड्यसन्धिच्छेदनशिक्षकोऽस्मीति यथा यत्किञ्चिदुच्यते, एवमस्माभिरपि मृषोद्य यत्किञ्चिद्वक्तव्यमित्यर्थः ।

* एतदित्यनेन राज्ञः कपटाचरणं परामृश्यते । कर्मगृहीतेन कर्मणि चौर्यकर्मणि गृहीतेनापि कुम्भीरकेण चोरेण सन्धिच्छेदने पिहितभूमिः सन्धिः तस्याश्छेदने भेदने । सुरङ्गकरण इत्यर्थः । शिक्षितः अभ्यसितास्मि । इति वक्तव्यं भवति । किमपि प्रयोजय उपपन्नं अनुपपन्नं वा उत्तरं कुर्वित्यर्थः ।

1. के आवां 2. वञ्चनावचनं. 3 विज्ञातमेतत् 4. प्रयोजय. 5. कर्मगृहितेनापि

राजा— सुन्दरि! न मे मालविकायां कश्चिदर्थः । मया त्वं चिरायसीति यथाकथंचिदात्मा विनोदितः ।

इरावती— मए ण विण्णादं ईरिसं विणोदवत्थुअं अज्जउत्तेण उवलद्धंति । अण्णहा मन्दभाइणीए एव्वं ण करीअदि ।

[1]मया न विज्ञातमीदृशं विनोदवस्तुकमार्यपुत्रेणोपलब्धमिति । अन्यथा [2]मन्दभागिन्या एवं न क्रियते ।

विदूषकः— मा दाव तत्तहोदी तत्तहोदो दक्खिण्णस्स उवरोहं भणदु । समावत्तिदिट्ठेण देवीए परिअणेण सङ्कहा वि जइ अवराहो ठाविअदि । एत्थ तुमं एव्व पमाणं ।

मा तावत्तत्रभवती तत्रभवतो दाक्षिण्यस्योपरोधं भणतु । समापत्तिदृष्टेन देव्याः परिजनेन सङ्कथापि यद्यपराधः स्थाप्यते । अत्र त्वमेव प्रमाणम् ।

इरावती— णं सङ्कहा णाम होदु । किं ति अत्ताणं आआसइस्सं ।

ननु संकथा नाम भवतु । किमित्यात्मानमायासयिष्ये ।

(इति प्रस्थिता ।)

राजा— (अनुसरन् ।) प्रसीदतु भवती ।

(इरावती रशनासन्दितचरणा व्रजत्येव ।)

राजा— सुन्दरि! न शोभते प्रणयिजने निरपेक्षता ।

इरावती— सठ अविस्ससणीअहिअओ सि ।

शठ! अविश्वसनीयहृदयोऽसि ।

समापत्तिदृष्टेन यदृच्छादृष्टेन । रसनासदित मेखलाबद्धम् ।

* विश्वसनीयोऽसीत्यत्र विपरीतलक्षणानुसन्धेया ।

1. विश्वसनीयोऽसि । मया नाम न . 2. दुःखकरमेव.

राजा—

शठ इति मयि तावदस्तु ते
परिचयवत्यवधीरणा प्रिये ।
चरणपतितया न चण्डि तां
विसृजसि मेखलयापि याचिता ॥ २० ॥

इरावती— इअं वि हदासा तुमं एव्व अणुसरदि ।
इयमपि हताशा त्वामेवानुसरति ।
(इति रशनामादाय राजान ताडयितुमिच्छति ।)

राजा— वयस्य! एषा हि ।

बाष्पासारा हेमकाञ्चीगुणेन
श्रोणीबिम्बादव्यपेक्षाच्युतेन ।

शठ इति । हे प्रिये । मयि । शठ इति गूढविप्रियकृत् इति ते अवधीरणा अस्तु । परिचयवति तावदशेषमस्तु । तावदस्त्वल्पशेषवाचि वा । अवधीरणा परिचयवति तावदस्तु । हे चण्डि अत्यन्तकोपने । चरणपतितया पादावलम्बन कृत्वा नमस्कृत्य याचितया । मेखलया रशनया । याचिता प्रार्थितापि । ता अवधीरणाम् । न विसृजसि ॥ २० ॥

बाष्पेति । बष्पासारा अश्रुवर्षा । श्रोणीबिम्बात् नितम्बबिम्बात् । अव्यपेक्षाच्युतेन कोपप्रस्थानव्यागलितेन । हेमकाञ्चीगुणेन । चण्डी अत्यन्तकोपना । चण्ड माम् । हन्तु अभ्युद्यता प्रहर्तुमुद्यता । कथमिव, मेघराजी मेघमाला । विद्युद्दाम्ना सौदामिनीगुणेन । विन्ध्यपर्वतमिव ॥ २१ ॥

शठ इति । हे प्रिये परिचयवति परिचयः प्रशस्तः यस्य सः परिचयवान् तस्मिन् । अतिशायने मतुप् । मयि । शठ इति गूढविप्रियकर इति । अवधीरणा तिरस्कारः अस्तु । यतः अतिपरिचयादवज्ञेति वदन्ति तस्मादियमवधीरणा युक्तेति भाव । हे चण्डि अत्यन्तकोपने । चरणपतितया मेखलया याचिता प्रार्थितापि तां अवधीरणां न विसृजसि किमिद युक्तमिति शेषः ॥२०॥

चण्डी चण्डं हन्तुमभ्युद्यता मां
विद्युद्दाम्ना मेघराजीव विन्ध्यम् ॥ २१ ॥

इरावती— किं मं भूओ वि अवरद्धं करेसि ।
किं मां भूयोऽप्यपराद्धां करोषि ।

(इति रशनां हस्तेनावलम्बते ।)

राजा—

अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।
वर्धयसि विलसितं त्वं दासजनायात्र कुप्यसि च ॥ २२ ॥

(आत्मगतम् ।) नूनमिदानीमनुज्ञातम् । (इति पादयो. पतति ।)

इरावती— ण खु इमे मालविआए चलणा जे दे परिसदोहअं पूरइस्संदि ।
न स्वल्विमौ मालविकायाश्चरणौ यौ ते स्पर्शदोहदं पूरयिष्यतः ।

(इति सचेटी निष्क्रान्ता ।)

विदूषकः— उट्ठहि । किदप्पसादो सि ।
उत्तिष्ठ । कृतप्रसादोऽसि ।

राजा— (उत्थाय इरावतीमपश्यन् ।) कथं गतैव प्रिया ।

अपराधिनीति । हे कुटिलकेशि अरालकेशि । अपराधिनि कृतापराधे । मयि । उद्यतं उद्योगितम् । दण्ड आज्ञाम् । कथ सहरसि । किमर्थं निवर्तयसि । विलसितं विलासम् । वर्धयसि । त्वं दासजनाय किङ्करजनाय । कुप्यसि च कुद्धासि च ॥ २२ ॥

* नून इत्यादि । इद तत् रशनासहरणम अनुज्ञातम् अनुमतम् मत्प्रार्थनयेति शेषः ।

विदूषकः— वयस्स दिट्ठिआ इमस्स अविणअस्स ओसारिदा दाव जन्तणा देवेहिं जाव सिग्घं अवक्कमाम । जाव अङ्गारओ विअ रासिं सा अणुवक्कं ण करेदि ।

वयस्य! [1]दिष्ट्यास्याविनयस्यापसारिता तावद्यन्त्रणा देवैः यावच्छीघ्रमपक्रमावः । यावदङ्गारक इव राशिं सा अनुवक्रं न करोति ।

राजा— अहो मनसिजवैषम्यम् ।

मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनं सेवाम् ।
एवं प्रणयवती सा मयि शक्यमुपेक्षितुं कुपिता ॥ २३ ॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति तृतीयोऽङ्कः ॥

अपक्रमामः प्रयामः ।

मन्ये इति । प्रियाहृतमना. मालविकासक्तचेताः । अहम् । तस्या इरावत्याः प्रणिपातलङ्घन नमस्कारातिक्रमम् । सेवा मन्ये । सा च प्रणयवती । तथापि, एव मति कुपिता सा प्रणयवती मयि । तस्मादुपेक्षितु शक्यम् । कुपितेति कृत्वा तत्परिहारो न कर्तव्यः । किंतु कथमुपेक्षे कुपितामिरावतीम् । अहो मनसिजवैषम्यमिति भावः ॥ २३ ॥

* अनुवक्रं प्रतीपम् ।

* **मन्य इति** । प्रियाहृतमनाः मालविकाहृतमनाः । प्रणिपातलङ्घन प्रणामातिक्रमम् । तस्या. इरावत्याः । सेवा अनुकूलाचरणम् । मन्ये । सेवायाः फल आह । कुपिता क्रुद्धा । प्रणयवती प्रेमवती । एव अनेन प्रकारेण प्रणिपातलङ्घनरूपेण । उपेक्षितु औदासीन्येन वर्तितुम् । शक्य हि शक्या खलु । शक्यमिति निपातः । अत्र बीजानुसन्धानात् आक्षेपो नाम सन्ध्यङ्गमुक्तं भवति । इदमनुसन्धानमेव उत्तराङ्ककथोपयुक्तत्वात् बिन्दुरित्यनुसन्धेयम् ॥ २३ ॥

---

1. दिष्ट्यानेनाविनयेन अप्रसन्ना गतेषा । तावदावां शीघ्रमेवापसरावः ।

चतुर्थोऽङ्कः ॥

(ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च ।)

राजा— (आत्मगतम् ।)

तामाश्रित्य श्रुतिपथगतामास्थया [1]लब्धमूलः
संप्राप्तायां नयनविषयं रूढरागप्रवालः ।
[2]हस्तस्पर्शैर्मुकुलित इव व्यक्तरोमोद्गमत्वात्[3]
कुर्यात्क्रान्तं मनसिजतरुर्मां रसज्ञं फलस्य ॥ १ ॥ ४

(प्रकाशम् ।) सखे गौतम!

प्रतीहारी— जेदु भट्टा । असण्णिहिदो गोदमो ।
जयतु भर्ता । असंनिहितो गौतमः ।

तामिति । तां मालविकाम् । श्रुतिपथगतां कर्णमार्गप्रविष्टाम् । आश्रित्य ज्ञात्वा । आस्थया वाञ्छया । लब्धमूल प्राप्ताङ्घ्रिः रूढमूलः । नयनविषय नयनगोचर दृष्टिपथम् । संप्राप्तायां समागतायां सत्याम् । रूढरागप्रवाल. उद्भूताभिलाषपल्लवः । हस्तस्पर्शैः देहससर्गैः । व्यक्तरोमोद्गतत्वात् दृष्टरोमाञ्चत्वात् । मुकुलित इव व्यक्तपुष्पोद्गम इव । एवभूतः, मनसिजतरुः कन्दर्पवृक्षः । क्रान्त विरहव्यथितम् । माम् । फलस्य बीजस्य वा प्रयोजनस्य । रसज्ञ अधरामृतरसज्ञम् । कुर्यात् किम् ।

कविरिदानीमङ्कान्तरमारभते ततः प्रविशतीत्यादिना ।

* **तामिति** । मुकुलित इव सजातमुकुल इव । क्रान्त कामनायुक्तम् । कुर्यात् इति प्रार्थनायां लः । अत्र प्रसञ्जित बीजं प्रकरणस्थाने कृतमिति मन्तव्यम् ।

1. बद्धमूलः. 2 हस्तस्पर्शै. 3 व्यक्तरोमोद्गतत्वात्

राजा— (आत्मगतम् ।) आः ! मालविकावृत्तान्तज्ञानाय प्रेषितः ।

(प्रविश्य ।)

विदूषकः— जेदु भवं । जयतु भवान ।

राजा— जयसेने ! जानीहि तावत् क देवी धारिणी कथं वा सरुजचरणत्वाद्विनोद्यत इति ।

प्रतीहारी— जं देवो आणवेदि । यदेव आज्ञापयति ।

(इति निष्क्रान्ता ।)

राजा— गौतम ! को वृत्तान्तस्तत्रभवत्यास्ते सख्याः ।

विदूषकः— जो बिडालगहिदाए परहुदिआए ।

यो बिडालगृहीतायाः परभृतिकायाः ।

राजा— (सविषादम् ।) कथमिव ।

विदूषकः— सा खु तवस्सिणी ताए पिङ्गलच्छीए सारभण्ड भूमिगेहे मिच्चुमुहे विअ णिक्खिता ।

सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डभूमि-[1]गृहे मृत्युमुख इव निक्षिप्ता ।

राजा— ननु मत्संपर्कमुपलभ्य ।

विदूषकः— अह इं । अथ किम् ।

राजा— गौतम ! क एवं विमुखोऽस्माकं येन चण्डीकृता देवी ।

यः वृत्तान्तः अवाच्यः । बिडालगृहीतायाः मार्जारालम्बितायाः । पिङ्गलाक्ष्या मोहितनेत्रया, कोपात्पिङ्गलत्वम् । सारभाण्डमिव प्रधानमूलधनमिव । उपलभ्य श्रुत्वा । विमुखः दुर्जनः ।

1. गुहायामिव.

विदूषकः— सुणादु भवं । परिव्वाजिआ मे कहेदि । हिओ किल तत्तहोदि इरावदी रुजाविहत्थचलणं देविं सुहपुच्छिआ आअदा ।

शृणोतु भवान । [1]परिव्राजिका मे कथयति । ह्यः किल तत्रभवती इरावती रुजाविहस्तचरणां[2] देवीं सुखपृच्छिका आगता ।

राजा— ततस्ततः ।

विदूषकः— तदो देवीए सा पुच्छिदा । किं उण लक्खिदो वल्लहजणोत्ति । तदो ताए उत्तं कुदो वा दे उवआरो । जं दे परिअणस्स वल्लहत्तणं जाणन्तीव पुच्छसित्ति ।

ततो देव्या सा पृष्टा । किं [3]पुनर्लक्षितो वल्लभजन इति । [4]ततस्तयोक्तं कुतो वा ते उपचारः । [5]यत्तव परिजनस्य वल्लभत्वं जानत्यपि पृच्छसीति ।

राजा— निर्भेदादतेऽपि मालविकायामयमुपन्यासः शङ्कयति । ततस्ततः ।

विदूषकः— तदो ताए अणुबन्धिज्जमाणाए भवदो अविणअं अन्देरेण परिगहिदत्था किदा देवी ।

पूर्वेद्युः । निर्भेदः अन्तर्भेदः ।

* ह्यः किल पूर्वेद्युः किल । निर्भेदादतेऽपि प्रतर्ककारणं विनापि ।

---

1. प्रारिव्राजिकया मे कथितम्. 2. रुजाक्रान्तचरणां. 3. नु नावलोकितो. 4. ततस्तया व्याख्यातं मदो वा उपचारो वा 5. यत्परिजनसक्रान्त वल्लभत्वं न जानातीति; यत्ते परिजनस्य वल्लभत्वमजानन्ती पृच्छसीति ।

ततस्तयानुबध्यमानया भवतोऽविनयमन्तरेण [1]परिगृहीतार्था कृता देवी ।

राजा— अहो दीर्घरोषता तत्रभवत्याः । अतः परं कथय ।

विदूषकः— किं अदोवरं । मालविआ वउलावलिआ अ णिअलवदीओ अदिट्ठसुज्जपादं पादालवासं णाअकण्णआओ विअ अणुहोन्ति ।

किमतःपरम् । मालविका वकुलावलिका च निगलवत्यावदृष्टसूर्यपादं पातालवासं नागकन्यके इवानुभवतः ।

राजा— कष्टं कष्टम् ।

[2]मधुररवा परभृतिका भ्रमरी च विबुद्धचूतसङ्गिन्यौ ।
कोटरमकालवृष्ट्या प्रबलपुरोवातया गमिते ॥ २ ॥

वयस्य ! अप्यत्र कस्यचिदुपक्रमस्य गतिः स्यात् ।

विदूषकः— कहं भविस्सदि । जं सारभण्डे वावुदा माहविआ देवीए सन्दिट्ठा । मह अङ्गुलीअअमुद्दं अदक्खिअ ण मोत्तव्वा तुए इअं हदासा मालविआ वउलावलिआ अत्ति ।

अन्तरेण उद्दिश्य ।

* भवतः अविनय अन्तरेण परिगृहीतार्था कृता राज्ञाविनयं इरावत्याः सकाशात् ज्ञातवतीत्यर्थः ।

मधुरेति । मधुरस्वना । परभृता कोकिलवधूः । भ्रमरी च षट्पदा च । विबुद्धचूतसङ्गिन्यौ प्रफुल्लसहकारकुसुमसङ्गते । प्रबलपुरोवतया प्रबलाभिमुखप्रतिकूलानिलया । अकालवृष्ट्या अकालासारेण । कोटरं निष्कुहम् । गमिते प्रापिते ॥ २ ॥

उपक्रमः प्रतीकारः । गतिः अवकाशः ।

1. परिगतार्था. 2. मधुरस्वना परभृता.

कथं भविष्यति । [1]यत्सारभाण्डे व्यापृता माधविका देव्या संदिष्टा । ममाङ्गुलीयकमुद्रामदृष्ट्वा न मोक्तव्या त्वयेयं हताशा मालविका बकुलावलिका चेति ।

राजा— (निश्चित्य सपरामर्शम् ।) सखे, किमत्र कर्तव्यम् ।

विदूषकः— (विचिन्त्य ।) अत्थि एत्थ उवाओ ।

[2]अस्त्यत्रोपायः ।

राजा— क इव ।

विदूषकः— (सदाक्षिप्तम् ।) को वि अदिट्ठो सुणादि । कण्णे दे कहेमि । (उपश्लिष्य कर्णे ।) एव्वं विअ ।

कोऽप्यदृष्टः शृणोति । कर्णे ते कथयामि । एवमिव ।

राजा— साधु प्रयुज्यतां सिद्धये ।

(प्रविश्य ।)

प्रतीहारी— देव पवादसअणे देवी णिसण्णा रत्त-चन्दण-धारिणा परिअण- हत्थ-गदेण चलणेण भअवदीए कहाहिं विणोदिअमाणा चिट्ठइ ।

देव! प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा

सारभाण्डव्यापृता सारभाण्डाधिकारिणी । माधविका माधविकेति तस्या नाम । सन्दिष्टा आज्ञापिता । परामर्शः विचारः ।

* कर्णे कथयामि । अत्र राज्ञः कर्णे विदूषकोक्त उपायः नियमेन मालविकाप्राप्तिहेतुत्वान्नियताप्तिर्नाम चतुर्थ्यवस्थासूचिता । अत्र पूर्वं प्रकरीस्थानोक्तबीजस्य नियताप्त्या समन्वयादवमर्शो नाम चतुर्थसधिः प्रतिपादित इति मन्तव्यम् ।

1. यत्सारभाण्डगृहे. 2. अथवा अस्त्यत्रोपायः.

परिजनहस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठति ।

राजा— अस्मत्प्रवेशयोग्योऽयमवसरः ।

विदूषकः— ता गच्छदुभवं । अहं वि देविं पेक्खिदुं अरित्त-पाणी भविस्सं ।

तस्मात्, गच्छतु भवान । अहमपि देवीं द्रष्टुमरिक्तपाणिर्भविष्यामि ।

राजा— जयसेनायास्तावत्संवेद्य गच्छ ।

विदूषकः— तह । (कर्णे ।) भोदि एव्वं विअ ।

तथा । भवति एवमिव ।

(इति निष्क्रान्तः ।)

राजा— जयसेने! तेन हि प्रवातशयनमार्गमादेशय ।

प्रतीहारी— इदो इदो देवो । इत इतो देवः ।

(ततः प्रविशति शयनस्था देवी परिव्राजिका त्वेभवतश्च परिवारः ।)

देवी— भअवदि अदिरमणीअं कहावत्थु । तदो तदो ।

भगवति! अतिरमणीयं कथावस्तु । ततस्ततः ।

परिव्राजिका— (सदृष्टिक्षेपम् ।) अतः परं पुनः कथयिष्यामि । तत्र भवानीश्वरः संप्राप्तः ।

देवी— अज्जो, भट्टा । अहो, भर्ता । (अभ्युत्थातुमिच्छति ।)

राजा— अलमलमुपचारयन्त्रणया ।

अत्र चरणेनेति उपलक्षणं तृतीया ।

अनुचितनूपुरविरहं नार्हसि तपनीयपीठिकालम्बम् ।
चरणं रुजापरीतं कलभाषिणि मां च पीडयितुम् ॥ ३ ॥

देवी— जेदु अज्जउत्तो । जयत्वार्यपुत्रः ।

परिव्राजिका— विजयतां देवः ।

राजा— (परिव्राजिकां प्रणम्योपविश्य ।) देवि! अपि सह्या ते वेदना ।

देवी— अत्थि मे विसेसो । [1]अस्ति मे विशेषः ।

(ततः प्रविशति यज्ञोपवीतबद्धाङ्गुष्ठः सम्भ्रान्तो विदूषकः ।)

विदूषकः— परित्ताअदु परित्ताअदु । सप्पेण मिच्चुणा दट्ठोम्हि ।
परित्रायतां परित्रायतां । सर्पेण मृत्युना दष्टोऽस्मि ।

(सर्वे विषण्णाः ।)

राजा— कष्टं कष्टम् । क भवान् परिभ्रान्तः ।

विदूषकः— देविं पेक्खिस्सं ति आआरपुप्फग्गहणकालणादो पमदवणं गदोम्हि ।
देवीं द्रक्ष्यामीत्याचारपुष्पग्रहणकारणात्प्रमदवनं गतोऽस्मि ।

देवी— हद्धि हद्धि । णं अहं एव्व बम्हणस्स जीविअसंसअणिमित्तं जादा ।

अनुचितेति । अनुचितनूपुरविरहं मञ्जीरविश्लेषितस्यानुचितमयोग्यम् । तपनीयपीठिकालम्ब स्वर्णमयपादपीठे अवलम्बितम् । रुजा वेदनया । परिचितं सक्तम् । चरणं च मां च । पीडयितुम् । हे कलभाषिणि । नार्हसि न प्राप्नोसि ।

* ततः प्रविशतीत्यादि । यज्ञोपवीतेन बद्धः अङ्गुष्ठः येन सः तथोक्तः । अत्र कपटकल्पनया गम्यमानत्वाच्छलनं नाम सन्ध्यङ्गमुक्तं भवति ।

1. अद्यास्ति ; इदानीमस्ति.

हा धिक् हा धिक्। नन्वहमेव ब्राह्मणस्य जीवितसंशय-निमित्तं जाता।

विदूषकः— तहिं असोअत्थवअस्स कालणादो पसारिदे मे हत्थे कोडर-णिग्गदेण सप्परूवेण कालेण दंसिदोम्हि। णं एदाइ दुवे दन्त पदाइ।

तत्राशोकस्तबककारणात्प्रसारिते मे हस्ते कोटरनिर्गतेन सर्परूपिणा कालेन दष्टोऽस्मि। नन्वेते द्वे दन्तपदे।

(इति दर्शयति।)

परिव्राजिका— तेन हि दंशच्छेदः पूर्वकर्मेति श्रूयते। स तावदस्य क्रियताम्।

छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम्।
एतानि दष्टमात्राणामायुषः[1] प्रतिपत्तयः॥ ४॥

राजा— संप्रति विषवैद्यानां कर्म। जयसेने! [2]क्षिप्रमाहूयतां ध्रुवसिद्धिः।

प्रतीहारी— जं देवो आणवेदि।

दंशच्छेदः दष्टमात्रछेदः।

छेद इति। च्छेदः उक्तः। दाहः। क्षतेः सर्पक्षतेः। रक्तमोक्षणं दुष्ट-रक्तहरणम्। 'शोफे व्रणे च कठिने विवर्णे वेदनान्विते। विषयुक्ते विशेषेण जलूकाद्यैर्हरेदसृक्। दुष्टरक्तापगमात्सद्यो रोगरुजा शमः। एतानि छेददाहरक्त-मोक्षणानि। दष्टमात्राणां दष्टक्षणमात्र एव। आयुष्याः आयुष्कराः। प्रति-पत्तयः प्रतिक्रियाः। 'प्रतिपत्तिस्तु कर्तव्ये तद्बुद्धौ गौरवेऽपि च'॥ ४॥

ध्रुवसिद्धिर्नाम विषवैद्यस्य नाम।

* ध्रुवसिद्धिरिति तस्य वैद्यस्य नाम।

1. आयुष्याः. 2. क्षिप्रमानीयताम्।

यदेव आज्ञापयति ।

(इति निष्क्रान्ता ।)

विदूषकः— अम्भो, पावेण मिच्चुणा गहीदोम्हि ।

अहो, पापेन मृत्युना गृहीतोऽस्मि ।

राजा— मा कातरो भूः । अविषोऽपि कदाचिद्दंशो भवेत् ।

विदूषकः— कहं ण भाइस्सं । सिमसिमायन्ति मे अङ्गाइं ।

कथं न भेष्यामि । सिम्मसिमायन्ति मे अङ्गानि ।[1]

(इति विषवेगं रूपयति ।)

देवी—ही ही असुहं दंसिदं विआरेण । हला ओलम्बह णम् ।

[1]ही ही अशुभं दर्शितं विकारेण । हलावलम्बध्वमेनम् ।

(परिजनः ससम्भ्रममवलम्बते ।)

विदूषकः— (राजानवमवलोक्य ।) भो भवदो बालवयस्सोम्हि । ता अविआरेण वुड्ढाए मे जणणीए जोअक्खेमं वहेहि ।

भो, भवतो बालवयस्योऽस्मि । तदविचारेण वृद्धाया मे जनन्या योगक्षेमं वह ।

राजा— मा भैषीः । अचिरात्त्वां विषवैद्यश्चिकित्सते । स्थिरो भव ।

सिमिसिमायन्तीति वेदानानुकारः । पीरुहहीति विषादे योगक्षेमं जीवनोपायादि । 'त्रिदशनगरयोगक्षेमकृत्ये' इति प्रयोगः ।

[1] सिसिमायन्ति । अनेन संताप सूच्यते । विषवेगं विषव्याप्तिं रूपयति । विषवेगस्तु वसन्तराजीये 'वैवर्ण्यं वेपथुर्दाहः फेनः स्कन्दस्य भञ्जनम् । हिक्का जृम्भं मृतिश्चेति विषवेगाः स्युरष्टधा' इति ॥

1. हा कष्टम् । दंशितमशुभं विषारेण । अवलम्बस्वैनम् । 2. भोः बाल्यात्प्रभृति प्रियवयस्योऽस्मि । तद्विचार्य अपुत्राया मे जनन्या योगक्षेमं वह ।

(प्रविश्य ।)

जयसेना— देव धुवसिद्धी विण्णवेदि । इह एव्व आणीअदु गोदमो त्ति ।

देव! ध्रुवसिद्धिर्विज्ञापयति । इहैवानीयतां गौतम इति ।

राजा— तेन हि वर्षवरपरिगृहीतमेनं तत्रभवत. सकाशं प्रापय ।

जयसेना— तह । तथा ।

विदूषकः— (देवीं विलोक्य ।) भोदि जीवेअं वा ण वा जं मए अत्तभवन्दं सेवन्तेण दे अवरद्धं तं मरिसेहि ।

भवति! जीवेयं वा न वा । यन्मया तत्रभवन्तं सेवमानेन तेऽपराद्धं तन्मर्षय ।

देवी— दीहाऊ होहि । दीर्घायुर्भव ।

(निष्क्रान्तो विदूषकः प्रतीहारी च ।)

राजा— प्रकृतिभीरुस्तपस्वी । ध्रुवसिद्धेरपि यथार्थनाम्नः सिद्धिं मन्ये ।

(प्रविश्य ।)

जयसेना— जेदु भट्टा । धुवसिद्धी विण्णवेदि । उअकुम्भ विहाणेन सप्पमुद्दिअं किं वि कप्पइदव्वं । ता अण्णेसीअदुत्ति ।

जयतु भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भविधानेन सर्पमुद्रितं किमपि कल्पयितव्यम् । तदन्विष्यतामिति ।

वर्षवरः षण्डः । 'षण्डो वर्षवरस्तुल्यः' । यथार्थनाम्नः ध्रुवसिद्धिरिति यथार्थनाम्नः । सिद्धिं विषहरणकार्यसिद्धिम् । उदकुम्भविधाने जलपूर्णकुम्भच्छादने ।

देवी— इदं सप्पमुद्दिअं अंगुलीअअं । पच्चा मह एव्व हत्थे देहि णं ।

इदं सर्पमुद्रितमङ्गुलीयकम् । पश्चान्ममैव हस्ते देह्येतत् ।

(इति प्रयच्छति । जयसेना नाट्येन गृह्णाति ।)

राजा— जयसेने ! कर्मसिद्धावाशु प्रतिपत्तिमानय ।

जयसेना— जं देवो आणवेदि । यदेव आज्ञापयति ।

(इति निष्क्रान्ता ।)

परिव्राजिका— देव यथा मे हृदयमाचष्टे, तथा निर्विषो गौतमः ।

राजा— भूयादेवम् ।

(प्रविश्य)

जयसेना— देव णिउत्तविसवेओ अज्जगोदमो मुहुत्तेण पइदित्थो संवुत्तो ।

देव ! निवृत्तविषवेग आर्यगौतमो मुहूर्तेन प्रकृतिस्थः संवृत्तः ।

देवी— दिट्ठिआ वअणीआदो मुत्तम्हि ।

दिष्ट्या वचनीयान्मुक्तास्मि ।

जयसेना— एसो उण अमच्चो वाहदओ विण्णवेदि । राअकज्जं बहु मन्तिदव्वं । ता दंसणेण अणुग्गहीदुं इच्छामित्ति ।

एष पुनरमात्यो वाहतको विज्ञापयति । राजकार्यं बहु मन्त्रयितव्यम् । तद्दर्शनेनानुग्रहीतुमिच्छामीति ।

देवी— गच्छदु अज्जउत्तो कज्जसिद्धीए ।

गच्छत्वार्यपुत्रः कार्यसिद्धये ।

राजा— (उत्थाय।) देवि, आतपाक्रान्तोऽयमुद्देशः। शीतक्रिया चास्य प्रशस्ता। तदन्यत्र नीयतां शयनीयम्।

देवी— बालिआओ अज्जउत्तवअणं अणुचिट्ठह।
बालिकाः! आर्यपुत्रवचनमनुतिष्ठत।

परिजनः— तह। तथा। (इति निष्क्रान्ता देवी परिव्राजिका परिजनश्च।)

राजा— जयसेने, गूढपथेन मां प्रमदवनं प्रापय।

जयसेना— इदो इदो देवो। इत इतो देवः।

राजा— (परिक्रम्य।) जयसेने! ननु समाप्तकृत्यो गौतमः।

जयसेना— अह इं। अथ किम।

राजा—

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाधुमपि [1]मत्वा।
संदिग्धमेव सिद्धौ कातरमाशङ्कते चेतः॥ ५॥

(प्रविश्य विदूषकः।)

विदूषकः— जेदु भवं। सिद्धाइ मे सव्वमङ्गलकम्माइ।
जयतु भवान्। सिद्धानि मे सर्वमङ्गलकर्माणि।

राजा— जयसेने! त्वमपि नियोगमशून्यं कुरु।

जयसेना— जं देवो आणवेदि। यद्देव अज्ञापयति।

[इति निष्क्रान्ता।

इष्टाधिगमेति। इष्टाधिगमनिमित्तं वाञ्छितवस्तुप्राप्तिकारणम्। प्रयोगं कार्यविचारादिप्रयोगं कर्म अथवा औषधादिप्रयोगम्। एकान्तसाधुं स्वभावहृद्यम्। मत्वापि बुद्धापि। सिद्धौ कार्यसिद्धौ। कातरं जडम्। चेतः मनः। संदिग्धमेव सन्देहमेव। आशङ्कते॥ ५॥

1. लब्ध्वा.

राजा— वयस्य क्षुद्रा माधविका । न खलु किंचिद्विचारितमनया ।

विदूषकः— देवीए अंगुलीअअमुद्दिअं पेक्खिअ कहं विआरेदि ।
देव्या अङ्गुलीयकमुद्रिकां दृष्ट्वा कथं विचारयति ।

राजा— न खलु मुद्रामधिकृत्य ब्रवीमि । तयोर्बद्धयोः किंनिमित्तोऽयं मोक्षः । किं वा देव्याः परिजनमतिक्रम्य भवान्संदिष्टः । इत्येवमनया प्रष्टव्यम् ।

विदूषकः— णं पुच्छिदोह्मि । पच्चुप्पण्णबुद्धिणा मए कहिदम ।
ननु पृष्टोऽस्मि । [1]प्रत्युत्पन्नबुद्धिना मया कथितम् ।

राजा— कथ्यताम् ।

विदूषकः— भणिदं मए । देव्व चिन्तएहिं विण्णाविदो राआ । सोवसग्गं वो णक्खत्तं । सव्वबन्धमोक्खो करीअदुत्ति । तं सुणिअ देवीए इरावदीए चित्तं रक्खन्दीए राआ किल मोएदित्ति तुमं एव्व णं मोएहित्ति अहं सन्दिट्ठोह्मित्ति । तदो जुज्जदित्ति ताए सम्पादिदो अत्थो ।

भणितं मया—"दैवचिन्तकैर्विज्ञापितो राजा । सोपसर्गं वो नक्षत्रम् । सर्वबन्धमोक्षः क्रियतामिति । तच्छ्रुत्वा देव्या इरावत्याश्चित्तं रक्षन्त्या राजा किल [2]मोचयतीति त्वमेवैनां मोचयेत्यहं संदिष्टोऽस्मि" इति । ततो युज्यत इति [3]तया संपादितोऽर्थः ।

क्षुद्रा वञ्चिका । दैवचिन्तकैः ज्योतिषज्ञ. । सोपसर्गं सोपद्रवम् । तया माधविकया ।

1. मया पुनर्मन्देनापि प्रत्युत्पन्न... 2. मोचयतीत्यहं संदिष्टोऽस्मि. 3. तयाप्येवं.

राजा— (विदूषक परिष्वज्य ।) सखे! प्रियोऽहं तव ।

न हि बुद्धिगुणेनैव सुहृदामर्थदर्शनम् ।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते ॥ ६ ॥

विदूषकः— तुवरदु भवं । समुद्दघरए पिअसहीसहिअं मालविअ ठाविअ भवन्दं पच्चुग्गदोम्हि ।

त्वरतां भवान् । समुद्रगृहके प्रियसखीसहितां मालविकां स्थापयित्वा भवन्तं प्रत्युद्गतोऽस्मि ।

राजा— अहमेनां सम्भावयामि । गच्छाग्रतः ।

विदूषकः— एदु भवं । (परिक्रम्य ।) एदं समुद्दघरअं ।

एतु भवान । इदं समुद्रगृहम् ।

राजा— (साशङ्कम् ।) वयस्य, एषा कुसुमापचयव्यग्रहस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका समागच्छति । इतस्तावदावां भित्तिगूढौ भवावः ।

विदूषकः— अम्हो कुम्भीलएहिं कामुएहिं वि परिहरणिज्जा खु चन्दिआ ।

अहो कुम्भीलकैः कामुकैरपि परिहरणीया खलु चन्द्रिका ।

नहीति । सुहृदां इष्टानाम् । अर्थदर्शनम् । बुद्धिगुणेन बुद्धिविचारेण । सूक्ष्मः गूढः अल्पो वा । कार्यसिद्धिपथः कार्यसिद्धिमार्गोऽपि । स्नेहेन प्रेम्णा । उपलभ्यते ॥ ६ ॥

समुद्रगृहे मुद्रायुक्ते गृहे सलाञ्छने गृहे, मुद्रितगृहद्वार इत्यर्थः । कुम्भीलकैः तस्करैः । कामुकैः कामिभिः । चन्द्रिका ज्योत्स्ना ।

(उभौ यथोक्तं कुरुतः ।)

राजा— गौतम! कथं नु ते सखी मां प्रतिपालयति । एह्येनां गवाक्षमाश्रित्यावलोकयावः ।

विदूषकः— तह । तथा । [इति विलोकयन्तौ स्थितौ ।

(ततः प्रविशति मालविका वकुलावलिका च ।)

वकुलावलिका— हला पणम भट्टारं ।
हला, प्रणम भर्तारम् ।

राजा— मन्ये प्रतिकृतिं मे दर्शयतीति ।

मालविका— (सहर्षं) णमो दे (द्वारमवलोक्य सविषादम् ।) कहिं भट्टा । हला विप्पलम्भेसि मं ।
नमस्ते । कुत्र भर्ता । हला विप्रलभसे माम् ।

राजा— सखे! हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि ।

सूर्योदये भवति या [1]सूर्यास्तमये च पुण्डरीकस्य ।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे[2] ॥ ७ ॥

वकुलावलिका— णं एसो चित्तगदो भट्टा ।
नन्वेष चित्रगतो भर्ता ।

उभे— (प्रणिपत्य ।) जेदु भट्टा । जयतु भर्ता ।

सूर्येति । पुण्डरीकस्य सरोजस्य । सूर्योदये । या समस्था शोभा । सूर्यास्तमये आदित्यास्तमये च । या समवस्था विशोभादशा । भवति । सुवदनायाः मालविकायाः । वदनेन मुखेन । ते समवस्थे सशोभाविशोभादशे । क्षणात् सद्य एव । ऊढे प्राप्ते । 'वह प्रापणे' वदन हर्षशोकावहमिति भावः ।

---

1. सूर्यास्तमयेऽपि. 2. क्षणादुपारूढे.

मालविका— हला तदा अहं सम्मुहट्ठिदा भट्टिणो रूवस्स तह ण वितिण्णम्हि जह अज्ज मए विभाविदो चित्तगदो भट्टा ।

[1]हला तदाहं संमुखस्थिता भर्तू रूपस्य तथा न वितृष्णास्मि, यथाद्य मया विभावितश्चित्रगतो भर्ता ।

विदूषकः— सुदं भवदा । अत्तहोदीए जह दिट्ठो चित्ते ण तह दिट्ठो भवंति मंतिदं । मुहा दाणिं मञ्जूसिआ विअ रअणभण्डं जोव्वणगव्वं वहेसि ।

श्रुतं भवता । अत्रभवत्या यथा दृष्टश्चित्रे न तथा दृष्टो भवानिति मन्त्रितम् । मुधेदानीं मञ्जूषेव रत्नभाण्डं यौवनगर्वं वहसि ।

राजा— सखे, कुतूहलवानपि निसर्गशालीनः स्त्रीजनः । पश्य—

कात्स्न्र्येन निर्वर्णयितुं च रूप-
मिच्छन्ति तत्पूर्वसमागतानाम् ।
न च प्रियेष्वायतलोचनानां
[2]समग्रपातीनि विलोचनानि ॥ ८ ॥

शालीनः जडः ।

कात्स्न्र्येति । आयतलोचनानां आयतदृशाम् । प्रियाणां रूपम् । कात्स्न्र्येन साकल्येन । निर्वर्णयितु आलोकयितुम् । इच्छन्ति । तथापि प्रियैः सह तत्पूर्वसमागताना तत्प्रथमसमागतानाम् । आयतलोचनाना स्त्रीणाम् । विलोचनानि । प्रियेषु नायकेषु । समग्रपातिनी न भवन्ति, नास्त्विच्छाभावादसमग्रदर्शन किन्तु नवसङ्गमसंभृतया लज्जयेति भावः ॥ ८ ॥

1. सखि तदा ससंभ्रममुत्कण्ठिता; सखि ससंभ्रमदृष्टे भर्तृ रूपे यथा सतृष्णास्मि, तथा अद्यापि मया न विभावितो वितृष्णदर्शनो भर्ता. 2 समग्रवृत्तीनि.

मालविका— हला का एसा ईसिपरिवत्तिदवअणा भट्टिणा सिणिद्धाए दिट्ठीए णिज्झाईअदि ।

हला, कैषा ईषत्परिवर्तितवदना भर्त्रा स्निग्धया दृष्ट्या निध्यायते ।

वकुलावलिका— णं इअं भट्टिणो पासगदा इरावदी ।

नन्वियं भर्तुः पार्श्वगतेरावती ।

मालविका— हला भट्टा अदक्खिणो विअ पडिभाइ । जो सव्वं देवीजणं उज्झिअ एक्काए मुहे बद्धलक्खो ।

हला भर्ता अदक्षिण इव प्रतिभाति । यः सर्वं देवीजनमुज्झित्वा एकस्या मुखे बद्धलक्ष्यः ।

बकुलावलिका— (आत्मगतम् ।) चित्तगतं भट्टारं परमत्थं गेह्णिअ असूअदि इअं । होदु कीलिस्सं दाव एदाए । (प्रकाशम् ।) हला भट्टिणो वल्लहा एसा ।

चित्रगतं भर्तारं परमार्थं गृहीत्वाऽसूयतीयम । भवतु क्रीडिष्यामि तावदेतया । हला भर्तुर्वल्लभैषा ।

मालविका— तदो किं दाणिं अत्ताणं आआसेमि ।

ततः किमिदानीमात्मानमायासयामि ।

(इति सासूय परावर्तते ।)

राजा— पश्य सख्या मुखम् ।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सासूयमाननमितः परिवर्तयन्त्या ।

निध्यायते अवलोक्यते । बद्धलक्षः एकाग्रचित्तः ।

भ्रूभङ्गेति । सासूय सामर्षम् । इतः अस्मात् प्रदेशात् । तया भ्रूभङ्गभि-

[1]कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥ ९ ॥

विदूषकः— अणुणअसज्जो दाणिं होहि ।
अनुनयसज्ज इदानीं भव ।

मालविका— अज्जगोदमो वि एत्थ एव्व सेवदि णं ।
आर्यगौतमोऽप्यत्रैव सेवत एनम् ।

(पुनः स्थानान्तराभिमुखीभवितुमिच्छति ।)

वकुलावलिका— (मालविकां दृष्ट्वा ।) ण खु कुविदा दाणिं तुमम् ।
न खलु कुपितेदानीं त्वम् ।

मालविका— जइ मं चिरं कुविदं मण्णेसि, एसो पच्चाणीअदि कोवो ।
यदि मां चिरं कुपितां मन्यसे, एष प्रत्यानीयते कोपः ।

राजा— (उपसृत्य ।)

कुप्यसि कुवलयनयने चित्रार्पितचेष्टया किमेवमयि ।
ननु तव साक्षादयमहमनन्यसाधारणो दासः ॥ १० ॥

त्रतिलकं कुटिलभ्रूविकारनिवृत्तविशेषकम् । स्फुरिताधरोष्ठम् । आननं मुखम् । एवंभूतं मुखं परिवर्तयन्त्या निवर्तयन्त्या । अनया । कान्तापराधरुषितेषु । ललिताभिनयस्य कोपाभिनयस्य । शिक्षा अध्यापनम् । विनेतुः उपाध्यायस्य नृत्ताचार्यस्य । सन्दर्शितेव ॥ ९ ॥

कुप्यसीति । हे कुवलयनयने । चित्रार्पितचेष्टया चित्रलिखितस्वरूपव्यापारतयापि । एवं प्रकारेण । किं कुप्यसि । अनन्यसाधारणः अन्यासां सामान्यो न । तव । दासोऽयमहं साक्षान्ननु ॥ १० ॥

1. कान्तापराधरुषितेषु.

वकुलावलिका— जेदु भट्टा । जयतु भर्ता ।

मालविका— (आत्मगतम् ।) कहं चित्तगदो भट्टा मए असूइदो ।
कथं चित्रगतो भर्ता मयासूयितः ।

(सव्रीडवदना अञ्जलिं करोति । राजा मदनकातर्यं रूपयति ।)

विदूषकः— किं भवं उदासीणो विअ ।
किं भवानुदासीन इव ।

राजा— अविश्वसनीयत्वात्सख्यास्ते ।

विदूषकः— मा दाव । तत्तहोदी तुह अविस्ससणीआ ।
[1]मा तावत् । तत्रभवती तवाविश्वसनीया ।

राजा— श्रूयताम् ।

पथि नयनयोः स्थित्वा स्वप्ने तिरोभवति क्षणा-
[2]त्सरति सहसा बाह्वोर्मध्यं गताप्यबला सती ।
मनसिजरुजा [3]क्लिष्टस्यैवं समागममायया
कथमिव सखे विस्रब्धं स्यादिमां प्रति मे मनः ॥

* अत्रभवत्यामिति । अस्मिन् वाक्ये काकुरनुसन्धेया ।

पथीति । सा अबला । नयनयोः पथि नयनमार्गे दृष्टिगोचरं वा स्थित्वा । क्षणात् । तिरोभवति प्रच्छन्ना भवति । बाह्वोर्मध्यं आलिङ्गनार्थं बाहुयुगलम् । गतापि । अबला सती अक्षमा सती । सरति अन्यत्र गच्छति । 'सृ गतौ' हे सखे मनसिजरुजा आविष्टस्य कामव्याधिना व्यथितस्य । मे । मनः । एव समागममायया । इमां मालविकां प्रति । कथमिव केन विश्वासेन । विस्रब्धं स्यात् विश्वस्तं स्यात् ॥ ११ ॥

1. अत्रभवत्यामयं तव अविश्वासः. 2. द्रहसि सहसा बाह्वोर्मध्य गतापि पलायते । 3. क्रान्तस्यैवं; आविष्टस्यैवं.

वकुलावलिका— सहि बहुसो किल तुए विप्पलद्धो भट्टा। ता दाव अत्ता विस्ससणिज्जो करीअदु।

सखि! बहुशः किल त्वया विप्रलब्धो भर्ता। तत्तावदात्मा विश्वसनीयः क्रियताम्।

मालविका— सहि मम उण मन्दभाइणीए सिविणअसमाअमो वि भट्टिणो दुल्लहो आसी।

सखि! मम पुनर्मन्दभागिन्याः स्वप्नसमागमोऽपि भर्तुर्दुर्लभ आसीत्।

वकुलावलिका— भट्टा देउ से उत्तरं।

भर्ता ददात्वस्या उत्तरम्।

राजा—

उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम्।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः॥ १२॥

वकुलावलिका— अणुगहीदम्हि। अनुगृहीतास्मि।

विदूषकः— (परिक्रम्य ससम्भ्रमम्।) वउलावलिए एसो बालासोअरुक्खस्स पल्लवाइ हरिणो लङ्घिदुं आअच्छदि। एहि णिवारेम णं।

वकुलावलिके! एष बालाशोकवृक्षस्य पल्लवानि हरिणो लङ्घितुमागच्छति। एहि निवारयाव एनम्।

उत्तरेणेति। उत्तरेण प्रत्युत्तरेण। किं किं प्रयोजनम्। पञ्चबाणाग्निसाक्षिकं कामाग्निसाक्षिकम्। तव। सख्यै। मयैव। आत्मा दत्तः। रहःसेविता एकान्ते शुश्रूषकः। त्वया। न सेव्यः। चित्रे एका सेविता एकान्तसेविता अहं त्वया प्रत्यक्षं न सेव्य इति॥ १२॥

वकुलावलिका— तह । तथा ।

(इति प्रस्थिता ।)

राजा— एवमस्मद्रक्षणे वयस्येनावहितेन भवितव्यम् ।

विदूषकः— एदं वि गोदमो णं सन्दिस्सइ ।

[1]एतदपि गौतमो ननु सन्दिश्यते ।

वकुलावलिका— अज्ज गोदम अहं अप्पआसे चिट्ठामि । तुमं दुवाररक्खओ होहि ।

आर्य गौतम ! अहमप्रकाशे तिष्ठामि । त्वं द्वाररक्षको भव ।

विदूषकः— जुज्जइ । युज्यते ।

(निष्क्रान्ता वकुलावलिका ।)

विदूषकः— (परिक्रम्यावलोक्य च ।) इदं दाव फलिअत्थलं । आसीणो होमि (तथा कृत्वा ।) अहो सुहफ्फरिसदा सिलाविसेसस्स ।

इदं तावत्स्फटिकस्थलम् । आसीनो भवामि । अहो सुखस्पर्शता शिलाविशेषस्य । (निद्रायते ।)

(मालविका ससाध्वसा तिष्ठति ।)

राजा—

विसृज सुन्दरि सङ्गमसाध्वसं
तव चिरात्प्रभृति प्रणयोन्मुखे ।

विसृजेति । हे सुन्दरि शोभने । संगमसाध्वस संपर्कैन्यलीकम् । विसृज त्यज । चिरात्प्रभृति अनेककालमारभ्य । प्रणयोन्मुखे सङ्गमस्नेहोन्मुखे सङ्गमाभि-

1. एवमपि.

परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ १३ ॥

मालविका— देवीए भएण अत्तणो वि पिअं कादुं ण पारेमि ।
देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि ।

राजा— अयि, न भेतव्यम्, न भेतव्यम् ।

मालविका— जो ण भाएदि सो मए भट्टिणीदंसणे दिट्ठसमवत्थो भट्टा णं ।
यो [1]न बिभेति, स मया भट्टिनीदर्शने दृष्टसमवस्थो भर्ता ननु ।

राजा—

दाक्षिण्यं नाम बिम्बोष्ठि बैम्बिकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥ १४ ॥

लाषेोन्मुखे वा । मयि । साध्वस भयम् । मयि सहकारतां गते सति । अतिमुक्तलताचरित वासन्तिकाकृत्यम् । ' अतिमुक्तः पुण्ड्रकः स्यात् वासन्ती माधवी लता ' इति कोशः । अतिमुक्तलता सहकारसङ्गमे गतसाध्वसा सशोभा च भवति । प्रतिगृहाण पुनः प्रतिपद्यस्व ॥ १३ ॥

भट्टिनी कृताभिषेका महिषी ।

दाक्षिण्यमिति । हे बिम्बोष्ठि बिम्बफलाधरोष्ठे । बैम्बिकानां अर्म्मामत्रवशजानां मरलमुखप्रसादशीलानामित्यर्थः । बिम्बशब्दोऽत्र मुखे वर्तते । ' बिम्बोऽस्त्री मण्डले सम्यत्प्रतिमामुखलक्ष्मसु ' इति यादवः । दाक्षिण्य सारल्यम् । कुलव्रत नाम कुलक्रमागतमेव यत्, तत् । हे दीर्घाक्षि विशाललोचने । ये मे प्राणाः ते त्वदाशानिबन्धनाः त्वदधीनाः ॥ १४ ॥

दाक्षिण्यमिति । बैम्बिकाः तद्वश्या राजानः ॥ १४ ॥

1. मां न भायर्यिष्यति

तदयमनुगृह्यतां चिरानुरक्तो जनः । (इति सश्लेषमभिनयति ।)

(मालविका नाट्येन परिहरति ।)

राजा— (आत्मगतम् ।) रमणीयः खलु नवाङ्गनानां मदनविषयावतारः । एषा हि,

हस्तं [1]कम्पयती रुणद्धि रशनाव्यापारलोलाङ्गुलिं
हस्तौ स्वौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं [2]पक्ष्मलचक्षुरुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥ १५ ॥

(ततः प्रविशतीरावती निपुणिका च ।)

इरावती— हञ्जे निउणिए सच्चं तुए संदिट्ठं चन्दिआए समुद्दघरआलिन्दए अज्जगोदमो एआई दिट्ठोत्ति ।

हञ्जे निपुणिके ! [3]सत्यं त्वया संदिष्टं चन्द्रिकया समुद्रगृहालिन्दे आर्यगौतम एकाकी दृष्ट इति ।

नवाङ्गनानां नववधूनाम् । मदनविषयावतारः कामभोगे आलिङ्गनाद्यनुभवः ।

हस्तमिति । प्रथम तावत् । हस्त कम्पयते । रशनाव्यापारलोलाङ्गुलि नीव्योर्विश्लेषणार्थं रशनास्थाने सञ्चारित करम् । रूणद्धि । 'रुधिर आवरणे' पश्चात् , बलादालिङ्ग्यमाना सती । स्वौ हस्तौ आत्मीयकरौ । स्तनावरणतां छादनतां । नयति । पक्ष्मलनेत्र सविलासनेत्र सान्द्ररोमयुक्तनेत्र वा । आनन मुखम् । पातु अधरास्वादनं कर्तुम् । उन्नमयतः ऊर्ध्वमभिमुख नयतः । मम । साचीकरोति । उन्नमयत इत्यनादरे षष्ठी । एव व्याजेन वर्तमानापि । अभिलाषपूरणसुखं सुखाभिलाषपूरणम् । निर्वर्तयत्येव ॥ १५ ॥

1. कम्पयते । 2 पक्ष्मलनेत्रमुन्नमयतः. 3 सत्य त्व परिगतार्थं चान्द्रिकायां समुद्रगृहे शायत एकाकी आर्यगौतमो दृष्ट इति ।

निपुणिका— अण्णहा कहं भट्टिणीए विण्णएमि ।

[1]अन्यथा कथं भट्टिन्यै विज्ञापयामि ।

इरावती— तेण हि तहिं एव्व गच्छह्म । संसआदो मुत्तं भट्टिणो पिअवअस्सं पेक्खिदुं अ ।

तेन हि तत्रैव गच्छावः । संशयान्मुक्तं भर्तुः प्रियवयस्यं प्रेक्षितुं[2] च— ।

निपुणिका— सावसेसं विअ भट्टिणीये वअणं ।

सावशेषमिव भट्टिन्या वचनम् ।

इरावती— आम । चित्तगदं भट्टारं पसादेदुं ।

[3]आम् । चित्रगतं भर्तारं प्रसादयितुम् ।

निपुणिका— अह दाणिं भट्टा एव्व किं ण पच्चणुणीअदि ।

[4]अथेदानीं भर्तैव किं न प्रत्यनुनीयते ।

इरावती— मुद्धे जारिसो चित्तगदो तारिसो एव्व अण्णसङ्कन्दहिअओ अज्जउत्तो । केवलं उवआरादिक्कमं पमज्जिदुं अह्माणं आरम्भो ।

मुग्धे! [5]यादृशश्चित्रगतस्तादृश एवान्यसंक्रान्तहृदय आर्यपुत्रः । केवलमुपचारातिक्रमं प्रमार्ष्टुमस्माकमयमारम्भः ।

निपुणिका— इदो इदो भट्टिणी । इत इतो भट्टिनी ।

[उभे परिक्रामतः ।

---

1. किं पुनरन्यथा. 2. प्रष्टु 3. अन्यच्च. 4 अथ कथमिदानीं भर्तैव न प्रसाद्यते । 5 य ईदृशश्चित्रगतो भर्ता न तादृशोऽन्यसंक्रान्त...

(प्रविश्य ।)

चेटी— जेदु भट्टिणी । देवी भणादि । ण मे एसो मच्छरस्स कालो । केवलं तुह खु बहुमाणं वड्ढेदुं वअस्सिआए सह णिअलबन्धणे किदा मालविआ । जइ अणुमण्णेसि अज्जउत्तं वि तुह किदे विण्णविस्सं । जं तुह इच्छिदं तं भणाहित्ति ।

जयतु भट्टिनी । देवी भणति— 'न मे एष मत्सरस्य कालः । केवलं तव खलु बहुमानं वर्धयितुं वयस्यया सह निगलबन्धने कृता मालविका । [1]यद्यनुमन्यसे, आर्यपुत्रमपि तव कृते विज्ञापयिष्यामि । यत्तवेष्टं तद्भण' इति ।

इरावती— णाअरिए विण्णवेहि देविं । का वअं भट्टिणिं णिओएदुं । परिअणणिग्गहेण मइ दंसिदो सिणेहो । कस्स वा अण्णस्स पसादेण अअं जणो वड्ढदित्ति ।

नागरिके ! विज्ञापय देवीम् । का वयं भट्टिनीं नियोजयितुम् । परिजननिग्रहेण[2] मयि दर्शितः स्नेहः[3] । कस्य वान्यस्य प्रसादेनायं जनो वर्धत इति ।

चेटी— तह । तथा ।

(इति निष्क्रान्ता ।)

निपुणिका— (परिक्रम्यावलोक्य ।) भट्टिणी एसो दुवारुच्छङ्गे समुद्दघरअस्स विवणिगदो विअ उसहो अज्जगोदमो आसीणो एव्व णिद्दाअदि ।

भट्टिनी ! एष द्वारोत्सङ्गे[4] समुद्रगृहस्य विपणिगत इव

---

1. यदि पुनर्मन्यसे, 2. निगलेन, 3. अनुग्रहः, 4. द्वारदेशे

[1]वृषभ आर्यगौतमो आसीन एव निद्रायते ।

इरावती— अच्चाहिदं । ण खु सावसेसविसविआरो भवे ।

अत्याहितम् । न खलु सावशेषविषविकारो भवेत् ।

निपुणिका— पसण्णमुहो दीसइ । अविअ धुवसिद्धिणा चिइ-च्छिदो । ता से असङ्कणिज्जं पावं ।

प्रसन्नमुखो दृश्यते । अपि च ध्रुवसिद्धिना चिकित्सितः । तदस्य अशङ्कनीयं पापम् ।

विदूषकः— (उत्स्वप्नायते ।) होदि मालविए ।

भवति मालविके!— ।

निपुणिका— सुदं भट्टिणीए । कम्स वि एसो अत्तणीणो हदा-सो किदवो । सव्वकालं इदो एव्व सोत्थिवाअणमोदएहिं कुक्खिं पूरिअ सम्पदं मालविअं ऊसिविणाअदि ।

श्रुतं भट्टिन्या । [2]कस्याप्येष आत्मनीनो हताशः कितवः । [सर्वकालमित एव स्वस्तिवाचनमोदकैः कुक्षिं पूरयित्वा सांप्रतं मालविकां [3]उत्स्वप्नायते ।

विदूषकः— इरावदिं अदिक्कामन्दी होहि ।

इरावतीमतिक्रामन्ती भव ।

उत्स्वप्नः निद्रावशवाक्यम् । आत्मभरिः कुक्षिभरिः स्वोदरपूरणे असवादापेक्षी ।

* मालविकां स्वप्नायते । अत्र दोषोद्घटनात् अपवादो नाम सन्ध्यङ्गमुक्त भवति । अत्रैव रोषभाषणात् संफेटो नाम सन्ध्यङ्गमुक्त भवति ।

---

1. बलीवर्दः, समुद्रगृहस्य निवृत्तविषवेग इव आर्य... 2. कस्यैष आत्मनियोगसंपादने विश्वसनीयो हताशः 3 स्वप्नायते.

निपुणिका— सुदं एदं अच्चाहितम् । भुअङ्गभीरुअं बह्मबन्धुं इमिणा भुअङ्गकुडिलेण दण्डकट्ठेण तम्भन्दरिदा भविअ भीसअस्सि ।

श्रुतमेतदत्याहितम् । भुअङ्गभीरुकं ब्रह्मबन्धुमनेन भुजङ्ग-कुटिलेन दण्डकाष्ठेन स्तम्भान्तरिता भूत्वा भीषयिष्ये ।

इरावती— एसो अरुहदि किदवो सप्पदंसस्स ।

एषोऽर्हति कितवः सर्पदंशस्य[1] ।

(निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति ।)

विदूषकः— (सहसा प्रतिबुध्य ।) अविह अविह । भो दव्वीअरो मे उवरि पडिदो ।

अविध, अविध ! भो दर्वीकरो मे उपरि पतितः ।

राजा— (सहसोपसृत्य ।) सखे ! न भेतव्यं न भेतव्यम् ।

मालविका— (अनुसृत्य ।) भट्टा मा दाव सहसा णिक्कम । सप्पोत्ति भणादि ।

भर्तः ! मा तावत्सहसा निष्क्राम । सर्प इति भणति[2] ।

इरावती— हद्धि हद्धि ! भट्टा इदो एव्व धावइ ।

हा धिक्, हा धिक् ! भर्ता इत एव धावति ।

निष्क्राम उपसर्प ।

* अत्याहित नाम जीवानपेक्षि कर्म । 'अत्याहितं महाभीतिः कर्म जीवानपेक्षि च ।' इत्यमरः ।

* अर्हत्येव कृतघ्न उपद्रवस्य इत्यत्र 'क्वचिदर्हतेः' इति कर्मणि षष्ठी । दर्वी-करेति । अत्रोद्वेजनात् द्रव इति सन्ध्यङ्गमुक्त भवति ।

1. अर्हत्येव कृतघ्न उपद्रवस्य 2 भणितिः ।

विदूषकः— (सप्रहासम्।) कहं दण्डकट्ठं एदं। अहं उण जाणे जं मए केदईकण्टएहिं दंसं करिअ सप्पस्स विअ दंसो किदो तं फलिदंति।

कथं दण्डकाष्ठमेतत्। अहं पुनर्जाने यन्मया केतकीकण्टकाभ्यां दंशं कृत्वा सर्पस्येव दंशः कृतः, तत्फलितमिति।

(ततः प्रविशति पटाक्षेपेण वकुलावलिका।)

वकुलावलिका— मा दाव भट्टा पविसदु। इह कुडिलगई सप्पो विअ दीसइ।

मा तावत् भर्ता प्रविशतु। इह कुटिलगतिः सर्प इव दृश्यते।

इरावती— (राजानं सहसोपसृत्य।) अवि णिव्विघ्घमणोरहो दिवासङ्केदो मिहुणस्स।

अपि निर्विघ्नमनोरथो दिवासङ्केतो मिथुनस्य।

(सर्वे इरावतीं दृष्ट्वा सम्भ्रान्ताः।)

राजा— प्रिये अपूर्वोऽयमुपचारः।

इरावती— वउलावलिए दिट्ठिआ दोच्चाहिआरविसआ संपुण्णा दे पडिण्णा।

वकुलावलिके! दिष्ट्या दूत्याधिकारविषया संपूर्णा ते प्रतिज्ञा।

वकुलावलिका— पसीददु भट्टिणी। किं णु खु ददुरा वाहरन्दित्ति देवो पुढविं विसुमरेदि। किं मये किदंति देवो पुच्छिदव्वो।

दिवासङ्केतः दिवासङ्गमः।

प्रसीदतु भट्टिनी । किं[1] नु खलु दर्दुरा [2]व्याहरन्तीति [3]देवः पृथिवीं विस्मरति । किं मया कृतमिति देवः प्रष्टव्यः ।

विदूषकः— मा दाव । होदीए दंसणमत्तेण अत्तभवं पणिवादलङ्घण विसुमरिदो । होदी उण अज्ज वि पसादं ण गेह्णादि ।

मा तावत् । भवत्या दर्शनमात्रेणात्रभवान प्रणिपातलङ्घनं विस्मृतः । भवती पुनः अद्यापि प्रसादं न गृह्णाति ।

इरावती— कुविदा वि दाणिं किं करिस्सं ।

कुपितापीदानीं किं करिष्यामि ।

राजा— अस्थाने कोप इत्येतदनुपपन्नं त्वयि । तथा हि—

कदा मुखं वरतनु कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ १६ ॥

इरावती— अट्ठाणेत्ति सुट्ठु वाहरिदं अज्जउत्तेण । अण्णसङ्कन्देसु अह्माण भाअहेएसु जइ उण कुप्पेअं अहं हस्सा हविस्सम् ।

दर्दुरा व्यवहरन्ति मण्डूकाः शब्दायन्ते । व्यवहरन्तीति इरावत्याः सज्ञा ।

व्याहरन्तीति आक्रोशन्तीति ।

कदेति । हे वरतनु श्रेष्ठाङ्गि । तव मुखम् । कारणात् ऋते कोपकारण विना । क्षणमपि । कदा कोपपात्रता कोपस्य योग्यताम् । आगत प्राप्तम् । तथाहि— अपर्वणि अपौर्णिमायाम् । ग्रहकलुषेन्दुमण्डला राहुग्रहणधूसरेन्दुबिम्बा । विभावरी निशा । कलुषा । कथ भविष्यति । कथय वद ॥ १६ ॥

---

1 न खलु. 2. व्यवहरन्तीति. 3. प्रथिव्यां देवो वर्षितु विरमति ; देवः पृथिवीमपि स्मरति.

अस्थान इति सुष्ठु व्याहृतमार्यपुत्रेण । अन्यसंक्रान्ते-ष्वस्माकं भागधेयेषु यदि पुनः कुप्येयम, ततोऽहं [1]हास्या भवेयम् ।

राजा— त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेवात्र कोपस्थानं न पश्यामि । कुतः,

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो दण्डम् ।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥ १७ ॥

इरावती— णिउणिए गच्छ देविं विण्णवेहि । दिट्ठं देवीए पक्खवाइत्तणं अज्जाए ।

निपुणिके ! गच्छ देवीं विज्ञापय—दृष्टं देव्याः पक्षपातित्वमद्येति ।

निपुणिका— तह । तथा । [इति निष्क्रान्ता ।

विदूषकः— (आत्मगतम् ।) अहो अणत्थो संवुत्तो । बन्धणब्भट्ठो-घरकवोदओ बिडालिआलोए पडिदो ।

अहो अनर्थः संवृत्तः[2] । बन्धनभ्रष्टो गृहकपोतको [3]बिडालिकालोके पतितः ।

नार्हतीति । परिजनः । दासजनः । उत्सवदिवसेषु मङ्गलदिवसेषु दण्डम् । नार्हति न प्राप्तो भवति । किंविशिष्ट कृतापराधोऽपि अपराधमार्ग कृतवानपि । इति मत्वा मया मोचिते । मां प्रणपतितु नमस्कर्तुम् । उपगते प्राप्ते च ॥१५॥

मन्दिरालग्न इव कपोतो बिडालालोके पतितः गृहे वर्धितः कपोतः मार्जारमुखे पतित इव ।

1. अपहास्या ; अवहसिता. 2. सपतितः 3. बिडालिकयावलोकितः, मन्दिरालग्न इव कपोतो बिडालालोके पतितः ।

(प्रविश्य ।)

निपुणिका— भट्टिणि जदिच्छादिट्ठाए माहविआए आचख्खिदं । एवं खु एदं णिव्वुत्तं ति ।

भट्टिनि! यदृच्छादृष्टया माधविकयाख्यातम्— एवं खल्वेतन्निर्वृत्तमिति । (कर्णे कथयति ।)

इरावती— (आत्मगतम् ।) उववण्णं सव्वं । बह्मबन्धुणा उब्भिण्णो दुप्पओओ । (विदूषकं विलोक्य प्रकाशम् ।) इअं इमस्स कामतन्तसइवस्स णीदी ।

उपपन्नं सर्वम् । ब्रह्मबन्धुनोद्भिन्नो दुष्प्रयोगः । इयमस्य कामतन्त्रसचिवस्य नीतिः ।

विदूषकः— होदि जइ णीदीए एक्कं वि अक्खरं पठेअं तदो णं गाअत्तिं वि विसुमरेअं ।

भवति यदि [1]नील्या एकमप्यक्षरं पठेयं ततो ननु गायत्रीमपि विस्मरेयम् ।

राजा— (स्वगतम् ।) कथंनु खलु सङ्कटादस्मादात्मानं मोचयिष्यामि ।

(प्रविश्य ।)

जयसेना— (सावेगम् ।) देव कुमारी वसुलच्छी कन्दुअं अणुधावन्दी पिङ्गलवाणरेण वलिअं उत्तासिदा अङ्कणिसण्णा

कामतन्त्रं रतिरहस्यादि । गवां प्रवेशितो भवेयम् । गोशब्दोऽत्र वाग्वाचकगोशब्दस्वरूपेण । एतदुक्तं भवति—यद्यहं नील्यामेकमक्षरं पठेयं वाचः स्वरूपं तावत् प्रवेशितो भवेत् । अतिपण्डितो भवेयमित्यर्थः ।

1. नील्यामेकमप्यक्षरं पठेयं ध्रुव ततो मयात्मा गोहत्यां प्रापितो भवेत्

देवीए पवादकिसलयं विअ वेवमाणा दाणिं वि पकिदिं ण पडिवज्जइ ।

देव! कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती[1] पिङ्गलवानरेण बलवदुत्रासिताङ्कनिषण्णा देव्याः प्रवातकिसलयमिव वेपमाना इदानीमपि प्रकृतिं[2] न प्रतिपद्यते ।

राजा— कष्टम् । कातरो बालभावः ।

इरावती— (सावेगम् ।) तुवरदु तुवरदु अज्जउत्तो णं समासासेदुं । मा दाव से सन्तासजणिओ विआरो वड्ढदु ।

त्वरतां त्वरतामार्यपुत्र एनां समाश्वासयितुम् । मातावदस्याः सन्त्रासजनितो विकारो वर्धताम् ।

राजा— अहमेनां संज्ञापयामि । (सत्वर परिक्रामति ।)

विदूषकः— (आत्मगतम् ।) साहु रे पिङ्गलवाणर साहु । सुट्ठु परित्तादो तुए सङ्कडादो सपक्खो ।

साधु रे पिङ्गलवानर! साधु । सुष्ठु परित्रातस्त्वया सङ्कटात्[3] सपक्षः ।

(निष्क्रान्तः सवयस्यो राजा इरावती निपुणिका चेटी च ।)

मालविका— हला देविं चिन्तिअ वेवदि मे हिअअं । ण आणे अदो वरं किं अणुहोदव्वं भविस्सादित्ति ।

हला! देवीं चिन्तयित्वा वेपते मे हृदयम् । न जाने अतः परं किमनुभवितव्यं भविष्यतीति ।

---

* परित्रातस्त्वया सपक्षः अहं इति शेषः ।

1 अनुभवन्ती. 2. सज्ञां ; न किंचित्प्रकृतिं प्रतिपद्यते 3 स्वपक्षः

(नेपथ्ये ।)

अच्चरिअं अच्चरिअं । अपुण्णे एव्व पञ्चरत्ते दोहदस्स मुउलेहिं सण्णद्धो तवणीआसोओ । जाव देवीए णिवेदेमि ।

आश्चर्यमाश्चर्यम् । अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः सन्नद्धस्तपनीयाशोकः । यावद्देव्यै निवेदयामि ।

(उभे श्रुत्वा प्रहृष्टे भवतः ।)

वकुलावलिका— समस्ससदु पिअसही । सच्चप्पडिण्णा देवी ।

समाश्वसितु प्रियसखी । सत्यप्रतिज्ञा देवी ।

मालविका— तेण हि पमदवणपालिआए पिट्ठदो होम्म ।

तेन हि प्रमदवनपालिकायाः पृष्ठतो भवावः ।

वकुलावलिका— तह । तथा ।

[इति निष्क्रान्ताः सर्वे ।

इति चतुर्थोऽङ्कः ॥

---

* सत्यप्रतिज्ञा देवी । अत्र देव्यनुग्रहकार्यस्य संग्रहणात् आदानं नाम सन्ध्यङ्गमुक्तं भवति । तेन हीति । इदं मालविकाकृतोद्यानपालिकानुसरणं उत्तरोपयुक्तत्वात् बिन्दुरिति मन्तव्यम् ।



पञ्चमोऽङ्कः ॥

(ततः प्रविशत्युद्यानपालिका ।)

उद्यानपालिका— उवक्खित्तो मए किदसक्कारविहिणो तवणीआसोअस्स वेदिआबन्धो । जाव अणुचिट्ठिदणिओअं अत्ताणं देवीए णिवेदेमि । (परिक्रम्य ।) अहो देव्वस्स अणुअम्पणिज्जा मालविआ । जं तस्सिं तह चण्डीकिदा देवी इमिणा असोअकुसुमउत्तंदेण पसादसुमुही भविस्सदि । कहिं णु खु देवी भवे । (विलोक्य ।) अम्मो एसो देवीए परिजणब्भंदरो किं वि जदुमुद्दालंछिदं चीवरबन्धं करे गेह्णिअ चतुस्सालादो कुज्जो सारसओ णिक्कामदि । पुच्छिस्सं दाव णं ।

उपक्षिप्तो मया कृतसत्कारविधेस्तपनीयाशोकस्य [1]वेदिकाबन्धः । यावदनुष्ठितनियोगमात्मानं देव्यै निवेदयामि । अहो दैवस्यानुकम्पनीया मालविका । यत् तस्यां तथा चण्डीकृता देवी अनेनाशोककुसुमवृत्तान्तेन प्रसादसुमुखी भविष्यति । कुत्र नु खलु देवी भवेत् । अहो एष देव्याः

उपक्षिप्तः कृतः । सत्कारविधिः दोहदादिसत्कारकर्म । भित्तिवेदिकाबन्धः आलवालाधिष्ठितकुड्यवेदिकाबन्धः । अनुष्ठितनियोग कृतनिदेशानुष्ठानम् । प्रसादसुमुखी प्रसन्नमुखरागा ।

* कविरिदानीमङ्कान्तरमारभमाणः कथासघटनार्थं प्रवेशक नाम अर्थोपक्षेपक प्रस्तौति—ततः प्रविशतीत्यादि ।

1. भित्तिवेदिकाबन्धः

परिजनाभ्यन्तरः किमपि जतुमुद्रालाञ्छितं चीवरबन्धं करे[1] गृहीत्वा चतुः शालान् कुब्जः सारसको निष्क्रामति । प्रक्ष्यामि तावदेनम् ।

(ततः प्रविशति यथानिर्दिष्टः कुब्जः ।)

उद्यानपालिका— (उपसृत्य ।) सारसअ कहिं पत्थिदोसि ।

सारसक ! कुत्र प्रस्थितोऽसि ।

सारसकः— महुअरिए वेअपारआणं बम्हणाणं णिच्चदक्खिणा दादव्वा । ता अज्जपुरोहिदस्स हत्थं पावइस्सं ।

मधुकरिके ! [2]वेदपारगाणां ब्राह्मणानां नित्यदक्षिणा दातव्या । तदार्यपुरोहितस्य हस्तं प्रापयिष्यामि ।

मधुकरिका— किंणिमित्तं । किन्निमित्तम् ।

सारसकः— जदा पहुदि सुदं सेणावइणा जण्णतुरअरक्खणे णिउत्तो भट्टिदारओ वसुमित्तोत्ति, तदा पहुदि तस्स आयुसो णिमित्तं अट्ठादससुवण्णपमाणं दक्खिणं देवी दक्खिणीएहिं पडिग्गाहेदि ।

यदा प्रभृति श्रुतं सेनापतिना यज्ञतुरगरक्षणे नियुक्तो भर्तृदारको वसुमित्र इति, तदा प्रभृति तस्यायुषोनिमित्त-

---

चीवरबन्ध मुद्रितलेखबन्धम् । विद्यापारायण अनुतिष्ठतां ग्रहशान्त्यादिकर्म कुर्वताम् ।

---

1. जतुमुद्रालाञ्छितां मञ्जूषिकां गृहीत्वा. 2. विद्यापारायणमनुतिष्ठतां ब्राह्मणानां नित्यदक्षिणानिष्काणि । आर्यपुरोहितस्य हस्त एव वितरीतुम ।

मष्टादशसुवर्णप्रमाणां[1] दक्षिणां देवी [2]दक्षिणीयैः प्रतिग्राह्-
यति ।

मधुकरिका— जुज्जइ । अह कहिं देवी । किं वा अणुचिट्ठदि ।
युज्यते । अथ कुत्र देवी । किं वानुतिष्ठति ।

सारसकः— मङ्गलघरे आसणत्था विअम्भविसआदो भादुणा
वीरसेणेन पेसिदं लिपिअरेहिं वाचिअमाणं लेहं सुणादि ।

मङ्गलगृहे आसनस्था [3]विदर्भविषयात् भ्रात्रा वीरसे-
नेन प्रेषितं लिपिकरैर्वाच्यमानं लेखं शृणोति ।

मधुकरिका— को उण विअम्भराअवुत्तन्दो ।
कः पुनर्विदर्भराजवृत्तान्तः ।

सारसकः— वसीकिदो किल वीरसेणप्पमुहेहिं भट्टिणो विअअद-
ण्डेहिं विअम्भणाहो । मोइदो अ से दाआदो माहवसेणो ।
तेण महासाराइ रअणवाहणाइ सिप्पआरिआभूइट्ठं परिअणं अ
उवाअणीकरिअ भट्टिणो सआसं पेसिदो दूदो सुवो किल
भट्टारं पेक्खिस्सदि ।

[4]वशीकृतः किल वीरसेनप्रमुखैर्भर्तुर्विजयदण्डैर्विदर्भ[5]-
नाथः । मोचितश्चास्य [6]दायादो माधवसेनः । तेन महासा-
राणि रत्नवाहनानि शिल्पकारिकाभूयिष्ठं परिजनं चोपायनी-
कृत्य भर्तुः सकाशं प्रेषितो दूतः श्वः किल भर्तारं द्रक्ष्यति ।

* दक्षिणीयाः दक्षिणार्हाः । छप्रत्ययः । लेख पत्रिकाम् ।

1 परिमाणां, परिमितां; 2 दक्षिणीयान् ब्राह्मणान्; 3. भूत्वा विदर्भसकाशात्. 4 गृहीतः; 5. दण्डचक्रैर्विदर्भ . . 6. दयातो.

मधुकरिका— गच्छ अणुचिट्ठ अत्तणो णिओअं । अहं वि देविं पेक्खिस्सं ।

गच्छ अनुतिष्ठ आत्मनो नियोगम् । अहमपि देवीं द्रक्ष्यामि ।

[इति निष्क्रान्तौ ।

प्रवेशकः ॥

(ततः प्रविशति प्रतीहारी ।)

प्रतीहारी— आणत्तम्हि देवीए असोअसक्कारव्वावुदाए—विण्णवेहि अज्जउत्तम् । इच्छामि अज्जउत्तेन सह असोअरुक्खस्स पसूणलच्छिं पच्चक्खीकादुं त्ति । ता जाव धम्मासणगदं देवं पडिवालेमि ।

आज्ञप्तास्मि देव्या अशोकसत्कारव्याप्ृतया[1]—विज्ञापयार्यपुत्रम् । 'इच्छाम्यार्यपुत्रेण सहाशोकवृक्षस्य प्रसूनलक्ष्मीं[2] प्रत्यक्षीकर्तुम' इति । तद्यावद्धर्मासनगतं देवं प्रतिपालयामि ।

[इति परिक्रामति ।

(नेपथ्ये ।)

वैतालिकौ— दिष्ट्या दण्डेनैवारिशिरःसु वर्तते देवः ।

प्रथमः—

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्ग इवाङ्गवान् ।

दण्डेन दण्डचक्रेण दण्डचक्रं सेना ।

परेति । हे वरद । परभृतकलव्यापारेषु कोकिलकलशब्दयुक्तेषु । विदिशातीरोद्यानेषु विदिशा नाम नदी, तत्कूलोद्यानेषु । अङ्गवान् शरीरवान् ।

1. अशोकसत्कारवत्सलया; 2. पुष्पश्रियम् ;

विजयकरिणामालानाङ्कैरुपोढबलस्य ते
वरद वरदारोधोवृक्षैः सहावनतो रिपुः ॥ १ ॥

द्वितीयः—

विरचितपदं वीरप्रीत्या सुरोपम सूरिभि-
श्चरितमुभयोर्मध्येकृत्य स्थितं कथकैशिकान् ।
तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिः शौरेः प्रसह्य च रुक्मिणीम् ॥

प्रतीहारी— एसो जअसद्दसूइदपत्थाणो भट्टा इदो एव्व आअच्छदि । अहं वि दाव इमस्स पमुहादो किंवि ओसरिअ एदं मुहालिन्दतोरणं समस्सिदा होमि ।

एष जयशब्दसूचितप्रस्थानो भर्ता इत एवागच्छति ।

अनङ्ग इव । त्वम् । आत्तरतिः प्राप्तसुखः । मधु वसन्तम् । नयसि वसन्तकालं गमयसि । उपोढबलस्य रक्षितसैन्यस्य । ते । विजयकरिणां युद्धकरिणाम् । आलानाङ्कैः बन्धस्तम्भाङ्कितैः । वरदारोधोवृक्षैः सह । रिपुः । अवनतः प्रणतोऽभूत् ॥ १ ॥

विरचितपदमिति । हे सुरोपम देवसदृश । दण्डानीकैः सेनाचक्रैः । विदर्भपतेः विदर्भराजस्य । श्रियं राज्यलक्ष्मीम् । हृतवतः । तव च । परिघगुरुभिः अर्गलासारैः । बाहुभिः दोर्भिः । विदर्भपतेः सुतां रुक्मिणीम् । प्रसह्य हठात्कृत्य । हृतवतः । शौरेश्च । युवयोरुभयोः । चरितम् । किंभूतं—सूरिभिः पण्डितैः । वीरप्रीत्या वीरसेनप्रीत्या । विरचितपदं विरचितकार्यं (व्यं) अन्यत्र, शौरेः वीरप्रीत्या शौर्यप्रीत्या । वीरः शूर इति विरचितपदम् । एवं भूतमुभयोश्चरितम् । कथकैशिका नाम देशविशेषः तन्मध्ये स्थितमित्यर्थः ॥ २ ॥

विरचितपदमिति । कथकैशिकान् विदर्भान् मध्येकृत्य मध्ये कृत्वा । आक्रम्येत्यर्थः । 'मध्येपदे निवचने च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति समासः । समासानन्तरं क्त्वो ल्यबिति ल्यबादेशः ॥ २ ॥

अहमपि तावदस्य प्रमुखात्किमप्यपसृत्य एतन्मुखालिन्दतोरणं समाश्रिता भवामि । (एकान्ते स्थिता ।)

(ततः प्रविशति सवयस्यो राजा ।)

राजा—

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च हृदयं सुखमश्नुते च ॥ ३ ॥

विदूषकः— जह अहं पेक्खामि तह एक्कन्दसुहिदो भवं भविस्सदि ।

यथाहं पश्यामि तथैकान्तसुखितो भवान् भविष्यति ।

राजा— कथमिव ।

विदूषकः— अज्ज किल देवीए धारिणीए पण्डिदकोसिई भणिदा । भअवदि जइ तुमं पसाहणगव्वं वहेसि ता दंसेहि मालवि-

---

प्रमुखालोकात् अभिमुखात् ।

कान्तामिति । सुलभेतरसप्रयोगां सुखसंप्राप्तिरहितकृत्याम् । कान्ताम् । विचिन्त्य । बलैः चतुरङ्गबलैः । विदर्भपतिं विदर्भराजम् । आनमितं च । श्रुत्वा । स्थितस्य मे हृदयम् । आतपे अभिहतं भानुकरतप्तमध्याह्नातपाभिहतम् । सरोजं सरोरुहम् । धाराभिः वर्षधाराभिः । आश्वासितमिव । दुःखायते, सुखमश्नुते च कान्तामघटिता विचिन्त्य दुःखायते, विदर्भपतिमानमितं श्रुत्वा सुखमश्नुते च ।

* **कान्तामिति** । सुलभेतरसप्रयोगां दुर्लभसमागमाम् । दुःखायते 'सुखादिभ्यः कर्तृवेदनायां' इति क्यष् । अत्र मालविकारूपबीजानुसन्धानात् सन्धिर्नाम निर्वहणमन्धेः प्रथमाङ्गमुक्तं भवति ॥ ३ ॥

* कथमिति प्रश्ने । अत्र कार्यान्वेषणाद्विबोधो नाम सन्ध्यङ्गमुक्तम् ।

आए सरीरे वैदब्भं विवाहणेवच्छंति। ताए वि सविसेसालङ्किदा मालविआ। तत्तहोदी कदा वि पूरेइ भवदो मणोरहं।

अद्य खलु देव्या धारिण्या पण्डितकौशिकी भणिता। 'भगवति! यदि त्वं प्रसाधनगर्वं वहसि, तद्दर्शय मालविकायाः शरीरे वैदर्भं विवाहनेपथ्यम्' इति। तयापि सविशेषालंकृता मालविका। तत्रभवती कदापि पूरयति भवतो मनोरथम्।

राजा— सखे मदपेक्षानुवृत्त्या निवृत्तेर्ष्यायाः धारिण्याः पूर्वचरितैः सम्भाव्यमेतत्।

प्रतीहारी— (उपगम्य।) जेदु भट्टा। देवी विण्णवेदि—तवणीआसोअस्स कुसुमसोहादंसणेण मह आरम्भो सफलीकरीअदुत्ति।

जयतु भर्ता। देवी विज्ञापयति—'तपनीयाशोकस्य कुसुमशोभादर्शनेन ममारम्भः सफलीक्रियताम्' इति।

राजा— ननु तत्रैव देवी।

प्रतीहारी— अह इं। जहारुहसम्माणसुहिदं अन्देउरं विसज्जिअ मालविआपुरोएण अत्तणो परिअणेण सह देवं पडिवालेइ।

अथ किम्। यथार्हसम्मानसुखितं अन्तःपुरं विसृज्य मालविकापुरोगेणात्मनः परिजनेन सह देवं प्रतिपालयति।

राजा— (सहर्षम्। विदूषकं विलोक्य।) जयसेने! गच्छाग्रतः।

* अद्य किलेति। अत्र कार्योपदर्शनात्पूर्वभावो नाम सन्ध्यङ्गमुक्तं भवति।

1. कदाचित्पूरयेत् 2. यथार्हं संमान्य सर्वं.

प्रतीहारी— इदो इदो देवो । इत इतो देवः ।

(सर्वे परिक्रामन्ति ।)

विदूषकः— (विलोक्य) भो वअस्स किंचि परिवुत्तजोव्वणो विअ वसन्तो पमदवणे लक्खीअदि ।

भो वयस्य ! किंचित्परिवृत्तयौवन इव वसन्तः प्रमदवने लक्ष्यते ।

राजा— यथाह भवान् ।

अग्रे [1]विकीर्णकुरवकफलजालविभिद्यमानसहकारम् ।
परिणामाभिमुखमृतोरुत्सुकयति यौवनं चेतः ॥ ४ ॥

विदूषकः— (परिक्रम्य ।) अहो अअं सो दिण्णणेवच्छो विअ कुसुमत्थवएहिं तवणीआसोओ । ओलोएदु भवं ।

अहो अयं स दत्तनेपथ्य इव कुसुमस्तबकैस्तपनीयाशोकः । अवलोकयतु भवान् ।

राजा— स्थाने खल्वयं प्रसवमन्थरोऽभूत् । यदयमिदानीमनन्यसाधारणां शोभां उद्वहति । पश्य—

अग्र इति । अग्रे पूर्वत । विकीर्णकुरवक श्लथकुरवककुसुमम् । फलजालकभिद्यमानसहकार सहकारस्य फलसमूहैः विभिद्यमानम् । परिणामाभिमुख परिणत्यभिमुखम् । ऋतो वसन्तस्य । यौवनम् । चेतो मनः । उत्सुकयति अभिलाषयति ॥ ४ ॥

प्रसवमन्थर. कुसुमसुन्दरः ।

---

1. विकीर्णकुरबक फलजालविभज्यमानसहकारम् ; विकीर्णकुरबक फलजालकभज्यमानसहकारम .

सर्वाशोकतरूणां प्रथमं सूचितवसन्तविभवानाम्[1] ।
निर्वृत्तदोहदेऽस्मिन्संक्रान्तानीव कुसुमानि ॥ ५ ॥

विदूषकः— भो विस्सद्धो होहि । अह्मेसु सण्णिहिदेसु वि धारिणी पम्सपरिवट्टिणिं मालविअं अणुमण्णेदि ।

भो विस्रब्धो भव । अस्मासु सन्निहितेष्वपि धारिणी पार्श्वपरिवर्तिनीं मालविकामनुमन्यते ।

राजा— (सहर्षम् ।) पश्य, सखे!

मामियमभ्युत्तिष्ठति देवी विनयादनूत्थिता प्रियया ।
विस्मृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ॥ ६ ॥

(ततः प्रविशति देवी मालविका परिव्राजिका विभवतश्च परिवारः ।)

मालविका— (आत्मगतम् ।) जाणामि णिमित्तं कोदुआलङ्कारस्स । तह वि बिसिणीपत्तगद सलिलं विअ वेवइ मे हिअअं । दक्खिणेदरं वि णअणं बहुसो फुरइ ।

जानामि निमित्तं कौतुकालङ्कारस्य । तथापि [2]बिसिनी-

सर्वेति । प्रथम पूर्वम् । सूचितवसन्तमासानां पूर्वाभिव्यक्तवसन्तोद्गमानाम् । सर्वाशोकतरूणां सर्वेषामशोकवृक्षाणाम् । कुसुमानि । निर्वृत्तदोहदं समापितदोहलादौ । अस्मिन् अशोके । सक्रान्तानीव पुष्पसामग्र्यादेतदुक्त भवति ॥ ५ ॥

मामिति । इय देवी । विनयात् प्रियनृपतिगौरवात् । उत्थिता सती । मामनु अस्मानुद्दिश्य । प्रियया मालविकया सह अभ्युत्तिष्ठति प्रत्युद्गता भवति । विस्तृतहस्तकमलया करतलरहितसरोजया । नरेन्द्रलक्ष्म्या सार्धम् । वसुमती भूदेवीव ॥ ६ ॥

1. वसन्तमासानाम्. 2 पुष्कर.

पत्रगतं सलिलमिव वेपते मे हृदयम । दक्षिणेतरदपि नयनं बहुशः स्फुरति ।

विदूषकः— भो वअस्स किं वि वैवाहिअणेवच्छेण सविसेसं खु सोहइ तत्तहोदी मालविआ ।

भो वयस्य ! किमपि[1] वैवाहिकनेपथ्येन सविशेषं खलु शोभते तत्रभवती मालविका ।

राजा— पश्याम्याभरणालंकृतामेनाम् । यैषा,

अनतिलम्बिदुकूलनिवासिनी
लघुभिराभरणैः प्रतिभाति मे ।
उडुगणैरुदयोन्मुखचन्द्रिका
गतहिमैरिव चैत्रविभावरी ॥ ७ ॥

धारिणी— (उपेत्य ।) जेदु अज्जउत्तो । जयत्वार्यपुत्रः ।

विदूषकः— वड्ढदु होदी । वर्धतां भवती ।

परिव्राजिका— विजयतां देवः ।

राजा— भगवति ! अभिवादये ।

परिव्राजिका— अभिमतसिद्धिरस्तु ।

धारिणी— (सस्मितम् ।) अज्जउत्त एसो दे अङ्गेहिं तरुणीअणसहाअस्स असोओ सङ्केदघरअं सङ्कप्पिदो ।

अनतीति । अनतिलम्बिदुकूलनिवासिनी अल्पावलम्बितदुकूल वसाना । लघुभिः अल्पैः । आभरणैः भूषणैः । मे । प्रतिभाति । कथमिव—गतहिमैः अस्तुहिनैः । उडुगणैः नक्षत्रसमूहैः । सहिता । उदयोन्मुखचन्द्रिका उद्यच्चन्द्रकौमुदी । चैत्रविभावरी वसन्तरात्रिरिव ॥ ७ ॥

1 असन्देहं.

आर्यपुत्र! एष तेऽस्माभिस्तरुणीजनसहायस्याशोकः सङ्केतगृहं संकल्पितः।

विदूषकः— भो आराहिओसि। भो आराधितोऽसि।

राजा— (सव्रीडमशोकमभितः परिक्रामन्।)

नायं देव्या भाजनत्वं न नेयः
सत्काराणामीदृशानामशोकः।
यः सावज्ञो माधवश्रीनियोगे
पुष्पैः शंसत्यादरं [1]यत्प्रयत्ने॥ ८॥

विदूषकः— भो विस्सद्धो भविअ इमं जोव्वणवदिं पेक्ख।
भो विस्रब्धो भूत्वेमां यौवनवतीं पश्य।

धारिणी— कं। काम्।

विदूषकः— तवणीआसोअस्स कुसुमसोहं।
तपनीयाशोकस्य कुसुमशोभाम्।

(सर्वे उपविशन्ति।)

राजा— (मालविकां विलोक्यात्मगतम्।) कष्टं खलु ममाद्य संनिधिविप्रयोगः।

नेति। अय अशोकः। देव्या। ईदृशानां सत्काराणां एवंभूतानां बहुमानानाम्। भाजनत्व पात्रताम्। न न नेयः नेय एव। द्वौ नञौ प्रकृतमर्थं दृढ सूचयतः। यः अशोकः। माधवश्रीनियोगे वसन्तलक्ष्म्यादरे। सावज्ञः सावमतिः अबहुमानं भूत्वा। यत्प्रयत्ने यस्याः प्रयत्ने दोहलादिप्रयत्ने। आदरं वाञ्छाम्। पुष्पैः विशिष्टपुष्पैः। शंसति। दोहलादिप्रयत्ने यथा पुष्पसमृद्धिर्भवति, वसन्तोद्गमे तथा न पुष्पसामग्रीति सावज्ञत्व यत् तस्माद्देव्याः सत्काराणां भाजनत्वमर्हतीति सबन्धः॥ ८॥

1. त्वत्प्रयत्ने.

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।
अननुज्ञातसम्पर्का धारिणी रजनीव नौ ॥ ९ ॥

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी— जयतु देवः । अमात्यो विज्ञापयति 'तस्मिन्विदर्भराजोपायने द्वे शिल्पदारिके मार्गपरिश्रमादलसशरीरे इति कृत्वा न प्रवेशिते । सम्प्रति देवोपस्थानयोग्ये । तत्राज्ञां देवो दातुमर्हति' इति ।

राजा— प्रवेशय ते ।

कञ्चुकी— यदाज्ञापयति देवः । (इति निष्क्रम्य ताभ्यां सह पुनः प्रविश्य) इत इतो भवत्यौ ।

प्रथमा— (जनान्तिकम् ।) हला रअणिए अपुव्वं वि एदं राअउलं पविसन्दीए पसीदइ मे अब्भन्तरगदो अप्पा ।

[1]हला रजनिके ! अपूर्वमप्येतद्राजकुलं प्रविशन्त्याः प्रसीदति ममाभ्यन्तरगत आत्मा ।

द्वितीया— जोसिणिए मह वि एव्वं । अत्थि खु लोअवाओ । आआमि सुहं वा दुक्खं वा हिअअं समत्थीकरेदित्ति ।

ज्योत्स्निके ! ममाप्येवम् । अस्ति खलु लोकवादः[2] ।

अहमिति । अहम् । रथाङ्गनामा चक्रवाक इव । प्रिया मालविका । सहचरी चक्रवाकीव । नौ आवयोः । रजनीव । धारिणी । अननुज्ञातसंपर्का अननुमतसङ्गमा भवति ॥ ९ ॥

उपस्थान दर्शनम् ।

1. सखि मदनिके ! अपूर्वमिद राजकुल पश्यन्त्याः प्रसीदति मे हृदयम्
2. लोकप्रवादः.

आगामि सुखं वा दुःखं वा [1]हृदयं समर्थीकरोतीति ।

प्रथमा— सो दाणिं सच्चो होदु । स इदानीं सत्यो भवतु ।

कञ्चुकी— एष देव्या सह देवस्तिष्ठति । उपसर्पतां भवत्यौ ।

(उभे उपसर्पतः । मालविका परिव्राजिका च चेट्यौ दृष्ट्वा परस्परमवलोकयतः ।)

उभे— (प्रणिपत्य ।) जेदु भट्टा । जेदु भट्टिणी ।
जयतु भर्ता । जयतु भट्टिनी ।

राजा— निषीदतम् । (उभे उपविष्टे ।)

राजा— कस्यां कलायामभियोगो भवत्योः[2] ।

उभे— भट्टा सङ्गीदए अब्भन्दरह्म ।
भर्तः ! सङ्गीते अभ्यन्तरे[3] स्वः ।

राजा— देवि ! गृह्यतामनयोरन्यतरा ।

देवी— मालविए इदो पेक्ख । कदरा दे सङ्गीदसहाइणी रुच्चइ ।
मालविके ! इतः पश्य । कतरा ते सङ्गीतसहायिनी रोचते ।

उभे— (मालविकां विलोक्य ।) अह्मो भट्टिदारिआ (प्रणिपत्य ।)
जेदु भट्टिदारिआ । (तया सह बाष्पं विसृजतः ।)
अहो भर्तृदारिका । जयतु भर्तृदारिका ।
(सर्वे सविस्मयमालोकयन्ति ।)

राजा— के भवत्यौ । का वेयम् ।

अभियोगः सामर्थ्यम् ।

1 हृदयसमवस्था कथयतीति ; हृदय सर्वथा कथयतीति. 2. अभिविनीतौ भवत्यौ 3 अभिविनीते

प्रथमा— देव इअं अह्माणं भट्टिदारिआ ।

देव ! इयमस्माकं भर्तृदारिका ।

राजा— कथमिव ?

उभे— सुणादु भट्टा । जो सो भट्टिणा विअअदण्डेहिं विअम्भणाहं वसीकरिअ बन्धणादो मोइदो कुमारो माहवसेणो णाम, तस्स इअं कणीअसी भइणी मालविआ णाम ।

शृणोतु भर्ता । योऽसौ भर्त्रा विजयदण्डैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम. तस्येयं कनीयसी भगिनी मालविका नाम ।

धारिणी— कहं राअदारिआ इअं । चन्दनं खु मए पादुआपरिहोएण दूसिदं ।

कथं राजदारिकेयम ! चन्दनं खलु मया [1]पादुकापरिभोगेण दूषितम ।

राजा— अथ[1] भवती कथमित्थंभूता ।

मालविका— (निश्चित्यात्मगतम् ।) विहिणो णिओएण ।

विधेर्नियोगेन ।

द्वितीया— सुणादु भट्टा । दाआदवसं गदे अम्हाणं भट्टिदारए माहवसेणे तस्स अमच्चेण अज्जसुमदिणा अम्हारिसं परिअणं उज्झिअ गूढं अवणीदा एसा ।

शृणोतु भर्ता। दायाद्यवशं गतेऽस्माकं भर्तृदारके माधव-

1. पादुकोपयोगेन.

सेने तस्यामात्येनार्यसुमतिना अस्मादृशं परिजनं उज्झित्वा गूढमपनीतैषा ।

राजा— श्रुतपूर्वं मयैतावत् । ततस्ततः ।

उभे— एत्तिअं एव्व जाणीमो । अदो वरं ण आणीमो ।
एतावदेव जानीवः । अतः परं न जानीवः ।

परिव्राजिका— अतः परमहं मन्दभागिनी कथयिष्यामि ।

उभे— भट्टिदारिए अज्जकोसिईए विअ सरसञ्ञोओ पडिभाइ ।
भर्तृदारिके ! आर्यकौशिक्या इव स्वरसंयोगः प्रतिभाति ।

मालविका— अह इं । अथ किम् ।

उभे— जदिवेसधारिणी अज्जकोसिई दुक्खेण विभावीअदि । भअवदि वन्दामो ।
यतिवेषधारिणी आर्यकौशिकी दुःखेन विभाव्यते । भगवति ! वन्दावहे ।

परिव्राजिका— स्वस्ति भवतीभ्याम् ।

राजा— कथमास्तवर्गोऽयं भवत्याः ?

परिव्राजिका— एवमेतत् ।

विदूषकः— तेणहि कहेदु दाणिं भअवदी अत्तहोदीए उत्तन्दसेसं ।
तेन हि कथयत्विदानीं भगवती अत्रभवत्या वृत्तान्तशेषम् ।

परिव्राजिका— (सवैक्लव्य ।) श्रूयतां तावत् । माधवसेनसचिवं सुमतिं ममाग्रजमवगच्छ ।

राजा— उपलब्धम् । ततस्ततः ।

परिव्राजिका— स इमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्सम्बन्धाकाङ्क्षया पथिकसार्थं वैदिशगामिनमनुप्रविष्टः ।

राजा— ततस्ततः ।[1]

परिव्राजिका— ततश्च,

[2]तूणीरपट्टपरिणद्धभुजान्तराल-
[3]मापार्ष्णिलम्बिशिखिबर्हकलापधारि ।
कोदण्डपाणि निनदत्प्रतिरोधकाना-
मापातदुष्प्रसहमाविरभूदनीकम् ॥ १० ॥

(मालविका भयं रूपयति ।)

विदूषकः— भोदि मा भआहि । अदिक्कन्दं खु भअवदी कहेदि ।
भवति ! मा भैषीः । अतिक्रान्तं खलु भगवती कथयति ।

राजा— ततस्ततः ।

परिव्राजिका— ततो मुहूर्तं बद्धयुद्धास्ते पराङ्मुखीकृताः सार्थवाहयोद्धारः ।

तूणीरेति । तूणीरपट्टपरिणद्धभुजान्तरालम् इषुबन्धनवर्ध्राबद्धभुजमध्यम् । आपार्ष्णिलम्बिशिखिबर्हकलापधारि ईषत्पश्चाद्भागलम्बिनिबिडमयूरपिञ्छम् । 'आङीषदर्थेऽभिव्याप्तौ' । आसमन्ताल्लम्बि वा । कोदण्डपाणि धनुष्पाणि । निनदत् क्ष्वेलारव कुर्वत् । प्रतिरोधकानां प्रतिरोधी शत्रुः शत्रुसैन्यानाम् । आपातदुष्प्रसहं प्रवेशदुस्सहम् । एव भूतम्, अनीकम् आविरभूत् युद्धमाविबेभूव ॥ १० ॥

---

1. परिव्राजिका— स चाटव्यन्ते निविष्टो गताध्वा वणिग्जनोऽध्वश्रमार्तो विश्रमितुम् । राजा— ततस्ततः; परिव्राजिका— स चाटव्यामन्तरे निविष्टो वणिग्जनोऽध्वश्रमान्मार्गे विश्रमितुम् । राजा— ततस्ततः 2. तूणीरबन्ध 3. मार्कणलम्बिशिखिपिञ्छकलापधारी.

राजा— भगवति! अतः परमिदानीं कष्टं श्रोतव्यम्।

परिव्राजिका— ततः स मत्सोदर्यः

इमां परीप्सुर्दुर्जाते पराभिभवकातराम्।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः॥ ११॥

प्रथमा— हा हदो सुमदी। हा हतः सुमतिः।

द्वितीया— अदो खु भट्टिदारिआए एआरिसी समवत्था संवुत्ता।
अतः खलु भर्तृदारिकाया एतादृशी समवस्था संवृत्ता।

(परिव्राजिका बाष्पं विकिरति।)

राजा— भगवति! तनुभृतामीदृशी लोकयात्रा। न शोच्यस्तत्-भवान् सफलीकृतभर्तृपिण्डः। ततः।

परिव्राजिका— ततो मोहं गताहं यावत्संज्ञामुपलभे तावदियं दुर्लभदर्शना संवृत्ता।

राजा— महत् खलु कृच्छ्रमनुभूतं भगवत्या।

परिव्राजिका— ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीकृतवैधव्यदुःखया मया त्वदीयं देशमवतीर्य इमे काषाये गृहीते।

राजा— युक्तम्। सज्जनस्यैष पन्थाः। ततस्ततः।

* इमामिति। दुर्जाते आपदि। पराभिभवकातरां परेषां शत्रूणां अभिभवः आक्रमण तस्मात् कातरां भीताम्। इमां मालविकाम्। परीप्सुः पर्याप्तुं परित्रातुमिच्छुः। 'आप् ज्ञप्यृधाम् ईत्' इति ईत्वम्। 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः। 'पर्याप्तिः स्यात्परित्राणम्' इत्यमरः। भर्तृप्रियः स्वामिभक्तः। प्रियैः। असुभिः प्राणैः। भर्तुः। आनृण्य अनृणत्वम्। गतः प्राप्तः॥ ११॥

परिव्राजिका— सेयमाटविकेभ्यो वीरसेनम्, वीरसेनाद्देवीं गता, देवीगृहे लब्धप्रवेशया मया पुनर्दृष्टेत्येतदवसानं कथायाः ।

मालविका— (आत्मगतम् ।) किं णु खु संपदं भट्टा भणादि । किं नु खलु साम्प्रतं भर्ता भणति ।

राजा— अहो परिभवोपहारिणो विनिपाताः । कुतः ।

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती ।
स्नानीयवस्त्रक्रियया पत्रोर्णं वोपयुज्यते ॥ १२ ॥

धारिणी— भअवदि तुए अहिजणवदिं मालविअं अणाचक्खन्दीए असम्पदं किदं ।

भगवति! त्वयाभिजनवतीं मालविकामनाचक्षाणया असाम्प्रतं कृतम् ।

परिव्राजिका— शान्तं पापं शान्तं पापम् । कारणेनैव खलु मया नैभृत्यमवलम्बितम् ।

आटविकेभ्यः वनचरेभ्यः । लब्धप्रवेशा प्राप्तप्रवेशा । अवसानं अवधि ।

प्रेष्येति । देवीशब्दक्षमा सती महादेवीत्यभिधानस्य योग्या सती । इयम् । प्रेष्यभावेन परिचारिकाभावेन । 'नियोज्यकिङ्करप्रेष्य भुजिष्यपरिचारकाः' इत्यमरः । कृता नाम कृतैव । नाम प्रश्ने । कथमिव — 'पत्रोर्णं धौतकौशेय बहुमूल्यं महाधनम् । महार्घपट्टे' स्नानीयवस्त्रक्रियया स्नानकौपीनकर्मणा । उपयुज्यत इव प्रयोज्यत इव ॥ १२ ॥

अनाचक्षाणया अव्याहरन्त्या । असांप्रतं अयुक्तम् । नैभृत्यं नियन्त्रितभावः सन्यासवेषधारणम् । अवलम्बितं गृहीतम् ।

* **प्रेष्यभावेनेति** । देवीशब्दयोग्या सती इयं मालविका । प्रेष्यभावेन परिचारकत्वेन । पर्युनुयुज्यते नाम नियुज्यते किल । पत्रोर्णं धौतकोशेयं । वा इत्युपमायाम् । 'उपमायां विकल्पे वा' इत्यमरः । स्नानीयवस्त्रक्रियया स्नानार्हवस्त्रकरणेन ॥

धारिणी— किं विअ कालणं । किमिव कारणम् ।

राजा— यदि वक्तव्यम्, कथ्यताम् ।

परिव्राजिका— श्रूयताम् । इयं पितरि जीवति केनापि [1]देवयात्रागतेन सिद्धादेशेन साधुना मत्समक्षमादिष्टा । 'संवत्सरमात्रं प्रेष्यभावमनुभूय ततः सदृशभर्तृगामिनी भविष्यति' इति । तमेनमवश्यंभाविनमादेशमस्यास्त्वत्पादशुश्रूषया परिणमन्तमवेक्ष्य कालप्रतीक्षया मया साधु कृतमिति पश्यामि ।

राजा— युक्तोपेक्षा ।

(प्रविश्य ।)

कञ्चुकी— देव कथान्तरेणान्तरितमिदममात्यो विज्ञापयति । 'विदर्भगतमनुष्ठेयमवधारितमस्माभिः । देवस्य तावदभिप्रायं श्रोतुमिच्छामि' इति ।

राजा— मौद्गल्य ! तत्रभवतोर्भ्रात्रोर्यज्ञसेनमाधवसेनयोर्द्वैराज्यमव[2]स्थापयितुकामोऽस्मि ।

तौ पृथग्वरदाकूले [3]शिष्टामुत्तरदक्षिणे ।

मत्समक्षं मत्पार्श्वम् । सदृशभर्तृगामिनी क्षत्रियवशयोग्यभर्तृगामिनी । अवश्यं भाविनं निश्चयानुभवितव्यम् । आदेशं नियोगम् । परिणतं फलितम् । कालप्रतीक्षया प्राप्तकालमपेक्ष्य । साधु कृतं उत्तमं कृतम् । कथान्तरेण उपकथया । अन्तरितं छादितम् । अनुष्ठेय कर्तव्यम् । द्वैराज्यं राज्यं द्विविध कृत्वा ।

ताविति । वरदा नाम नदी तस्यास्तीरे । शिष्टौ विशिष्टौ प्रथितौ वा । तौ यज्ञसेनमाधवसेनौ । उत्तरदक्षिणे च । नक्त दिवं दिवारात्रम् । विभज्य विभिद्य । उभौ शीतोष्णकिरणौ चन्द्रादित्याविव ॥ १३ ॥

* ताविति । तौ यज्ञसेनमाधवसेनौ । पृथक् पार्थक्येन । उत्तरदक्षिणे ।

1. लोकयात्रा. 2. द्वयोः राज्य स्थापयितुमिच्छामि. 3. शिष्टावुत्त...

नक्तंदिवं विभज्योभौ शीतोष्णकिरणाविव ॥ १३ ॥

कञ्चुकी — देव! एवममात्यपरिषदे विज्ञापयामि ।

(राजा अङ्गुल्यानुमन्यते । निष्क्रान्त कञ्चुकी ।)

प्रथमा— (जनान्तिकम् ।) भट्टिदारिए दिट्ठिआ भट्टिदारओ अध्धरज्जे पदिट्ठं गमिस्सदि ।

भर्तृदारिके! दिष्ट्या भर्तृदारकोऽर्धराज्ये प्रतिष्ठां गमिष्यति ।

मालविका— एत्तिअं दाव बहुमन्दव्वं जं जीवितसंसआदो मुत्तो।

एतावत्तावद्बहुमन्तव्यं यज्जीवितसंशयान्मुक्तः ।

(प्रविश्य ।)

कञ्चुकी— विजयतां देव. । अमात्यो विज्ञापयति । अहो कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदोऽप्येवमेव दर्शनम् । कुतः,

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संग्रहीतुः ।
तौ स्थास्यतस्ते नृपती निदेशे
[1]परस्परावग्रहनिर्विकारौ ॥ १४ ॥

वरदाकूले वरदा नाम तत्रत्या नदी तस्याः कूले उभे तीरे । शिष्टां रक्षताम् ॥

द्विधेति । संग्रहीतुः सारथेः । धुरं भारम् । रथाश्वाविव रथवाहनतुरङ्गाविव । द्विधा विभक्तां द्वैविध्यविभजिताम् । श्रियं राज्यलक्ष्मीम् । उद्वहन्तौ । परस्परानुग्रहनिर्विकारौ अन्योन्यविरोधरहितौ । नृपती यज्ञसेनमाधवसेनौ । तौ निदेशे आज्ञायाम् । स्थास्यतः निदधाते ॥ १४ ॥

1. परस्परानुग्रहनिर्विकारौ.

राजा— तेन हि मन्त्रिपरिषदं ब्रूहि । सेनापतये वीरसेनाय लिख्यतामेवं क्रियतामिति ।

कञ्चुकी— यदाज्ञापयति देवः । (इति निष्क्रम्य सप्राभृतक लेख गृहीत्वा पुनः प्रविश्य ।) अनुष्ठिता प्रभोराज्ञा । अयं पुनरिदानीं देवस्य सेनापतेः पुष्पमित्रस्य सकाशात्सप्राभृतको लेखः प्राप्तः । प्रत्यक्षीकरोत्वेनं देवः ।

(राजा सहसोत्थाय प्राभृतक सोपचार परिगृह्य शिरसि कृत्वा परिजनायार्पयति । लेख च नाट्येन उद्वेष्टयति ।)

धारिणी— अम्हहे तदोमुहं एव्व मे हिअअं । सुणिस्सं दाव गुरुअणकुसलाणन्दरं पुत्तस्स वसुमित्तस्स उत्तन्दं । अदिभारे खु सेणावइणा णिउत्तो मे पुत्तओ ।

अम्हो! ततोमुखमेव मे हृदयम । श्रोष्यामि तावद्गुरुजनकुशलानन्तरं पुत्रस्य वसुमित्रस्य वृत्तान्तम । [1]अतिभारे खलु सेनापतिना नियुक्तो मे पुत्रकः ।

राजा— (उपविश्य वाचयति ।) स्वस्ति । यज्ञशरणात्सेनापतिः पुष्पमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति । विदितमस्तु । योऽसौ राजसूययज्ञदीक्षितेन मया राजपुत्रशतपरिवृतं गोप्तारं वसुमित्रमादिश्य संवत्सरोपावर्तनीयो

परिषद समूहम् । प्राभृतकं उपदा । उद्वेष्टयति वाचयति । यज्ञशरणात् यज्ञगृहात् । अग्निहोत्राद्वा । अनुदर्शयति प्रेषयति । गोप्तारं यज्ञतुरगरक्षितारम् ।

* अम्हहे इति हर्षे । यज्ञशरणात् इति । अत्र राजयज्ञो नाम अश्वमेधः । राजपुत्रशतपरिवृतं राजपुत्राणां शतेन परिवेष्टितम् । तथा च श्रुतावश्वमेधप्रकरणे 'शतेन राजपुत्रैः सह' इति ।

1. तुरगरक्षाधिकारे खलु स सेनापतिना.

निरर्गलस्तुरगो विसृष्टः, स सिन्धोर्दक्षिणे रोधसि चरन्नश्वानीकेन यवनानां प्रार्थितः । तत उभयोः सेनयोर्महानासीत्संमर्दः ।

(धारिणी विषाद रूपयति ।)

राजा— कथमीदृशं संवृत्तम् । (शेषं पुनर्वाचयति ।)

ततः परान्पराजित्य वसुमित्रेण धन्विना ।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः ॥ १५ ॥

धारिणी— इमिणा दाणिं अम्ससइ मे हिअअं ।

अनेनेदानीमाश्वसिति मे हृदयम् ।

राजा— (लेखशेष वाचयति ।) सोऽहमिदानीमंशुमतेव सगरेण पौत्रेण प्रत्याहृताश्वो यक्ष्ये । तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति ।

राजा— अनुगृहीतोऽस्मि ।

परिव्राजिका— दिष्ट्या पुत्रविजयेन दंपती वर्धेते । (देवीं विलोक्य)

उपावर्तनीयः निवर्तनीयः । निरर्गलः अनिवारणः । सिन्धोः सरितः । सिन्धुर्नाम सरित् । यवनानां यवनदेशराज्ञां तुलुष्काणां वा । अश्वानीकेन अश्वसेनया ।

तत इति । ततः अनन्तरम् परान् शत्रून् पराजित्य जित्वा । धन्विना धनुस्सहायेन । वसुमित्रेण । प्रसह्य बलात्कृत्य । ह्रियमाणः आहृतः । वाजिराजः अश्वरत्नम् । निवर्तितः ।

पौत्रेण नप्त्रा । प्रत्याहृताश्वः प्रतिनिवर्तिताश्वः । अकालहीन अकालक्षेपम् । विगतरोषः निवृत्तकोपः । वधूजनेन स्वान्तःपुरवधूजनेन ।

भर्त्रासि वीरपत्नीनां श्लाघ्यायां स्थापिता धुरि ।
वीरसूरिति शब्दोऽयं तनयात्त्वामुपस्थितः ॥ १६ ॥

विदूषकः— होदि परितुट्ठोह्मि पिदरं अणुगतो वच्छोत्ति ।
भवति ! परितुष्टोऽस्मि [1]पितरमनुगतो वत्स इति ।

राजा— मौद्गल्य ! कलभेन खलु यूथपतिरनुकृतः ।

कञ्चुकी—

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति ।
यस्याप्रधृष्यः प्रभवस्त्वमुच्चै-
र्वह्नेरपां दग्धुरिवोरुजन्मा ॥ १७ ॥

राजा— मौद्गल्य ! यज्ञसेनस्यालमुररीकृत्य मुच्यन्तां सर्वे बन्धनस्थाः ।

कञ्चुकी— यदाज्ञापयति देवः । [इति निष्क्रान्तः ।

भर्त्रासीति । वीरपत्नीनां वीरभार्याणाम् । 'वीरपत्नी वीरभार्या' इति कोशः । श्लाघ्यायां श्रेष्ठायाम् । धुरि अग्रे । भर्त्रा नायकेन । स्थापितासि । वीरसूः 'वीरमाता तु वीरसूः' इति कोशः । वीरमातेत्यय शब्दः । तनयात् पुत्रात् । त्वामुपस्थितः ॥ १६ ॥

अनुजातः सदृशः । अनुकृतः प्रापितः ।

नेति । एतावता एतावन्मात्रेण । वीरविजृम्भितेन वीरशब्देन । नः अस्माकम् । चित्ते मनसि । विस्मयं नादधाति । अपां दग्धुर्वह्नेः बडबामुखाग्नेः । ऊरूजन्मा और्वः अतिबलपराक्रमः । यस्य प्रभवः उद्भवः । त्वम् । उच्चैः अतिशयेन । अप्रधृष्यः अनाक्रमितव्यः ॥ १७ ॥

बन्धनस्थाः कारागृहस्थाः ।

1. यत्पितरमनुजातो.

धारिणी— जअसेणे गच्छ इरावदीपमुहाणं अन्देउराणं पुत्तस्स विअअउत्तन्दं णिवेदेहि ।

जयसेने! गच्छ, इरावतीप्रमुखानामन्तःपुराणां पुत्रस्य विजयवृत्तान्तं निवेदय ।

प्रतीहारी— तह । तथा । (इति प्रस्थिता ।)

धारिणी— एहि दाव । एहि तावत् ।

प्रतीहारी— (प्रतिनिवृत्य ।) इअम्हि । इयमस्मि ।

धारिणी— (जनान्तिकम ।) जं मए असोअदोहलणिओए पडिण्णादं मालविआए एदं से अहिअणं अ णिवेदिअ मह वअणेण इरावदिं अणुणेहि । तुए सच्चादो ण परिब्भंसइदव्वत्ति ।

यन्मयाशोकदोहदनियोगे प्रतिज्ञातं मालविकायै, तत् अस्या अभिजनं च निवेद्य मम वचनेनेरावतीमनुनय— त्वयाहं सत्यान्न परिभ्रंशयितव्येति ।

प्रतीहारी— जं भट्टिणी आणवेदि । (इति निष्क्रम्य पुनः प्रविश्य ।) भट्टिणि पुत्तविअएण अविभत्तपरितोसाणं अन्देउराणं आभलणाणं रअणमञ्जूसम्हि संवुत्ता ।

यद्भट्टिन्यज्ञापयति । भट्टिनि! [1]पुत्रविजयेनाविभक्तपरितोषाणामन्तःपुराणामाभरणानां रत्नमञ्जूषास्मि संवृत्ता ।

धारिणी— किं एत्थ अच्चरिअं । णं साहारणो ताणं मह अ एसो अब्भुदओ ।

किमात्राश्चर्यम । ननु साधारणस्तासां मम चैषोऽभ्युदयः ।

1 पुत्रविजयश्रवणेनाश्रान्तपरितोषाणा ; पुत्रविजयनिमित्तेन परितोषेण.

प्रतीहारी— (जनान्तिकम् ।) भट्टिणि इरावदी विण्णवेदि । सरिसं खु देवीए पहवंदीए । तुह वअणं पुडमसङ्कप्पिदं ण जुज्जइ अण्णहा कादुं ति ।

भट्टिनि ! इरावती विज्ञापयति । सदृशं खलु देव्याः प्रभवन्त्यास्तव वचनं प्रथममंकल्पितं न युज्यतेऽन्यथाकर्तुमिति ।

धारिणी— भअवई तुए अणुण्णादा इच्छामि अज्जसुमदिणा पुडमसंभाविदं अज्जउत्तस्स मालविअं पडिवादेदुं ।

भगवति ! त्वयानुज्ञाता इच्छाम्यार्यसुमतिना प्रथमसंभावितामार्यपुत्रस्य मालविकां प्रतिपादयितुम ।

परिव्राजिका— इदानीमपि त्वमेवास्याः प्रभवसि ।

धारिणी—(मालविका हस्ते गृहीत्वा ।) अज्जउत्तो इदं पिअणिवेदणाणुरूवं पारितोसिअं पडिच्छदु ।

आर्यपुत्र इदं प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छतु

(राजा सव्रीड जोषमास्ते ।)*

धारिणी— (सस्मितम् ।) किं ओहिरेदि मं अज्जउत्तो ।

किमवधीरयति मामार्यपुत्रः ।

विदूषकः— होदि एसो लोअव्ववहारो सव्वो वि णववरो लज्जादुरो होदित्ति ।

भवति ! एष लोकव्यवहारः सर्वोऽपि नववरो लज्जातुरो भवतीति ।

(राजा विदूषकमवेक्षते ।)

* आर्यपुत्रेत्यादि । अत्र प्रीत्युत्पादनात्प्रसादो नाम सन्ध्यङ्गमुक्तं भवति ।

विदूषकः— अहवा देवीए किददेवीसद्द मालविअं अत्तभवं पडिग्गहीदुं इच्छदि ।

अथवा देव्या [1]कृतदेवीशब्दां मालविकामत्रभवान प्रतिगृहीतुमिच्छति ।

धारिणी— जदा राअदारिआ इअं अहिअणेण एव्व तदा दिण्णो से देवीसद्दो । किं पुणरुत्तेण ।

[2]यदा राजदारिकेयम अभिजनेनैव तदा दत्तोऽस्यै देवीशब्दः । किं पुनरुक्तेन ।

परिव्राजिका— मा मैवम् ।

अप्याकरसमुत्पन्ना मणिजातिरसंस्कृता ।
जातरूपेण कल्याणि न हि संयोगमर्हति ॥ १८ ॥

धारिणी— मरिसेदु भअवदी । अब्भुदअकहाए जं मए ण लक्खिदं जअसेणे गच्छ तुमं दाव कौसेअपत्तोण्णं से सिघ्घं उवहर ।

मर्षयतु भगवती । अभ्युदयकथया यन्मया न लक्षितम् ।
जयसेने ! गच्छ त्वं तावत्कौशेयपत्रोर्णमस्यै[3] शीघ्रमुपहर ।

प्रतीहारी— जं भट्टिणी आणवेदि । (इति निष्क्रम्य पत्रोर्णं गृहीत्वा पुनः प्रविश्य ।) देवि एदम् ।

अपीति । आकरसमुत्पन्नापि रत्नाकरसमुत्पन्ना । मणिजातिः मुक्तादिमणिजातिः रत्नादिः । असस्कृता अनुत्तेजिता । कल्याणी महार्घापि । जातरूपेण स्वर्णाभरणेन । सयोग सङ्गमम् । नार्हति ॥ १८ ॥

* अपीति । अत्र लब्धार्थस्य स्थिरीकरणात्कृतिर्नाम सन्ध्यङ्गमुक्त भवति ॥

1. प्रणयविशेष दत्तदेवीशब्दां. 2 एतस्या राजदारिकाया अभिजनेनैव दत्तो देवीशब्दः । 3. पत्रोर्णनेपथ्यमस्यै.

यद्भट्टिन्याज्ञापयति । देवि ! एतत् ।

धारिणी— (मालविकामवकुण्ठ्य ।) दाणिं अज्जउत्तो पडिच्छदु इदानीमार्यपुत्रः प्रतीच्छतु ।

राजा— देवि ! त्वच्छासनादप्रत्युत्तरा वयम् ।

परिव्राजिका— हन्त प्रतिगृहीता ।

विदूषकः— अहो देवीए अणुऊलदा । अहो देव्या अनुकूलता ।

(धारिणी परिजनमवलोकयति ।)

परिजनः— (मालविकामुपेत्य ।) जेदु भट्टिणी । जयतु भट्टिनी ।

(धारिणी परिव्राजिकां निर्वर्णयति ।)

परिव्राजिका— नैतच्चित्रं त्वयि । कुतः,

प्रतिपक्षेणापि पतिं सेवन्ते भर्तृवत्सलाः साध्व्यः ।
अन्यसरितां शतानि हि समुद्रगाः प्रापयन्त्यब्धिम् ॥ १९ ॥

(प्रविश्य ।)

निपुणिका— जेदु भट्टा । इरावदी विण्णवेदि । जहहि उवआरादिक्कमेण किदावराहाए ण मए भट्टिणो अणुऊलं आअरिदं ।

* हन्त हर्षे । प्रतिगृहीता वशीकृता । अत्र वाञ्छितावाप्तेरानन्दो नाम सन्ध्यङ्गमुक्त भवति ।

जयतु भट्टिनी । अत्र बहुमानप्राप्तेर्भाषेति सन्ध्यङ्गमुक्त भवति ।

प्रतीति । भर्तृवत्सलाः प्रियप्रेमवत्यः । साध्व्यः पतिव्रताः । प्रतिपक्षेणापि सपत्नीवर्गेण सहापि । पतिं नायकम् । सेवन्ते । समुद्रगाः समुद्रं गच्छन्त्यः । नद्य. अन्यसरितां अन्यत्र समुद्भूतानां गिरिनदीनाम् । शतानि अनेकानि । उदधिं प्रापयन्ति हि ॥ १९ ॥

सम्पदं पुण्णमणोरहेण भट्टिणा जाव अहं पसादमेत्तेण वि सम्भादव्वत्ति ।

जयतु भर्ता । इरावती विज्ञापयति । '[1]यथा हि उपचारातिक्रमेण कृतापराधया न मया [2]भर्तुरनुकूलमाचरितम् । सम्प्रतं पूर्णमनोरथेन भर्त्रा यावदहं प्रसादमात्रेण संभावयितव्या' इति ।

धारिणी— णिउणिए अवस्सं ताए सन्देसं सेविदुं अज्जउत्तो जाणिस्सदि ।

निपुणिके! [3]अवश्यं तस्याः सन्देशं सेवितुमार्यपुत्रो[4] ज्ञास्यति ।

निपुणिका— जं देवी अणवेदि । [5]यद्देव्याज्ञापयति ।

[इति निष्क्रान्ता ।

परिव्राजिका— देव! अहममुना भवत्संबन्धेन चरितार्थं माधवसेनं सभाजयितुमिच्छामि यदि मे तव प्रसादः ।

धारिणी— भअवदि ण जुत्तं अम्हे परिच्चत्तुं ।

भगवति! न युक्तमस्मान परित्यक्तुम ।

राजा— भगवति! मदीयेषु लेखेषु तत्रभवतस्त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि ।

परिव्राजिका— युवयोः स्नेहेन परवानयं जनः ।

1 यदुपचारातिक्रमेण तदा भर्तुरपराद्ध स्वय भर्तुरनुकूल न मयाचरितम्. 2. भर्तुरनुरूपमाचरितम्. 3 अवश्य रोषमार्यपुत्रो हास्यति; 4 आर्यपुत्रोऽनुज्ञास्यति. 5. अनुगृहीताम्मि

धारिणी—आणवेदु अज्जउत्तो किं भूओ वि पिअं अणुचिट्ठामि ।
आज्ञापयत्वार्यपुत्र, किं भूयोऽपि प्रियमनुतिष्ठामि ।

राजा— किमतः परमपि प्रियमस्ति । तथापीदमस्तु ।

(भरतवाक्यम् ।)

त्वं मे प्रसादसुमुखी भव चण्डि नित्य-
मेतावदेव मृगये प्रतिपक्षहेतोः ।
आशास्यमीतिविगमप्रभृति प्रजानां
संपत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥ २० ॥

[इति निष्क्रान्ता सर्वे

॥ इति पञ्चमोऽङ्कः ॥

त्वमिति । हे चण्डि । मे । नित्यम् । प्रसादसुमुखी प्रसन्नमुखराग भव । प्रतिपक्षहेतोः सपत्नीजनमुद्दिश्य । एतावदेव । मृगये । ईतिविगमप्र प्रजानां प्राणिनाम् । आशास्य प्रार्थनीयम् । गोप्तरि । अग्निमित्रे न सप खलु जायत एव । प्रजानां सर्वमपि प्रार्थनीयमस्मिन् सपत्स्यत इति भा

त्वमिति । हे देवि । मे मम । नित्य सर्वदा । प्रसादसुमुखी प्र देन प्रसन्नतया शोभन मुख यस्यास्तथोक्ता । भव भूयाः । एतावदेव इदमे हृदये मनसि । प्रतिपादनीय अपेक्षणीयम् । इत. पर भरतवाक्यम् । प्रज जनानाम् । अभ्यधिगमात् प्राप्तेः परिग्रहादित्यर्थः । तस्मात्प्रभृति आरभ्य अग्निमित्रेऽस्मिन्नर्थे । गोप्तरि रक्षके सति । तासा प्रजानाम् । आशास्य अप क्ष्यवस्तु । न सपद्यत इति न सभवतीति न, सभवत्येवेत्यर्थ । अनेन आशस रूपेण शुभशसनेन प्रशस्तिर्नाम सन्ध्यङ्गमुक्त भवति । यथोक्तम्— 'प्रशं शुभशंसनम्' इति । सत्यत्र नाटकान्ते भरतेन सर्वकालसाधारण्येनाशर वचने कर्तव्ये अत्र प्रजाना आशास्यसिद्धि प्रति गोप्तुरग्निमित्रस्य व तत्कालराजोपलक्षणमिति मन्तव्यम् ॥ २० ॥

ALPHABETICAL INDEX OF VERSES.

	PAGE.		PAGE.
...प्रे विकीर्णकुरवक	१३५	एकैश्वर्ये स्थितोऽपि	१
...रन्तर्निहितवचनैः	४८	औत्सुक्यहेतु विवृणोषि	७२
...चिराधिष्ठित	१९	कदा मुख वरतनु	१२३
...तिमात्रभासुरत्व	२६	कान्तां विचिन्त्य	१३३
अनतिलम्बिदुकूल	१३७	कात्स्न्र्येन निर्वर्णयितु	११०
अनातुरोत्कण्ठितयो	८५	किसलयमृदोर्विलासिनि	८८
अनिमित्तमिन्दुवदने	३२	कुप्यसि कुवलयनयने	११२
अनुचितनूपुरविरह	१०१	क्व रुजा हृदयप्रमाथिनी	६२
...नेन तनुमध्यया	८६	चरणान्तनिवेशितां	७४
...राधिनि मयि	९३	चित्रगतायामस्यां	४१
...प्याकरसमुत्पन्ना	१५३	छंदो दशस्य दाहो	१०२
...सप्रा...न्ध	२१	जनमिममनुरक्त	४५
...मन्यथा गृहीत्वा	३५	जीमूतस्तनितविशङ्किभिः	३६
...व्याजसुन्दरी	५५	ततः परान्पराजित्य	१४९
...ह रथाङ्गनामेव	१३९	तामाश्रित्य श्रुतिपथगतां	९५
...दाय कर्णकिसलय	८५	तूणीरपट्टपरिणद्ध	१४३
...मत्तानां श्रवणसुभगैः	६५	तौ पृथग्वरदाकूले	१४६
आर्द्रालक्तकमस्याः	८०	त्वदुपलभ्य समीपगतां	६९
...मां परीप्सुर्दुर्जाते	१४४	त्व मे प्रसादसुमुखि	१५६
...धिगमनिमित्त	१०६	दाक्षिण्य नाम	११६
...चितः प्रणयो वर	६३	दीर्घाक्ष शरदिन्दुकान्ति	४२
...रेण किमात्मैव	११४	दुल्लहो पिओ	४३
...देश विदु शुद्ध	४९	देवानामिदमामनन्ति	१०
...वाभिनयाचार्यौ	२०	द्वारे नियुक्तपुरुष	२३

	PAGE.	
द्विधा विभक्तां	१४७	मन्दोऽप्यमन्दतामेति
धृतिपुष्पमयमपि	८९	मन्ये प्रियाहृतमनाः
धैर्यावलम्बिनमपि	३७	महासारप्रसवयोः
न च न परिचितो	२२	मामियमभ्युत्तिष्ठति
नवकिसलयरागेण	७५	मौर्यसचिवं
न हि बुद्धिगुणेनैव	१०८	यद्यत्प्रयोगविषये
नायं देव्या भाजनत्वं	१३८	रक्ताशोकरुचा
नार्हति कृतापराधो	१२४	लब्धास्पदोऽस्मीति
नेपथ्यगृहगतायाः	४०	वामं सन्धिस्तिमित
नैतावता वीरविजृम्भितेन	१५०	विपुलं नितम्बबिम्बे
पत्रच्छायासु हंसा	५३	विरचितपदं वीरप्रीत्या
पथि नयनयोः	११३	विवादे दर्शयिष्यन्त
परभृतकलव्याहारेषु	१३१	विसृज सुन्दरि
पात्रविशेषे न्यस्तं	१४	वोढा कुरवकरजसां
पुराणमित्येव	४	शठ इति मयि
प्रतिपक्षेणापि पतिं सेवन्ते	१५४	शरकाण्डपाण्डुगण्ड
प्रेष्यभावेन नामेयं	१४५	शरीरं क्षामं स्यात्
बाष्पासारा	९२	शिरसा प्रथमगृहीतां
भर्त्रासि वीरपत्नीनां	१५०	श्लिष्टा क्रिया
भाग्यास्तमयमिवाक्ष्णोः	५२	सर्वान्तःपुरवनिता
भावज्ञानानन्तरं	८३	सर्वाशोकतरूणां
भ्रूभङ्गभिन्नतिलकं	१११	सूर्योदये भवति
मङ्गलालंकृता भाति	२६	स्मयमानमायताक्ष्याः
मधुररवा परभृतिका	९८	हस्तं कम्पवती